III Shelf Right Almirah - 2

7097

1. Title Bhāgavata Purāṇa Tīkā,
   11th Skandha
2. Accession No. 5529
3. Folio No./Pages 148
4. Lines 14-16
5. Size 37 × 22Cm
6. Substance Paper
7. Script Devanāgarī
8. Language Sanskṛit
9. Period Not available
10. Beginning "ओम् श्री गणेशाय नमः ओम् विजयं तेपरानंदकृत्मपादरजः स्त्रज :।।"
11. End "इति श्री भावार्थ दीपिकायांप्र कादम स्कधेप्र त्रंशोध्यायः ।।3।। रामायनम्"
12. Colophon No
13. Illustrations No
14. Source Donation
15. Subject Purāṇa
16. Revisor No
17. Author Mahārāja Shri Bhāgavata
18. Remarks Written in four-sided mounted frame. Pages are not in order, partly damaged by termite, bound.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

Diamond Book Binding House
Moh. Karachi B.H.E.L. Road Jawalapur

1

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एकादशपत्रं १८

गुरुकुल कांगड़ी
पुस्तकालय

002520

3

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भा० टी०

ॐ श्री गणेशाय नमः ॥ ॐ दिग्जयेत परमानंदकृष्णपादरजःस्रजः ॥ याभूता मूर्ध्नि जायंते महेन्द्रादिमहास्रजः ॥ १ ॥ एकैक
विंशत्यध्यायैः स्फुरिरेकादशे ततः ॥ नायते चेतिहासायः समासव्यासरूपतः ॥ २ ॥ नारदो वसुदेवाय समासेन न्य।
वर्णयत ॥ भगवानुद्धवायाथ विस्तरेणोपपत्तिभिः ॥ ३ ॥ तत्र तु प्रथमेध्याये यदुवंशस्य संक्षयः ॥ उपलिप्सो।
विप्रशापमौसलव्यपदेशतः ॥ अप्युपततः परमानंदकृष्णक्रीडानुवर्णिता ॥ तत्र निरूप्य परमानंदपदारविंदानुवर्णितेः।
एवं तावद्दशमस्कंधे भूभारावतारणाय निजविभूतिविभूषितयदुवंशप्रपंचडवं शावनंताविततसकलस्वतां।
शस्य भगवतः श्रीकृष्णस्य लीलाविलतप्रवृत्तिनिवृत्तिर्हि तद्वनैतत्कुवनास्वरूपाणां प्रवाणं पदेशा आनंदकारणं क्रीडा
निरूपिताम्रथेदानीमपेक्षितयोगमायावैभवस्य भक्तानामात्मतत्त्वोपदेशपूर्वकं क्रीडार्थभूतलेश्ववता।
रितेनावाधिकारिणां मुमुक्षूणां मौसलव्यपदेशेन तत्तदवाधिकापदप्रापकपूर्वकं च ब्राह्मणयत्नुग्रहायनिः
श्रेयसप्रदायो हो निरूप्यते तत्र कुरुक्षेत्रयात्रायां विवक्षस्य वसुदेवस्य कर्मणा कर्मनिर्हारोपायप्रश्ने ॥ तत
उच्यते इमे वंक कर्मयोगश्छन्दवतो नारदादिभिः कर्मयोगो निरूपितः ॥ कर्मणा कर्मनिर्हार एष साधुनिरूपितः
यच्छ्रद्धया तविन्न तन्मुञ्चेनेनेस्येत सूरुषइत्यादिनाते नैव विशुद्धसत्त्वस्य श्रीकृष्णस्य परमेश्वरत्वेनज्ञातवतः
यदुभंगनियमनाध्याये श्रीकृष्णेनात्मतत्त्वमुपदिष्टं वक्ष्यते शमवेतार्थं ज्ञातेनेत्यु यमनक्षे ॥ यत्रः प्रजानामसुहृदिशण
तत्त्वग्रामउदाहृतः ॥ इत्यादिनातत्त्वविषयप्रश्नोत्तरमित्रायेन संस्थितो विहितमासीत ॥ तदेवेदानीं नारदप्रश्नेन त्र
यमेपंचाध्यायो निरूप्यते ॥ तत्र प्रथमेध्याये वैराग्योत्पादनाय यदुकुलस्य ब्रह्मशापापदेशेनात्मनो तविषय
सुखोनामस्यानित्यताप्रतिपाद्यते ततः ॥ चतुर्भिर्निमिजायंतेय संवादेन सप्रविकं वैष्णवतत्त्वनिरूपणं ततः षा।
ष्ठे भगवदुद्धवसंवादप्रस्तावः ॥ ततः त्रयोविंशध्यायं उद्धवं प्रति भगवतस्तत्त्वनिरूपणम् ॥ १ ॥ राम ॥

यच्छ्रद्धयाथ जेद्विश्वं सर्वयज्ञेश्वरं मखैः ॥ ३ वि १

6

नतो द्वाभ्यां मेवालब्रीडे एव मेकाविंशतात्मायैवेकादश संख्या भूय प्रहसिः तस्मा च यथा मतिव्याख्यान मारभ्यते
तच्च मेघश्यालप्रसंगार्थं सर्वं कृत्यार्थं मतं वदति स्लोक इयेव हन्तैनेति ॥ अवतार यदिम डाग मे इह ब्र:॥ जवित्र्वे
गाव तव ईश्वर शी गृह्णिसा पर्यवसायित्वं स्मिन्नथेः॥ कालिकल्लहे प्रसिद्धं ननु ॥१॥ एतद्धि हरणाति ये कोपिता इति
सपत्नैर्दुर्योधनादिभिः कोपिता कौपिकाविताः स्वबहुधया भवती तथाबहुवारानिमर्षः॥ तदेवाह हेतु भूत
हेलनं कचग्रहणादिभिर्विविति इत्यूनेकष्टस्तु तद्धेलनमवज्ञा कचग्रहणादिः॥ श्यामने नन्दिरोपद्याः के शा कषणाः
मेता निश्चा द्विर्येषां यस्य दानं जतशृङ्खलादाहादीनानि ःकृत्वा ये कोपिताः तान्पाण्डुसुतान्निमित्तं कृत्वाऽऽश्वेतरनतः

बादरायणिरुवाच ॥ कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः॥ भुवोवतारयद्भारं जविष्ठं जन
यन्कलिं ॥१॥ ये कोपिताः सुबहु पाण्डुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान् ॥ कृत्वा
निमित्तमितरेतरतः समेतान्हत्वा नृपान्निरहरत्क्षितिभारमीशः ॥२॥

नमिः

उभयोः समेतान्मिलितान्नृपान्हत्वा क्षितेर्भारं निरहरत्कृत्वा इतरेतरतः उभयोः पक्षयोः समेतान्मिलि तर२
तान्नृपान्हत्वा क्षितेर्भारं निरहरत् जहार यद्वा ये कोपिताः येभ्यः कोपिताः तानितरेतरतः परस्परं निमित्तं कृत्वे सं
न्वयः॥ येतावत्मकटदैत्याः पूतनादयः तान्स्वयमेव हतवान् ॥ ये तु दैत्याः वाथवच्छन्नाः स्थिताः तान्परस्परं
निमित्तं विधाय हत्वा भूभारमपाकृतवानित्यर्थः॥ अथ पुनात देवस्य भारभूतराजसत्ताना समागत भूपालदैत्यानि
वर्हणाय स्वमायाप्रपंचं विधाते नासा सतः कलहं जनयन् वाणाः त्वयंगाच्छतः तेन जातं तीति स्वमहिमानमस्य
धाय निरूपयति ॥ यद्वा श्री गीताकौ ॥ मममायाद्वरत्यये ति तदेन दर्शयन् परमेश्वरः क्षितेर्भारमपाहरत ॥ ३॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री० भाग० टी० २

अपि च भूभारेत्यादि ॥ भूभारभूता भारभूता राजपृतना ॥ राज्ञां पृतनाः सेनाः ॥ ततस्तेषां पृतनाश्चेति वा स्व-
बाहुभिर्गुप्तैः पालितैर्यदुभिर्विवाहादिकुलेन निरस्य हत्वा वा भूमिरिति विद्वत्र नैव स्वस्थस्तस्य तत्र अज्ञाभिप्रा-
येण ॥ ननु नैवं कृष्णस्य शिष्टकीर्तिलीलेति ज्ञात्वा कथं तत्र सुकृताय यादवानकरोदिति ॥ तत्राह ॥ अप्रमेयः प्रमातृमश-
क्यः चिंतामाह मन्य इति नन्विति वितर्के ॥ अवनेर्भारो यद्यपि लोकप्रतीत्या गतः ॥ तथाप्यहमगतमेव
मन्ये यस्मादविषह्यमाह्वां यादवं कुलमास्ते तिष्ठति अनेन स्वगतपालनात्सदर्भवत् अयमत्र चिन्तितमिति वितर्कितं सचिंतं ३

भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिन्तयदप्रमेयः ॥ मन्येऽवनेर्ननु गतोऽप्यगतं
हि भारं यद्यादवं कुलमहो अविषह्यमास्ते ॥ ३ ॥ नैवान्यतः परिभवोऽस्य भवेत्कथंचिन्मत्संश्रयस्य
विभवोन्नहनस्य नित्यम् ॥ अन्तः कलिं यदुकुलस्य विधाय वेणुस्तम्बस्य वह्निमिव शान्तिमुपैमि धाम

४

नि

न हीदमस्य मैयात्मतां नन्वाह नैवेति अन्यतः देवादिभ्योऽस्य यादवकुलस्य परिभवः तिरस्कारो न भवेत्
कुतः मत्संश्रयस्य मां संश्रयतः इति मत्संश्रयं कुलेन तस्य किंच नित्यं विभवोन्नहनस्य विभवैर्गजतुरंगादि-
भिरुन्नद्धबलस्य ॥ यद्वा न हीदं किमिति तं हन्तव्यं तत्राह विभवोन्नहनस्येति तस्मादेकं कुविष्णामीत्याह ॥ अन्तः
कलिमिति ॥ शान्तिमुपशमं समुपैमि ॥ वर्तमानसामीप्ये वर्तमानवद्वा ॥ उपैष्यामि नन्दनं तरं यामं च वैकुण्ठा-
ख्यमुपैष्यामीत्यर्थः ॥ सवन्ति विधायानन्तरमेव विधाय विसृज्य वेणुस्तम्भस्य वेणूनां स्तम्भस्य कांडस्य वह्निमिव
ति ॥ तं नैवं तत्कारेण मर्षः ॥ न दैवमत्र मनुष्यकर्तृकं वीक्षितव्यम् ॥ अत्र शान्तिमिति वा पाठः ॥४॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवं व्यवसित इत्यादिना कथयति ॥ व्यवसितः कृतनिश्चयः संजज्ञे उपसेदिवान् तदेव भवतारप्रयोजनं।
सर्वसंपाय स्वलोके जगाम महेशः श्लोके दृश्यते स्म पूर्णेति लोकानां लावण्यं निष्ठितिः त्यागो यथार्थमपेत्य ॥
लोकेषु लावण्येन नास्तीत्यर्थः ॥ यद्वा लोके यो लावण्यस्य विनिर्मितिदानं यतः ॥ यत्र सर्वेषां लोकानां ला-
वण्यं वर्णितो भवंतीत्यर्थः ॥ तथा सम्पूर्णानन्दानां लोचनं साक्षिण्य आह स्म ॥ ततो यस्माद् लोकनेलोचनस्य

एवं व्यवसितो राजन्नसमसंकल्प ईश्वरः ॥ शापव्याजेन विप्राणां संजज्ञे स्वकुले विभुः ॥ ५
सम्पूर्णलोककल्याणनिर्मितीलोचनानन्दनाम् ॥ गीर्भिस्ताः स्मरतां चित्ते
पदेः स्तानीतनोत्क्रिया ॥ ६ ॥ श्रीकृष्णकीर्तिं श्लोकान् वितनय
स्वं जस्ताद्वको ॥ तमोन यानतिष्ठन्तीमागान्स्वपद
मीश्वरः ॥ ७ ॥ राम

प्रवृत्तेः ॥ तथा स्वगीर्भिः तारीरः स्मरतां चित्ते वाञ्छितयतया पदैः तत्र तत्रांकितैः तानि पदानी तत्रांइत्-
माणानां श्रमतो गमनादिकाः क्रियास्त्वाञ्छियत तदानीं तनानां सर्वेषां च वत्सरादिप्रदर्शनीस्थेकनिष्ठाः कृते
त्यर्थः ॥ किंच इतउपविजनिघ्नमाणानां संसारतरणाय कोम स्यां घ्नोभनाः श्लोकाय स्यांतो स्वकीर्तिं
वितनय विस्ताये ॥ अनया कीर्त्याङ्गजसास्वेव नैव तनिष्ठितान्तरिष्ठतीमं श्रेयस्करः ॥ स्वं पदं स्थानमगादि ॥ १
८

मि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तनु
श्री॰
भा॰
टी॰
३

अब्रह्मण्येभ्य उदारेभ्यो वा असेवकेभ्यो वा विप्राः ॥ कुप्यंति इत्यलयस्तु न तथेत्याह ॥ किंचकोपश्चात्तेपि कृष्णचेतसां कथमभूत् कृष्णैकचित्तानां भूदिनर्थः ॥ अतः स्वस्वस्वनिमित्तस्याभावात् निमित्तांतरं पृच्छति ॥ यन्निमित्त इति एकात्मनां एक चित्तानां कथं भेदः कलहः ईश्वरेच्छैव तत्र निमित्तमिति परिहरति ॥ बिभ्रदिति ॥ सकलानां सुंदरवस्तूनां संनिवेशो विन्यासविशेषो यस्मिन् तत् वपुर्बिभ्रत् तर्हि किमिति तिरोहितं यावद्विषयपरः ॥ नन्वस्य मंगलं कर्माचरन् ॥ ननु किं कयाति काम

श्रीराजोवाच ॥ ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनां ॥ विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसां ॥ ८ ॥ यन्निमित्तः स वै शापो यादृशो द्विजसत्तम ॥ कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ॥ ९ ॥ श्रीशुक उवाच ॥ बिभ्रद्वपुः सकलसुंदरसंनिवेशं कर्माचरन्भुवि सुमंगलमाप्तकामः ॥ आस्थाय धाम रममाण उदारकीर्तिः ॥ संहर्तुमैछत कुलं स्थितकृत्यशेषः ॥ १० ॥ ॥ राम ॥ राम ॥ ॥

नयातेत्याप्तकामः तर्हि किमिति कर्माचरति ॥ धाम द्वारवत्याख्यं गृहमास्थाय रममाणः गृहे रममाणान् गृहस्थान् कर्म ग्राहयितुमित्यर्थः ॥ ननु किमाप्तस्य गृहस्थाकर्मभिर्वा ॥ नचाह उदारकीर्तिः बहुफलप्रदा कीर्तिर्यस्य सः कीर्तिं वितानार्थमित्यर्थः ॥ एवं परमैश्वर्येणावर्तमान एव कुलं संहर्तुमैछत ॥ न तस्य हेतोः स्थितः कृत्ये भूभारहरणोऽशेषो यस्य सः ॥ १० ॥ ॥ ३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ईश्वरेच्छयोत्पन्नं ब्रह्मशापं निमित्तं कृत्वा वक्ष्यमाणाह ॥ कर्म्माणीति कर्म्माण्यस्मादतः कर्म्माणि कृत्वा निस्पृहा मुनयः
तपोधनाः पिंडारकं समगमन्निमंत्रणयः ॥ निस्पृहाः प्रस्थापिताः पूर्वोक्ता मुदा परं कीर्तितवाविलतः कर्म्माणि विशिनष्टि
पुण्यानि वहानीत्यादिभिः त्रिभिः पदैः कतिविदश्वमेधादिकर्म्माणि पुण्यमेव जनयंति ॥ पुत्रोपलालनादीनि तत्त
त्कालसुखमेव कुर्वंति ॥ प्रायश्चित्तादीनि तु पापमेव हरंति ॥ एतानि तु सर्वसुखानीत्याह ॥ पुण्यानि वहानि की
र्तनादिना पुण्यानि विदधति प्रायतीति तथा सर्वमंगलानि विदधति सर्वसुखानि कानि वा यतो ज्ञेयातः कलिमलापहरा

कर्म्माणि पुण्यानि वहानि सर्वमंगलानि आयज्ञया कलिमलापहराणि कृत्वा ॥ कालात्मना निवसताय
दुदेवगेहे पिंडारकं समगमन्मुनयो निसृष्टाः ॥ ११ ॥ विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरंगिराः क
श्यपो वामदेवोऽत्रिर्वसिष्ठो नारदादयः ॥ १२ ॥ क्रीडंतस्तानुपव्रज्य कुमारा यदुनंदनाः ॥ उपसंगृह्य पप्र
च्छुरविनीता विनीतवत् ॥ १३ ॥ ते वेषयित्वा स्त्रीवेषैः सांबं जांबवतीसुतं ॥ कृत्वोदरं च समरुद्धस्यायै
यदुनंदनाः ॥ १४ ॥ एषा पृच्छति वो विप्रा अंतर्वत्न्यसितेक्षणा ॥ प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघद
र्शनाः ॥ प्रसोष्यंती पुत्रकामा किंस्वित्संजनयिष्यति ॥ १५ ॥

वाणि कृत्वा मुनिप्रस्थापने हेतुः कालात्मनेति संक्षेपः वक्ष्यमाणयादवदेवगृहे निवसता स्वकुलसंजिहीर्षिणा सर्वः
पिंडारकं नतो नातिदूरे तीर्थविशेषं ॥ ११ ॥ १२ ॥ उपसंगृह्य पादेषु गृहीत्वा ॥ १३ ॥ प्रश्नप्रकारमाह द्वाभ्यां ॥ तावयित्वेति
हे अमोघदर्शना विप्राः एषा अंतर्वत्नी गर्भिणी वः युष्मान् साक्षात् प्रष्टुं विलज्जमाना अस्मन्मुखेन पृच्छति
प्रसोष्यंती प्रसवं प्रसवाकांक्षिणी किंस्वित्संजनयिष्यतीति कन्यां वा पुत्रं वा जनयिष्यति ॥ १५ ॥ ॥ ॥ ॥ ॥ ॥

१५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री० भा० ए० टी० ४

प्रलब्धाः वंचिताः ॥१५॥ तस्मिन्नुदरे अयस्मयं लोहमयं ॥१६॥ मंदभाग्यैरस्माभिः किमेतत्कृतं ततः अस्मान्किं व
दिष्यंतीति विह्वलिताः संतो मुसलमादाय गेहान्ययुः ॥१७॥ राज्ञे उग्रसेनायावेदयांचक्रुः ॥१८॥ ॥१९॥ आ
हुकः उग्रसेनः सोपि वसुदेवसहितः श्रीकृष्णमपृष्ट्वैव ब्राह्मणवचनभीत्या मवान् ॥२०॥ अग्रसल्लोहमग्रसीत्

सं० १

एवं प्रलब्धा मुनयस्तानूचुः कुपिता नृप ॥ जनयिष्यति वो मंदा मुसलं कुलनाशनम् ॥१५॥ तच्छ्रु
त्वा तेऽतिसंत्रस्ता विमुच्य सहसोदरम् ॥ सांबस्य ददृशुस्तस्मिन्मुसलं खल्वयस्मयम् ॥१६॥ किं कृतं
मंदभाग्यैर्नः किं वदिष्यंति नो जनाः ॥ इति विह्वलिता गेहानादाय मुसलं ययुः ॥१७॥ तच्चोपनी
य सदसि परिम्लानमुखश्रियः ॥ राज्ञ आवेदयांचक्रुः सर्वयादवसन्निधौ ॥१८॥ श्रुत्वामोघं विप्रशा
पं दृष्ट्वा च मुसलं नृप ॥ विस्मिता भयसंत्रस्ता बभूवुर्द्वारकौकसः ॥१९॥ तच्चूर्णयित्वा मुसलं
यदुराजः स आहुकः ॥ समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितं ॥२०॥ कश्चिन्मत्स्योऽग्रसील्लो
हं चूर्णानि तरलैस्ततः ॥ उह्यमानानि वेलायां लग्नान्यासन्किलैरकाः ॥२१॥
मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैः सहार्णवे ॥ तस्योदरगतं लोहं स शल्ये लुब्धकोऽकरोत् ॥२२॥ भग
वान्ज्ञातसर्वार्थ ईश्वरोपि तदन्यथा ॥ कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत ॥२३॥ इति श्रीभागव
ते एकादशस्कंधे प्रथमोऽध्यायः ॥१॥

क्रियमाणस्यावशेषितं लोहं चूर्णास्तत्तरलैः तरंगैः ॥२१॥ एरकाः प्रसिद्ध
तृणविशेषाः ॥ अन्यैर्मत्स्यैः सह शल्ये शराग्रे ॥२२॥ ज्ञाताः सर्वेर्था येन सः ईश्वरोपि समर्थोपि सन्नन्यथा
कर्तुं नैच्छत ॥ किंचान्वमोदत ॥ यतः कालरूपी ॥२३॥ ॥२४॥ इति श्रीभावार्थदीपिकायां एकादशे प्रथमः ४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्वितीये निमिजायंतसंवादेनाह नारदः॥ धर्मान्भागवतानद्धा वसुदेवाय पृच्छते॥ अभीक्ष्णं कस्यापि नोपि भुक्तः शु
नर्वासीदित्यर्थः॥ ननु नारदस्य दक्षादिशापात्रैकत्र वासः संभवति इत्याशंक्याह॥ गोविंदभुजगुप्तायामिति न
तस्यां शापादेः प्रभाव इत्यर्थः॥ कृष्णोपासने लालसा उत्कंठा यस्य सः॥ यद्वा जनेषु कृष्णनामपौरुषमोत्कंठा ता
त्कोनु नाम न भजेदित्याह को न्विति॥ इंद्रियवानिति॥ इंद्रियवानिति इंद्रियवत्त्वमात्रमेव यच्चाधिकारि विशेष
णमित्यर्थः॥ सर्वतः सर्वेष्वपि लोकेषु मृत्युर्यस्य सः॥ २॥ यथा पित्रोर्यात्रा प्राणामनं कृपणानां स्वस्तये मंगला

श्रीशुकः॥ गोविंदभुजगुप्तायां द्वार्वत्यां कुरूद्वह॥ अवात्सीन्नारदोभीक्ष्णं कृष्णोपासनलालसः १
को नु राजन्निंद्रियवान्मुकुंदचरणांबुजं॥ न भजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः॥ २॥ तमेकदा तु देव म२
र्षिं वसुदेवो गृहागतं॥ अर्चितं सुखमासीनमभिवाद्येदमब्रवीत्॥ ३॥ वासुदेव उवाच॥ भग
वन्भवतो यात्रा स्वस्तये सर्वदेहिनां॥ कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्मनां॥ ४॥ भजंति
ये यथा देवान्देवा अपि तथैव तान्॥ छायेव कर्मसचिवाः साधवो दीनवत्सलाः॥ ६॥ ॥ ॥ श्राम
भूतानां देवचरितं दुःखाय च सुखाय च सुखायैव हि साधूनां त्वादृशामच्युतात्मनां मूलत्रुटि

य॥ यथा चोत्तमश्लोकस्य वर्त्म भूतानां महतां यात्रा कृपणानां स्वस्तये तथा भगवद्रूपस्य भवतो यात्रा सर्व
देहिनां स्वस्तये इति॥ ४॥ देवैश्चापि महतां तुल्यत्वं तत्रापि विशेषमाह॥ देवानां चरितं विभूत्यादिना भूतानां दुः
खाय सुखाय च भवति॥ त्वादृशानां तु यथा सुदृशां नाम्रयुत आत्मनाये हांतेषां किं च स्वच्छंद कुर्वंतोपि देवा भजतानुसारे
णाकुर्वंति न तथा साधव इत्याह भजंतीति छायेव॥ यथा पुरुषो यावत्करोति तावदेव तस्य छाया पि तथा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नदेवंयद्यपिभवत॥ आगमनमात्रेणैववयंकृतार्थाः॥ तथापिपृच्छामः॥ तत्रेतितत्वयेः धर्मैःप्रसन्नोभगवां
स्तानित्यर्थः॥ ७॥ ननुतत्रोपिकिमात्मोभगवत्सादियानमस्तितत्राह॥ अहंकिलेतिपुत्रविप्रजार्थोमुक्तिदं
पुत्रलाभप्रयोजनाः सन्नुपूजितवान्॥ किंत्वितिसूतीगृहेनवबद्धकेवचनेनमुक्तमत्वति॥ अतोपयथावयं
मुच्येमहितथानोस्मानशाधिशिक्षयेत्यर्थः॥ ९॥ विचित्राणिव्यसनानियस्मिन्तस्मात्संसारात्॥ तथावि

ब्रह्मंस्तथापिपृच्छामोधर्मान्भागवतांस्तव॥ यान्श्रुत्वाश्रद्धयामर्त्योमुच्यतेसर्वतोभयात॥ ७॥
अहंकिलपुरानंतंप्रजार्थोभुविमुक्तिदं॥ अपूजयंनमोक्षायमोहितोदेवमायया॥ ८॥ यथाविचि
त्रव्यसनाद्भवद्भिर्विश्वतोभयात॥ मुच्येमह्यंजसैवाद्धातथानःशाधिसुव्रत॥ ९॥ शुकोवाच॥ रा
जन्नेवंकृतप्रश्नोवसुदेवेनधीमता॥ प्रीतस्तमाहदेवर्षिर्हरेःसंस्मारितोगुणैः॥ १०॥ नारदोवा
च॥ सम्यगेतद्व्यवसितंभवतासात्वतर्षभ॥ यत्पृच्छसेभागवतान्धर्मांस्त्वंविश्वभावनान्॥ ११॥
श्रुतोनुपठितोध्यातआदृतोवानुमोदितः॥ सद्यःपुनातिसद्धर्मोदेवविश्वद्रुहोपिहि॥ १२॥

यतः सर्वतोभयंयस्मिन्भवद्भिर्हेतुभूतैः अंजसाअनायासेनअद्धासाक्षान्निश्चयेनच॥ हरेर्गुणैर्वर्णनीयत्वे
नप्रस्तैःप्रावृत्तैः हरिःसंस्मारितइत्यर्थः॥ १०॥ प्रीतिमाविष्कुर्वन्स्तौतिसम्यगितित्रिभिः पृच्छसेपृच्छसिविश्व
भावनान्सर्वपोषकान॥ ११॥ श्रुतःश्रावितःकेनानुगृहीतःअनुमोदितःपरैःक्रियमाणःस्तुतःसद्ध
र्मोभागवतोधर्मः देवद्रुहविश्वद्रुहोदेवेत्यर्थः॥ यद्वादेवेभ्योविश्वस्माद्द्रुह्यंतितेषामपि॥ १२॥ ॥ ॥ राम॥ ५

12

किंचतयामसमुपकारःकृतस्त्वाहंतवयेतिपुराणेश्रवणकीर्तनेयसमम ॥ ३ ॥ अत्रापिभगवद्धर्मनिर्णयेपिविप्राह
सातनकम ॥ ४ ॥ आर्षभानांसंवादंनिसानयांविविधमुकथयतिसमभिः प्रियव्रतइति ॥ ५ ॥ मोक्षधर्मविवक्षयामोक्ष
धर्माणांवक्तुमिच्छया ॥ स्वंतरणामेवतारःअवतीर्णंवासुदेवांशंमितिमाहुः तस्यचवेदपारसंस्तततनमासीत
तेषांऋषभसुतानांमध्येनवयोगेश्वराणांचरितंवक्तुंस्तत्वेषांचरितंततोविविच्याह ॥ तेषामितियततस्भजनाभि ।

तथापरमकल्याणः पुण्यश्रवणकीर्तनः ॥ स्मारितोभगवानद्यदेवोनारायणोमम ॥ १३ ॥ अत्राप्युदाहरंतीम
मितिहासंपुरातनं ॥ आर्षभाणांचसंवादंविदेहस्यमहात्मनः ॥ १४ ॥ प्रियव्रतोनामसुतोमनोःस्वायंभुवस्ययः
तस्याग्नीध्रस्ततोनाभिः ऋषभस्तत्सुतःस्मृतः ॥ १५ ॥ तमाहुर्वासुदेवांशंमोक्षधर्मविवक्षया ॥ अवतीर्णंसु
वे२४ तशतंतस्यासीद्ब्रह्मपारगं ॥ १६ ॥ तेषांतुभरतोज्येष्ठोनारायणपरायणः ॥ विख्यातंवर्षमेतद्यन्नाम्नाभा
गं२ रतमद्भुतं ॥ १७ ॥ सभुक्तभोगांत्यक्त्वेमांनिर्गतः तपसाहरिं ॥ उपासीनस्तत्पदवींलेभेवैजन्मभिस्त्रिभिः ॥ १८ ॥
तेषांनवनवद्वीपपतयोस्यसमंततः ॥ कर्मतंत्रप्रणेतारएकाशीतिर्द्विजातयः ॥ १९ ॥ नवाभवन्महाभा
गामुनयोह्यर्थशंसिनः ॥ श्रमणावातरशनाआत्मविद्याविशारदाः ॥ २० ॥

नामवर्षंयस्यनाम्नाभारतमितिख्यातं
विख्यातमासीत ॥ एतेनतस्यधर्मातिरेकोनिरूपितः ॥ १७ ॥ इमांपृथ्वींगृहादिनिर्गतः हरिमुपासीनःसन् ॥ १८ ॥ नवद्वी
ताः नवद्वीपपतयः ॥ नवानांब्रह्मावर्तादिभूखंडानांपतयः अस्यभारतवर्षस्यएकाशीतिः सुताःकर्ममार्गप्रव
र्तकाःब्राह्मणाअभूवन ॥ १९ ॥ अर्थशंसिनः परमार्थनिरूपकाः श्रमणाःश्रमवंतः आत्माभ्यासेकृतश्रमाइत्य
र्थः वातरशनाः दिगंबराः आत्मविद्यायांविशारदाः विद्वांसः ॥ २० ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री॰
भा॰ पु॰
ए॰ टी॰
८

तेषां पारमहंस्यचरितमाह द्वाभ्यां ॥ त एत इति भगवद्रूपं विश्वं सदसदात्मकं आत्मनो ऽव्यतिरेकेण पश्यंतो ॥ २
अव्याहतास्त्वप्रतिहता इष्टा अभिप्रेता गतयो येषां ते अव्याहतेष्टगतयः ॥ २ ॥ महात्मनो निमेर्वितायमाने अजना-
भनाभवर्षे ॥ ४ ॥ यजमानो निमिः अग्नयः आहवनीयादयः विप्रा ऋत्विगादयः ॥ २५ ॥ अभिप्रेत्य ज्ञात्वा ॥ ६ ॥ स्वरुचैव ॥

कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः आविर्होत्रोथ द्रुमिलश्चमसः करभाजनः ॥ २१ त एते भगवद्रूपं वि-
श्वं सदसदात्मकं ॥ आत्मनोव्यतिरेकेण पश्यंतो व्यचरन्महीं ॥ २२ ॥ अव्याहतेष्टगतयः सुरसिद्धसाध्यगंधर्वय-
क्षनरकिंनरनागलोकान् ॥ मुक्ताश्चरंति मुनिचारणभूतनाथविद्याधरद्विजगवां भुवनानि कामं ॥ २३ ॥ त
एकदा निमेः सत्रमुपजग्मुर्यदृच्छया ॥ वितायमानमृषिभिरजनाभे महात्मनः ॥ २४ ॥ तान्दृष्ट्वा सूर्यसं-
काशान्महाभागवतान्नृप ॥ यजमानोग्नयो विप्राः सर्व एवोपतस्थिरे ॥ २५ ॥ विदेहस्तानभिप्रेत्य नाराय-
णपरायणान् ॥ प्रीतः संपूजयां चक्रे आसनस्थान्यथार्हतः ॥ २६ ॥ तान्रोचमानान्स्वरुचा ब्रह्मपुत्रोपमा-
न्नव ॥ पप्रच्छ परमप्रीतः प्रश्रयावनतो नृप ॥ २७ ॥ विदेह उवाच ॥ मन्ये भगवतः साक्षात्पार्षदान्वो म-
धुद्विषः ॥ विष्णोर्भूतानि लोकानां पावनाय चरंति हि ॥ २८ ॥ ॥

चयातात ॥ नवाभव एतादृशप्रकाशैः ब्रह्मपु-
त्रोपमान् सनकादीन् सदृशानतः परमप्रेम्णा ॥ २७ ॥ तद्दर्शनमभिनंदति द्वाभ्यां मन्य इति ॥ ननु भगवतः पार्षदा-
नां कथमत्रागमनमित्यत आह विष्णोरिति ॥ विष्णुभक्ता लोकपावनार्थं सर्वत्र पर्यटंतीत्यर्थः ॥
॥ २८ ॥ ॥

२

मयादुर्लभं लब्धं महो भाग्यमित्याह दुर्लभ इति बहवो देहा भवंति येषां ते देहिनो जीवास्तेषां क्षणभंगुरोपि मानुषो देहो।
दुर्लभः परमपुरुषार्थसाधनत्वात् ॥ वैकुंठः प्रियो येषां वैकुंठस्य वा प्रियास्तेषां दर्शनं ॥२९॥ हे अनघाः निष्पापाः भवतः
पृच्छामो नात्यंतिकं क्षेमं पृच्छामः ॥ यतः क्षणार्धकालभवोपि सत्संगः शेवधिः निधिः निखिलार्थप्राप्त्या नंदो भवतीति।
यावत्परमानंदस्य स्पर्शः ॥३०॥ तदर्थं च भागवतान् धर्मान् ब्रूत यदि नोस्माकं श्रुतये श्रवणाय क्षमं योग्यं भवति क

दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः ॥ तत्रापि दुर्लभं मन्ये वैकुंठप्रियदर्शनं ॥२९॥ अत आत्यंतिकं क्षे
मं पृच्छामो भवतोनघाः ॥ संसारेस्मिन् क्षणार्धोपि सत्संगः शेवधिर्नृणां ॥३०॥ धर्मान्भागवतान्ब्रूत
यदि नः श्रुतये क्षमं ॥ यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ॥३१॥ श्री नारद उवाच ॥ एवं ते निमि
ना पृष्टा वसुदेव महत्तमाः ॥ प्रतिपूज्याब्रुवन्प्रीत्याससदस्यर्त्विजं नृपं ॥३२॥ ॥

थं भूतान् ॥ यैर्धर्मैः प्रपन्नाय भक्ताय अजो हरिः आत्मानमपि दास्यति तान् ॥३१॥ सह सदस्यैः ऋत्विग्भिश्च वर्तमानं तं नृपं
भगवद्धर्मश्रवणाय परां बभूवरिति मर्थः ॥ भगवद्धर्मतत्त्वज्ञा महाभागवतास्तं च श्रवणाच ॥ स्वलकर्मावतारे हा भक्ता प्राप्य
यक्रमान् ॥ तांस्तत्र मे प्राकृतं तत्र नव पृथक्त्वा श्रिमिर्नृप ॥ एकैकस्यां तं प्रोचुः कविमुख्या मुनीश्वराः ॥३२॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री॰ भा॰ग॰ ए॰टी॰

प्रथममात्यंतिकं तत्संकथयइति ॥ मन्यइति नकुतश्चिद्भयं यस्मात् तदकुतश्चिद्भयं ॥ अत्र संसारे असदात्मभावात् ॥ असति देहा
दावात्मभावनात् नित्यं सर्वदा उद्विग्नबुद्धेः विश्वात्मना सर्वथा निःशेषं यत्र पादाम्बुजोपासने भीर्निवर्तते तत् ॥ ३३ ॥ भाग
वतधर्मलक्षणमाह ॥ ये वै इति सर्वादिशब्देन वर्णाश्रमादिधर्मा उक्तानि रहस्यत्वात् तत्प्रवृत्तेनैव भगवता विदुषामपि
पुंसामञ्जः सुखेनैवात्मलब्धये ये वै उपायाः प्रोक्ताः तान् भागवतधर्मान् विद्धि ॥ ३४ ॥ अञ्जः पदेनोक्तं स्वकारत्वं विवृणोति

श्रीकविरुवाच ॥ मन्येऽकुतश्चिद्भयमच्युतस्य पादाम्बुजोपासनमत्र नित्यं ॥ उद्विग्नबुद्धेरसदात्मभावात् वि
श्वात्मना यत्र निवर्तते भीः ॥ ३३ ॥ ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये ॥ अञ्जः पुंसामविदुषां विद्धि भा
गवतान् हि तान् ॥ ३४ ॥ यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित् ॥ धावन्निमील्य वा नेत्रे न
स्खलेन्न पतेदिह ॥ ३५ ॥ ॥ ॥ ॥ ॥

यानिति यानास्थायाश्रित्य प्रमा
दिषु न प्रमाद्येत विघ्नैर्न विहन्येत ॥ किंच निमील्य वा नेत्रे धावन्नपि इह एषु भागवतधर्मेषु न स्खलेत् निमीलनं नामाज्ञा
नं यथाह श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्तिते ॥ एकेन विकलः काणो द्वाभ्यामन्धः प्रकीर्तित इति अज्ञान
प्रीत्यर्थः ॥ यथा पदन्यासस्थानमतिक्रम्य पादक्षेपणं तत् पदन्यासेन गतिर्धावनं तद्वदपि ॥ क्वचित् किंचिदतिक्रम
स्यापि पादक्षेपणं धावनं ॥ तथानुतिष्ठन्नपि तस्य तेन प्रत्यवायी स्यात् न चाप्यनयतेन फलात्प्रभ्रश्येत् ॥ ३५ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु के ते भागवता धर्माः ईश्वरार्पितानि सर्वकर्माण्यभिप्रेत्याह ॥ कायेनेति ॥ आत्मना चित्तेनाहंकारेण वा ॥ अनुसृतो यः स्वभावस्त
स्मात् अयमर्थः न केवलं विधितः कृतमेवेति नियमः स्वभावानुसारि लौकिकमपीति ॥ यथा भगवद्गीतासु यत्करोषि
यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति ॥ यद्वा ननु कायादीनामेव कर्मणां नश्वर
त्वाशंक्याह ॥ अथवा स्वेनानुसृजनं ॥ बालप्रमत्तादिस्वभावाद्यद्यत्करोतीत्यर्थः ॥ तत्सकलं परमेश्वराय नारायणा
येति समर्पयेत् ॥ तथा सति सकलमपि कर्म भागवतधर्मो भवतीति भावः ॥ ३६ ॥ ननु किमेवं परमेश्वरभजनेन नन्वज्ञानक
ल्पितं भयस्य ज्ञानैकनिवर्त्यत्वादित्याशंक्याह ॥ भयमिति यतो भयं तन्मायया भवेत् ॥ अतो बुधो बुद्धिमान् तमेवाभजेत्

नुसृतः[1] कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात् ॥ करोमि यद्यत्सकलं परस्मै नारायणायेति ।
समर्पयामि ॥ ३६ ॥ भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः ॥ तन्मायया अतो बुध आ
येतत्[2] भजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा ॥ ३७ ॥ ॥

। ननु भयं देहाभिनिवेशतो भवति स च देहोऽहंकारतः स च स्वरूपाप्रस्फुरणात् ॥ किं तत्र तस्य मायाकर्तृत्वमिति ॥ तत्राह ॥ ई
शादपेतस्येति ॥ ईश्वरविमुखस्य तन्मायया अस्मृतिः भगवतः स्वरूपाप्रस्फूर्तिः ॥ ततो विपर्ययो देहोऽस्मीति ततो द्वितीया
भिनिवेशाद्भयं भवति ॥ एवं हि प्रसिद्धं लौकिकेष्वपि मायायाः ॥ उक्तं च भगवता ॥ दैवी ह्येषा गुणमयी मम माया दुर
त्यया ॥ मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते इति ॥ एकया ॥ अव्यभिचारिण्या भक्त्या भजेत ॥ किं च गुरुदेवतात्मा गु
रुरेव देवता ईश्वर आत्मा प्रेष्ठश्च यस्य तथा दृष्टिः सन्नित्यर्थः ॥ ३७ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री· भा· ए· टी· ८

ननु विषयविक्षिप्तस्य कुतो ऽव्यभिचारिणी भक्तिः संभवति ॥ कुतस्तरामभयं तत्राह न तावद्विषया नाम वास्तवाः सन्ति किं तर्हि मनोविलासमात्रं ॥ अतो मनोनियमनेन भजनादभयं स्यादित्याह ॥ अविद्यमानो ऽपीति द्वयो द्वैतं ध्यातुः पुंसः धियामनसा स्वप्नमनोरथवदवभाति यथा ॥ तस्मात्कर्माणि संकल्पयति विकल्पयति च यत्मनः ॥ अनिरुध्यात् नियच्छेत ॥ तत एव भक्त्या भजनादभयं स्यादित्यर्थः ॥ ३८ ॥ एतदनंतानां साधकामिमानां साधकस्य सुगमं मार्गमाह शृण्वन्निति तदर्थकानि तज्जन्मानि कर्माणि च अर्थो येषां तानि ॥ एतान्यपि स्वयमेव कीर्तनमशक्तो नीत्या शंकयाह ॥ यान्विला ।

अविद्यमानो ऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा ॥ तत्कर्मसंकल्पविकल्पकं मनो बुधो निरुंध्यादभयं ततः स्यात ॥ ३८ ॥ शृण्वन्सुभद्राणि रथांगपाणेर्जन्मानि कर्माणि च यानि लोके ॥ गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसंगः ॥ ३९ ॥ एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ॥ हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥ ४० ॥

केगीतानि प्रसिद्धानि तानि शृण्वन् ॥ गायंश्च विचरेत ॥ असंगो निःस्पृहः ॥ ३९ ॥ एवं च भजतः संप्राप्तप्रेमलक्षणा भक्तिर्यो यस्य धर्मस्य साधर्मानीति तां गतिमाह ॥ एवमिति एवंव्रतं तद्व्रतं आचारो यस्य सः स्वप्रियस्य हरेर्नामकीर्तनेन जातो ऽनुरागः प्रेम यस्य सः ॥ अत एव द्रुतचित्तः सन्नुच्चैर्हसति कदाचिज्ज्यापराजितं भगवन्तं मासल्पकलयन् आश्चर्यं हसति ॥ एतावंतं कालमुपेक्षितो ऽस्मीति रोदिति ॥ प्राप्तोऽसि कथं यासीति क्रोशति हे हरे मामनुगृहाणेति प्रति हर्षेण गायति जितं जितमिति नृत्यति किंचिदाभिकव्वमस्तन्नातिप्रकाशयितुं न ॥ ८
उन्मादवत् ॥ गृहगृहीतवत् लोकबाह्यः ॥ विवशः ॥ ४० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किंच खं वियदिति सत्त्वानि भूतानि ग्रहाकाशादि यत्किंचिद्भूतमात्रं हरेः शरीरमिति मत्वा प्रणमेत् न संभवनायां लिङ् ॥४१॥ न
नु यमानन्दफलो भागवतानामपि वञ्चकत्वमित्युक्तं भवतीति कथं नाम कीर्तनमात्रेण कस्मिंश्चिज्जन्मनि भवेदित्याशंक्याह
सन्तमाह भक्तिरिति ॥ प्रपद्यमानस्य हरिं भजतः पुंसः भक्तिः प्रेमलक्षणा परेशानुभवः प्रेमास्पदभगवद्रूपस्फूर्तिः न
यानि वृत्तस्य नतो मत्तगृहादिषु विरक्तिरिसे त्रिकः एककालः भजनसमकालः एवं स्यात् यथाश्नतो भुञ्जानस्य तु
ष्टिः सुखं पुष्टिरुदरभरणं क्षुन्निवृत्तिश्च प्रतिग्रासं स्युः तद्वल्लक्षणमेतत् प्रतिसिक्थमपि यथा स्युः तद्वत् ॥ एवमेवाक

अनेक ४

खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन् ॥ सरित्समुद्रांश्च हरेः शरीरं यत्किंच भूतं प्र
णमेदनन्यः ॥४१॥ भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ॥ प्रपद्यमानस्य यथाश्नतः स्युः
स्तुष्टिः पुष्टिः क्षुदपायोऽनुघासं ॥४२॥ इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः ॥ भवन्ति वै भा
गवतस्य राजंस्ततः परां शान्तिमुपैति साक्षात् ॥४३॥ राजोवाच ॥ अथ भागवतं ब्रूत यद्धर्मो यादृशो नृ
णां ॥ यथाचरति यद्ब्रूते यैर्लिङ्गैर्भगवत्प्रियः ॥४४॥ ॥

स्मिन् भजने किंचित्प्रेमादि विवेकेनाथ मानेन वृत्त्याभिवृत्तं भजतः ॥ परमप्रेमादि जायते ॥ वक्ष्यमाणं भक्तिनिरूपणम उपसम
नस्मादि ॥४३॥ न तस्य भगवतस्य साधनं लक्षणार्थे भवतीत्याह ॥ इत्यच्युताङ्घ्रिमिति भागवतस्य भवन्तीत्युक्तेन सलक्षणा
णी इत्युक्ति ॥४२॥ अथेति यद्धर्मो यस्मिन्धर्मे यद्विनिष्ठितः यादृशः यत्स्वभावः ॥ यथाचरति वर्तते ब्रूते च यैर्लिङ्गैर्भगवतः प्रियो भवति ॥४४॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भाग॰ टी॰

यद्धर्म इत्यस्योत्तरमाह ॥ त्रयेण सर्वभूतेष्विति आत्मनः स्वस्य सर्वभूतेषु पुरुषभावेन सम्बन्धं यः पश्येत् तथा ब्रह्मरूपे आ
त्मन्यधिष्ठाने भूतानि च यः प्रपश्येत् तथा आत्मना तत्त्वाद्भगवत्त्वाद् आत्मद्विपस्मोहबुद्धिरिति तं वोक्तेः आत्मनो हरेः ॥ सर्वभूतेष्वा
मशकादिष्वपि इति यं तत्वेन वर्तमानस्य भगवद्भाव निरतिशयैश्वर्यमेव यः पश्यत् न ततस्यतार तम्यं तथात्मनि हरावे
व भूतानि च पश्येत ॥ कथं स्तेन भगवति स्थापनस्यैश्वर्यादिरूपेण तुष्ट न त्वंत्र मलिन भूतान्यपतेत्तु नाथादिष्वसत्त्वा
ऐश्वर्यादिप्रसूतिपश्येत ॥ स सर्वत्रैव विरुद्धं नभिमावव न तत्त्वपश्यन् भागवतोत्तम इत्यर्थः ॥ ४४ ॥ प्रेममैत्री च कृपा च उ

हरिरुवाच

नारद उवाच ॥ सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ॥ भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥ ४५
ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ॥ प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥ ४६ ॥ अर्चायामे
व हरये पूजां यः श्रद्धयेहते ॥ न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥ ४७ ॥ गृहीत्वापीन्द्रियैरर
र्थान्यो न द्वेष्टि न हृष्यति ॥ विष्णोर्मायामिदं पश्यन्स वै भागवतोत्तमः ॥ ४८ ॥ ॥

कांक्षति ।

पेक्षा च ताः ईश्वरादिषु चतसृषु यः करोति स मध्यमो भागवतः ॥ एवंभूतस्य भेददर्शनात् ॥ ४६ ॥ अर्चायां
प्रतिमायां पूजां समीहते करोति न तद्भक्तेषु अन्येषु च सत्कारं न करोति ॥ प्राकृतः प्रकृतिः प्रारंभः अधुनैव प्रारब्ध
भक्तिः शनैः शनैः उत्तमो भवतीत्यर्थः ॥ पुनरपि त्रिभिः श्लोकैः उत्तमभागवतस्यैव लक्षणमाह ॥ गृ
हीत्वापीति श्रीवासुदेवाविष्टचित्तो न गृह्णाति नाविदिंद्रियैर्यथा न गृहीत्वापि मपि प्राप्तार्थः इदं विश्व ॥ ४८

॥ ॥ राम ॥ ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किंच देहादीनां संसारधर्मैर्जन्माप्ययादिभिर्यो हरेः स्मृत्या ह्यविमुह्यमानः स भागवतप्रधानः ॥ तत्र देहस्य जन्माप्ययौ प्राणस्य तृट्पिपासे मनसो भयं बुद्धेस्तर्षः तृष्णा इंद्रियाणां कृच्छ्रं श्रमः ॥ ४९ ॥ न कामाश्च कर्माणि च बीजानि च वासनाः तेषां वासुदेव एको निलय आश्रयो यस्य सः ॥ एतेन गृहीत्वापीत्यादिश्लोकत्रयेणाद्वेषहर्षमाह ॥ कामादिरहितस्व नीतिर्यथा चरतीत्यस्योत्तरमुक्तं ॥ ५० ॥ यैर्लिंगैर्भगवत्प्रिय इत्यस्योत्तरमाह ॥ न यस्येति जन्म सत्कुले कर्म तपआदि जातयश्चानुलोमप्रतिलोमजाः मूर्धावसिक्तादयः अस्मिन्देहे अहंकाररहितैः सत्कुलकर्मादिलिंगैर्हरेः प्रियो भ

देहेंद्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ॥ संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः ॥ ४९ ॥ न कामकर्मबीजानां यस्य चेतसि संभवः ॥ वासुदेवैकनिलयः स वै भागवतोत्तमः ॥ ५० ॥ न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः ॥ सज्जतेस्मिन्नहंभावो देहे वै स हरेः प्रियः ॥ ५१ ॥ न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा ॥ सर्वभूतहितः शांतः स वै भागवतोत्तमः ॥ ५२ ॥ त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् ॥ न चलति भगवत्पदारविंदाल्लवनिमिषार्धमपि स वैष्णवाग्र्यः ॥ ५३ ॥

समः

वतोमर्थः ॥ ५१ ॥ वित्तेषु स्वीयपरकीयमिति ॥ आत्मनि स्वः पर इति ॥ ५२ ॥ त्रिभुवनविभवहेतवेपि त्रैलोक्यराज्यार्थमपि भगवत्पदारविंदभजनाद्यो न चलति स वैष्णवाग्र्यः ॥ ननु लवार्धमपि भजनोपरमे चेत्तावाँल्लाभो भवेत्तत्त्यक्तेमपि चलेत् ॥ तत्राह ॥ अकुंठस्मृतिः भगवत्पदतो यस्मात्परं नास्तीत्यवेक्ष्य अकुंठा अनपगता स्मृतिर्यस्य सः भगवत्पदारविंदादन्यत्सारं नास्तीति कुतः अत आह ॥ अजिते हरावेवात्मा येषां तथाभूतैः सुरादिभिरपि दुर्लभात् किं तु केवलं विमृग्यात् ॥ तदयैतया सर्वस्यात्कृते स्मरन्न चलतीत्यर्थः ॥ ५३ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भाग. टी. १०

अपिचविषयाभिसंबंधिनावलनंकामेनाभिसंतापेसतिभवेत॥ सचकामोभगवत्सेवयानिवृत्तोभवतीत्याह भग
वतइति॥ उरुक्रमोचनावेन्नीचलतयोः शाखाअंगुलयः तासांनखानिमण्यएवमणयः॥ तेषांचंद्रिकाशीतलादीप्तिः
तयानिरस्तः कामादितापोयस्मिन्हृतस्मिन्नुपसीदतांभजतांहृदिकथंपुनःसंतापःप्रभवतिचंद्रउदितेसतिअग्र
केस्यतापइवनयस्यस्वःपरद्रव्यादिनाशाकजयेणयाद्गुशइमस्मोत्तर्वबच्छंकेवेदिनवं॥ यद्वातेरमस्यचहविनीमा
नीतिज्ञातवं॥ ५४॥ उक्तंरामसत्तमाभागवतलक्षणमाह॥ विसृजतीतिहृदिवेवंसर्वयंसाज्ञातनयस्यहृदयंनवि।

भगवतउरुविक्रमांघ्रिशाखानखमणिचंद्रिकयानिरस्ततापे॥ हृदिकथमुपसीदतांपुनःसप्रभव
तिचंद्रइवोदितेर्कतापः॥ ५४॥ विसृजतिहृदयंनयस्यसाक्षाद्धरिरवशाभिहितोप्यघौघनाशः॥ प्रण
यरसनयाधृतांघ्रिपद्मः सभवतिभागवतप्रधानउक्तः॥ ५५॥ इतिश्रीभागवतेएकादशस्कंधेद्वि
तीयोध्यायः॥ २॥ राजोवाच॥ परस्यविष्णोरीशस्यमायिनामपिमोहिनीं॥ मायांवेदितुमिच्छामोभग
वंतोब्रुवंतुनः १॥

सृजतिनमुंचतिनमुंचतिकथंभूतः अवशेनाप्यभिहितनामापिअघौघंनाशयतियः॥ सतत्किंनविसृजतियतः
प्रणयरशनयाधृतेहृदयेनबद्धमंघ्रिपद्मंयस्यसभागवतप्रधानउक्तोभवति॥ ५५॥ इतिश्रीभावार्थदीपिकायां
एकादशेद्वितीयः॥ २॥ माययालक्षणंब्रह्मकर्मप्रश्नचतुष्टये॥ तृतीयेतत्रवैदत्तमार्षभैःमुनिभिःपृथक॥ विष्णो
र्मायामिदंपश्यन्नित्युक्तंअतोमायांपृच्छतिपरस्येतिहेभगवंतः॥ १॥ रामायनमः॥ राम॥ १०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु कलत्राणि भागवतो भूत्वा कृतार्थः स्यात् किं बहुप्रश्नैः अत आह नान्यत्पश्यतीति ॥ संसारतापैर्नितरां तप्तो हंत सतता
पस्य भेषजं हरिकथामृतं तद्रूपं यमुष्माद्धर्योऽजर्षमानो नान्यत्पश्यामि ॥ मायाया स्वरूपतो निरूपणं संभवति ॥ ५ ॥ सृष्ट्या
दि कार्यद्वारेण निरूपयितुमाह ॥ एभिरिति ॥ आद्यः पुरुषः यथाशक्त्या भूतानामात्मकारणभूतः एभिः स्वसृष्टै
र्महाभूतैरुच्चावचानि भूतानि ससर्ज ॥ एषा माया भगवत इति चरमश्लोकपादस्यार्थ इति श्लोकसंगतिः । गुणाः किमर्थं स
सर्ज स्वमात्रात्मप्रसिद्धये स्वस्मिन्मीतेऽप्रमितेय: व्याप्तः स: स्वमानानत्साततो जीवस्य स्वरूपप्राप्त्यै सिद्धये ॥ यद्वा

नान्यत्पश्येज्जुषमुष्माद्धर्योहरिकथामृतं ॥ संसारतापनिस्तप्तो मर्त्यस्तत्तापभेषजं ॥ १ ॥ श्रीनारद उवाच ॥
एभिर्भूतानि भूतात्मा महाभूतैर्महीपते ॥ ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये ॥ २ ॥ एवं सृष्टा
नि भूतानि प्रविष्टः पंचधातुभिः ॥ एकधा दशधात्मानं विभजन्जुषते गुणान् ॥ ३ ॥ गुणैर्गुणान्स भुंजा
न आत्मप्रद्योतितैः प्रभुः ॥ मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥ ४ ॥

र्थं धाभूतानां जीवानां मात्राप्रसिद्धये विषयभोगाय आत्मप्रसिद्धये मोक्षाय चेत्यर्थः ॥ तदुक्तं वेदस्तुतौ ॥ बुद्धीन्द्रिय
मनःप्राणान् जनानामसृजत्प्रभुः ॥ मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय चेति ॥ २ ॥ एवं जीवोपकरणार्थं पंच
धातुभिर्महाभूतैः ॥ सृष्टानि भूतान्यन्तर्यामिरूपेण प्रविष्टः एकधा मनसा दशधा प्राणाद्यैरिन्द्रियरूपेण ॥ आत्मानं अन्त
र्गुणानन्तर्बहिर्विषयान् जुषते जीवयन्तोऽस्य ॥ यद्वा नन्वात्मानं प्रतिगुणान् विभजन्जुषते प्रीयते इत्यस्यार्थः

23

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भाग टी ॥

सर्वजीवस्यात्मनां तयोस्मिंस्तांप्रयुक्तोतितेजोविविधैर्योगैणान् विषयान् भुंजान इदं देहस्थं शरीरस्मात्मानं समानः स इह शरीरादीन्संजते ॥ ५ ॥ कर्मभिः कुर्वद्भिर्ये स्वसनिमित्तानि सर्वाससनानि कर्माणि ऊर्वैर्न स्वखेन स स्व स्व दुःखात्मके कर्म फले ॥ ६ ॥ वहूनयमदाणीवहैतोनिनयाता ॥ सर्वप्रिलयोऽसन्निमवणो ॥ ७ ॥ ग्रोतनामहाभूतां नास्तुपसुवेनाग्राहे

कर्माणि कर्मभिः ऊर्वन्ति मित्तानि देहभृत ॥ तत्तत्कर्मफलं गृह्णन्भ्रमतेह सुखेतरं ॥ ८ ॥ इत्थं कर्मगतीर्गच्छन्वहूभद्रवहाऽप्रमानः ॥ आभूतसंप्लवात्सर्गप्रलयावश्नुतेऽवशः ॥ ९ ॥ यानूपसुवश्रासन्नेष्मकेद्रव्यगुणात्मकं ॥ अनादिनिधनः कालो स्ववक्रा याय कर्षति ॥ १० ॥ शतं वर्षा स्यनावृष्टिर्भविष्यत्युल्वणाभुवि ॥ तत्कालोपचितोष्णार्को लोकांस्त्रीस्त्रपि घाति ॥ ११ ॥ पातालतलमारभ्यसंकर्षणमुखानलः ॥ दहन्नूर्ध्वशिखो विष्वक्वर्धतेवायुनेरितः ॥ १२ ॥ संवर्तको मेघगणो वर्षति स्म शतं समाः ॥ धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ॥ १३ ॥

ताहे तो वा सन्नेष्मकं कार्यं द्रव्यं स्थूलं गुणाः सत्त्वं तदात्मकं स्वव्यक्तायअव्यक्तं प्रति नेतुमाकर्षति ॥ ८ ॥ नाशाहेवनाहधातवर्षाणि तस्मिन्कालोऽपचितथा सोऽस्मस्थासावर्क स्वयं तेन कालेनोपचितमुस्तवं यस्य सः ॥ ९ ॥ ऊर्ध्वशिखऊर्ध्वज्वालः विष्वक्षपरितः ॥ १० ॥ संवर्तकः प्रलयकर्तारा धाराभिर्जलौहैर्दृभिः हस्तिहस्ताभिः तत्सम्मा

णाभिः ॥ ११ ॥ १२ ॥ वा मत्वा ॥

24

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ततः पार्थिवत्वाद्वैराजपुरुषो वैकारिकं कारणं न विशति॥ ननु ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः
प्रविशंति परं पदमिति स्मृतेर्यावदधिकारमवस्थितिर्दर्शिता कारणमिति मायायाश्च वैराजशरीरे भियेय स्वतः ब्रह्म
णः परमभागवतत्वात्मोक्षो तदेव स्वार्थ्येत नास्य पार्थिवकारणमात्रप्रवेशः सत्वं ब्रह्म मे यादि नासत्वलोकं
मतानामप्यभक्तानां मोक्षतिद्धस्ववर्णादभक्ते ब्रह्मणोपि प्रकृतौ लयपर्यन्तं गुणस्थितिर्मोक्षदोलम्य सूचनाये
वभक्तमिमविवोयः यद्वा केनापि प्रमाणेन न व्यक्तं ब्रह्मैव च तन्नस्वेवेन च मोक्ष एवाक्त इति द्रष्टव्यं॥ ४॥ एवं वि
राजो लयमुक्त्वा तत्कारणानां महदादीनां पृथिव्यन्तानां प्रातिलोम्येन लयमाह॥ वायुनेति वायोर्हि गंधरसहारि

ततो विराजमुत्सृज्य वैराजः पुरुषो नृप॥ अव्यक्तं विशते सूक्ष्मं निरिंधन इवानलः॥ ३॥ वायुना हृतगंधा भूः
सलिलत्वाय कल्पते॥ सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते॥ ३॥ हृतरूपं तु तमसा वायौ ज्योतिः प्र। हृतपं
लीयते॥ हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते॥ ४॥ कालात्मना हृतगुणं नभ आत्मनि लीयते
इंद्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप॥ ५॥ प्रविशंति ह्यहंकारं स्वगुणैरहमात्मनि॥ ६॥

तं प्रसिद्धं संवर्तकेन वायुना हृतगंधा॥ अतएव गंधस्य वावर्तकस्यगतत्वात्सलिलत्वाय कल्पते सलिले लीय
तद्रूपर्थः॥ तद्धृतरसं तेन वायुनेव हृतो रसो यस्य तत्॥ ३॥ तमसा च रूपविरसकाविति प्रसिद्धं संवर्तके न तमसा।
अवकाशेन आकाशेन स्वकारणेन॥ ४॥ कालात्मना नाशहेतुस्य हि कालत्वन एव नाशः प्रसिद्धः तद्रूपेणात्मनाऽहंका
रेण आत्मनि तामसाहंकारे इंद्रियाणि बुद्धिश्च राजसाहंकारे मनो वैकारिकैर्देवैः सह सात्विकाहंकारे एवं वि
विधैः स्वगुणैः स्वकार्यैः सहितः अहंकारः आत्मनि महति सत्यं प्रकृतौ विलीन इति द्रष्टव्यं॥ ५॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्रिवर्णा त्रिगुणा मायासु अवर्णिता भीतं राजानं त्रिगुणमयेन वाचकस्य वाचोकः छन्दयति किं भूय इति ॥ १६ ॥ एवमनुकंपितः त
त्रिगुणमुपायमेव पृच्छति ॥ यथैतामिति ॥ यथा येन उपायेनात्मानो वुध आत्मजेतरन्तीति ॥ भक्तिमन्तरेण तत्वदेकैवत या अपि किं
भक्तिरेव उपायो यिवा तत्रोपायो स्तीति तान्हं पुनः प्रश्नः अकृतात्मभिः अवशीकृतान्तः करणैः स्थूलधियः स्थले शरीरे
देवं अहं धीर्येषां ते भक्तिविनिर्रके एगाना स्वयं सउपायइति ॥ ⁓ ॥ अभिप्रेत भक्तिमेव स सायनं निरूपयति तत्र प्रथमं
वैराग्यहावात नृपतस्त्रिभिः त्रिभिः कर्माणीति ॥ दुःख · · पेतुः खत्पनीकारायपाकविपर्यासं फलवैपरीत्यं

स्क०

एषा माया भगवतः सर्गस्थित्यन्तकारिणी ॥ त्रिवर्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छसि ॥ १६ ॥ राजोवा
च ॥ यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः ॥ तरन्त्यंजः स्थूलधियो महर्ष इदमुच्यतां ॥ १७ ॥ प्रबुद्ध उवाच
कर्माण्यारभमाणानां दुःखहत्यै सुखाय च ॥ पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणां ॥ १८ ॥ नित्या
र्तिदेन वित्तेन दुर्लभेनात्ममृत्युना ॥ गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ॥ १९ ॥ एवं लोकं परं वि
द्यान्नश्वरं कर्मनिर्मितं ॥ सतुल्यातिशयध्वंसं यथा मंडलवर्तिनां ॥ २० ॥

मिथुनीभूय प्रवर्तमानानां ॥ १८ ॥ कर्मभिः साधिताः अपि वित्तादयो न सुखहेतव इति च पश्येदित्याह ॥ १९ ॥ ए
वं लोकं परमिति कर्मविनिर्मितत्वान्नश्वरं ॥ तथा च श्रुतिः तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्य
जितो लोकः क्षीयत इति किंच वर्तमानसमयेपि दुःखसुखमेव पश्येदित्याह ॥ सतुल्यातिशयध्वंसं सह तुल्येनाति
शयेन ध्वंसेन च वर्तमानं तत्र तुल्यैः स्पर्धा अतिशयैः असूया भ्रंशमालोचनभयादिकं चापरिहार्यमित्यर्थः यथा
खंडमंडलपतीनां मिथः स्पर्धादि न हतं ॥ २० ॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उत्तमं श्रेयो ज्ञातुमिच्छुः ॥ शाब्दे ब्रह्मणि वेदाख्ये न्यायतो निष्णातं तत्त्वज्ञं ॥ अन्यथा संशयनिरासकत्वायो-
गात् ॥ परे च ब्रह्मणि अपरोक्षानुभवेन निष्णातं ॥ अन्यथा सर्वबोधसंचारायोगात् ॥ परब्रह्मनिष्णातत्वद्योतक-
माह उपशमाश्रयमिति ॥२१॥ गुरुरेवात्मा दैवतं च यस्य सः अमायया अनुवृत्त्या सेवया यैर्धर्मैः तुष्येत्तत्र आत्मप्रदः स्वा-
त्मसकामाय यथा बलिप्रभृतीनां ॥२२॥ यथोक्तविनिमित्तमसंगं मनसि वर्ज्य मत्प्रसंगं च यथा हितो हेतुरयं ॥२३॥ शौचं बा-
ह्यं मृज्जलादिभिः आभ्यंतरं रागादित्यागादिभिः शिक्षेत ॥ तपः स्वधर्माचरणं तितिक्षा द्वन्द्वसहनं मौनं वृथावाचा-

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं ॥ शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयं ॥२१॥ तत्र भागव-
ग तान्धर्मान्शिक्षेद्गुर्वात्मदैवतः ॥ अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥२२॥ सर्वतो मनसोऽसं-
गमादौ संगं च साधुषु ॥ दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितं ॥२३॥ शौचं तपस्तितिक्षां च मौ-
नं स्वाध्यायमार्जवं ॥ ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसंज्ञयोः ॥२४॥ सर्वत्रात्मेश्वरान्वीक्षां कैवल्य-
मनिकेततां ॥ विविक्तचीरवसनं सन्तोषं येन केनचित् ॥२५॥

व॥

नुच्चारणं स्वाध्यायमधिकारानुरूपं वेदपाठादिकं ॥ आर्जवं अवक्रतां ब्रह्मचर्यं यथाश्रमोचितं ब्रह्मचर्यादिकं उचितेन ऋतुगमनं सदा-
चारनियमादि अहिंसा भूतेष्वद्रोहं द्वन्द्वसंज्ञयोः शीतोष्णसुखदुःखमानापमानादिरूपयोः समत्वं हर्षविषादराहित्यं ॥
आत्मेश्वरान्वीक्षा सर्वत्र इष्टरूपेणात्मनः अवलोकनं ईश्वररूपेण चावलोकनं कैवल्यं एकान्तशीलत्वं अनिकेततां
गृहाद्यभिमानराहित्यं विविक्तचीरवसनं पवित्रं वल्कलवसनं शुद्धं वा वल्कलं वा परिधानं २५

भागवते भगवत्स्मृतिपादके॥ अन्यत्र शास्त्रादौ यथा अनिंदामन्यत्र मतशास्त्राणामपि॥ वाचो मौनेन कर्मणो नी-
हया देहे मनसश्च प्राणायामादिना॥ शमदमाविति बाह्याभ्यंतरेन्द्रियनिग्रहौ॥२६॥ हरेर्जन्मकर्मगुणानां श्रवणादि तद-
र्थं हरये देशं सर्वं कर्म विशेषमस्य यज्ञादिकं तत्तदर्थं चेष्टितं॥२७॥ इष्टं दत्तं जपितं तथा यद्वा भावितं इष्टः वृत्तं सदाचारः
आत्मनः प्रियं गंधपुष्पादि दारादीनपि आत्मन्यपि परस्मै परमेश्वराय निवेदनं सर्वकर्तव्यं समर्पणीयं तेन शिक्षेत
२८॥ कृष्ण एव आत्मा नाथश्च येषां तेषु कृष्णात्मनाथेषु मनुष्येषु च सौहृदं उभयत्र स्थावरजंगमेषु चर्यां नादि

श्रद्धां भागवते शास्त्रे निंदामन्यत्र चापि हि॥ मनोवाक्कर्मदंडं च सत्यं शमदमावपि॥२६॥ श्रवणं की-
र्तनं ध्यानं हरेरद्भुतकर्मणः॥ जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितं॥२७॥ इष्टं दत्तं तपो जप्तं वृ-
त्तं यच्चात्मनः प्रियं॥ दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनं॥२८॥ एवं कृष्णात्मनाथेषु मनु-
ष्येषु च सौहृदं॥ परिचर्यां चोभयत्र महत्सु नृषु साधुषु॥२९॥ परस्परानुकथनं पावनं भगवद्यशः॥ मि-
थो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः॥३०॥ स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिं॥ भक्त्या सं-
जातया भक्त्या बिभ्रत्युत्पुलकां तनुं॥३१॥ ३० चौपट

शो वैष्णवेषु ततो महत्सु ततश्चापि साधुषु स्वधर्मशीलेषु॥ ततोऽपि महत्तरेषु श्रीभागवतेषु तेषु स्मरणं संगमस्य परस्परं पावनं भगवद्य-
शः॥ तस्य परस्परानुकथनं शिक्षेत॥ यद्वा यथाः प्रतिनिवृत्तिसंस्पर्शादिदोषादिना मिथो चारति॥ रमंते याव
तुष्टिः यतत्व सुखेषांचु निवृत्तिः सम मस्तु दुःखनिवृत्ति॥ तां च शिक्षेत॥३०॥ एवं वृत्तमानानां परमानंदप्राप्ति-
माह॥ स्मरंत इति द्वयेन भक्त्या साधनभूतया संजातया॥ प्रेमलक्षणया भक्त्या यल्लक्षणं तत्तु पुलककरोद्-
नमितिचेदितनन्म॥३१॥ ॥३०॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गृणंति अजं हृदि अनुशीलयंति तल्लीलामभिनयंति॥ परं परमेश्वरं प्राप्य निर्वृताः संतः तूष्णीं भवंति ३२॥ उपसंहरति
इतीति भागवतान् धर्मान् तत्र या भक्तिस्तया नारायणपरो मायामतितरति सुखेन भवति॥ ३३॥ नारायणाभिधानस्येति द्वि
तीयस्य स्वरूपं पृच्छति नारायणः इति भगवानिति परमात्मेति चोच्यते तत्र केवलं वदंति तत्त्वविदस्तत्त्वं
यज्ज्ञानमद्वयं ब्रह्मेति परमात्मेति भगवानिति शब्द्यते तस्य नारायणस्य भगवतो न हि विषमा हि से गृही॥
नमायागुणाः सर्वाह्यवगुणाः स्वतस्त्यादिषु॥ ३४॥ ननु च किमेभिः शब्दैर्निर्विशेषं नेस्वव स्तूच्यते प्रसिं

सं

क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौकिकाः नृत्यंति गायंत्यनुशीलयंत्यजं
भवंति तूष्णीं परमेत्य निर्वृताः॥ ३२॥ इति भागवतान्धर्मान् शिक्षन्भक्त्या तदुत्थया॥ नारायणप
रो मायामंजस्तरति दुस्तरां॥ ३३॥ राजोवाच॥ नारायणाभिधानस्य ब्रह्मणः परमात्मनः निष्ठा
मर्हथ नो वक्तुं॥ यूयं हि ब्रह्मवित्तमाः॥ ३४॥ श्रीपिप्पलायन उवाच॥ स्थित्युद्भवप्रलयहेतुरहेतुरस्य
यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च॥ देहेंद्रियासुहृदयानि चरंति येन संजीवितानि तदवेहि प
रं नरेंद्र॥ ३५॥ ॥

वाकोपि विशेषणाशंकेति यत्रोस्य स्थित्युद्भवं स्वीकृत्य सर्ग॥ स्वप्नादिष्वपि स्थित्युद्भवप्रलयानां हेतुः स्वयं च
अहेतुः हेतुरहितः सन्नारायणमात्रं तत्परमेव तत्त्वमवेहि॥ तत्र स्वप्नजागरसुषुप्तिषु सत्॥ अनुवर्तमान
पत्वेन स्वप्नजागरीयं त्रिषु सत्तनमिति॥ बहिश्च समाधावपि स्वर्ग्ये वर्तमानेन तत्त्वमस्मीति निर्दिशणा ब्रह्मगह
नमित्यर्थः तस्मात्परमेव तत्त्वमवेहि॥ देहेंद्रियप्राणानमि ये च जीवितानि सति चरंति प्रवर्तते तं तत्प
रमात्मेति परमेव तत्त्वमवेहि॥ एवं त्वनारायण एव ब्रह्मणाभादिनामभिः उच्यमानमपि परमेकमेव तत्त्वजा।

श्री
भाष
टी
१४

अथ वेद्ही मनेन विषयत्वेनाप्राप्तं विधेयति नैव वेत्तीति ॥ एतन्न मन्यते तं मनो निविशति नैव विषयीकरोतीति वा गुणवागपि
वस्तु यात्मा बुद्धिः प्राणास्म क्रियया शक्यानप्राप्नोति ॥ प्रमाणितै वेद्हीयाणि गृह्णाणानन्तः स्तुः तेषा भूताप्रविवे
विस्फुलिंगादयः न प्रकाशयति न दहतीति च तथा न उ मनन आद्दिवृति वृभिय्य मन न स्यात्म प्रकाशाम्य स्य स
ततन्न लिप्रकाशकस्य न ततम्य काशो विषयते य आदीयः प्राप्ता स्यो प्राप्तो उत न वन्त्व प्रपस्तरु ष्प्रातं मतं स्या
न्मनसो यः मनो विदुरति तथा यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥ नत्वं न वेद्मीति तत्पुरुषं पृच्छमिति
श्रुतेः शब्दगोचरत्वप्रतीयते नत्वात्र ॥ शब्दोऽपीति शब्दोऽपि आत्ममूलं अल्लमिति निषमात्मा मतं ॥ अप्यौक्तप्रयां शुते

नैनं मनो विशति वाग् न चक्षुर् वात्माप्राणो इन्द्रियाणि च यथाः कल
मर्थि प्रः स्याः ॥ शास्त्रोऽपि बोधकं निषेधनत्वात्म मूलमर्थ्यां कस्माद्वपद
नैन निषेधसिद्धिः ॥ १ ॥ ॥ ४ ॥

पृथाभवति न प्रादन साहात ॥ अनः बोधकं निषेधनत्वात्म स्यैव बोधकस्य निषेधनूपत्वात ॥ यतो वाचो निर्व
र्तन्ते अप्राप्य मनसा सह ॥ यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि ॥ यन्मनो न मनुते न च दृत्वा
प पश्यति कस्यैनेन मिस्याद्विस्फुलिनः ननु तर्हि नैवाह ॥ स्फुतितं किमर्थ मुच्यते अप्यौक्तमाद्दे तत्रा इयद न इति
प्रणा न प्रादेशो नेति नेति अस्थूलमनण्व यतो वाचा निवर्तन्ते यद्वाचा नभ्युदितमित्यादि निषेधस्य यदवधि
भूतं ब्रह्म तेन विना सिद्धिर्नीति सर्वस्य निषेधस्य मावधिनात ॥ २९ ॥

१४

नतु तर्हि प्रमाणविषयमात्रास्तीवस्येति प्रसज्यते॥ अत आह सदिति॥ सत् स्थूलं कार्यं असत् सूक्ष्मं कारणं तदु
भयं ब्रह्मैव भाति कुतः यद्यस्मात्॥ तयोः सदसतोः परं कारणं तत्तु कथमेकं बहुविषयस्य कारणं॥ तत्राह उरुक्रियस्य नैकश
क्तिमत्॥ उरुर्महती मायालक्षणा शक्तिर्यस्य तदिति वा उरुया मानमेव दर्शयति॥ अदो यदेकं ब्रह्म तदेव सर्वं रज

रूप२

सर्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति
प्रवदन्ति जीवं॥ ज्ञानक्रियार्थफलरूपतयोरुशक्तिः ब्र
ह्मैव भाति सदसच्च तयोः परं यत्॥ ४०॥ ॥ रामस्तो

स्तम इति त्रिवृत्सत्त्वरजस्तमोमयं प्रवदन्ति हि ततः क्रियाज्ञानाभ्यां महानिति तदेव प्रवदन्ति तत्र अहमिति जीवं जीवोपाधि।
महद्कार्यत्वं तदेव प्रवदन्ति तत्र ज्ञानक्रियार्थफलरूपतया॥ ज्ञानशक्तेः देवताः क्रिया इन्द्रियाणि अर्था विष॥
याः॥ फलं तत्प्रकाशः सुखादि वा तद्रूपतया ब्रह्मैव भाति॥ न हि सर्वस्वरूपेण स्वतो भासमानस्य ब्रह्मणः स्ववै
लक्षण्यापेक्षेति भावः॥ ४०॥ ॥ ॥ राम॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री· भाग· टी· १५

ननु सर्वात्मकं चेद्ब्रह्म तर्हि सर्वस्य कार्यस्य जन्मादिविकारवत्त्वाद्ब्रह्मणोपि तत्प्रसंगः स्यात् तत्राह आत्मेति आ
त्मा ब्रह्म न जजान न जातः जन्माभावादेव तदनंतरभाविनां अस्तित्वलक्षणोपि विकारो नास्ति नैधते न वर्धते ॥ क्षयाभावादेव
विपरिणामोपि निरस्तः कुतः हि यस्मात् व्यभिचारिणां आगमापायिनां बाल्ययुवादिदेहानां सवनवित् तत्तत्का
लद्रष्टा न त्ववस्थावतो द्रष्टा न तदवस्थो भवतीत्यर्थः ॥ निरवस्थाकोऽसावात्मा अत आह उपलब्धिमात्रमिति

नात्मा जजान न मरिष्यति नैधतेसौ न क्षीयते सवनवि
द्व्यभिचारिणां हि ॥ सर्वत्र शश्वदनपाय्युपलब्धिमात्रं ।
प्राणो यथेंद्रियबलेन विकल्पितं सत् ॥ ३८ ॥ राम

नन्वायातं क्षणिकत्वं तेनाह ॥ सर्वत्रेति सर्वत्र देशेषु शश्वत् सर्वदा अनपायिस्वरूपो वर्तमानं ॥ ननु नीलज्ञानं
जातं पीतज्ञानं नष्टमिति प्रतीतेर्ज्ञानस्यानपायित्वं ॥ अत आह इंद्रियबलेनेति ॥ सर्वदेव ज्ञानं इंद्रियबलेन
विविधं कल्पितं ॥ नीलाद्याकाराहृत्वय एव जायते नश्यति च न ज्ञानमिति भावः व्यभिचारिष्वव्यभिचारे दृ
ष्टांतः प्राणो यथेति ॥ ३८ ॥ ॥ ८ ॥ राम ॥ ८ ॥ ८ ॥

१५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पेशिषु जरायुजेषु तरुषु उद्भिज्जेषु अविनिश्चितेषु स्वेदजेषु उपधावति॥ अनुवर्तते एवं दृष्टान्ते निर्विकारित्वं प्रदर्श्य दार्ष्टान्तिके पि दर्शयति॥ कथं तर्हि देवात्मा अविकारेण प्रतीयते यदा जाग्रति इंद्रियगणाः यदा च स्वप्ने तत्संस्कारवानहंकारः॥ यदा च सुषुप्ते तदा अस्मिन् सुषुप्ते इंद्रियगणे सन्ने लीने अहमि वा अहंकारे च प्रसुप्ते कूटस्थो निर्विकार एव ज्ञातव्य आशयमृते लिंगशरीरं प्राप्तिं विना विकारहेतो रूपादेरभावादित्यर्थः॥ ननु अहंकारपर्यन्तस्य सर्वस्य लये शून्यमेवावशिष्यते तत्र को वेदा कूटस्थ आत्मा अस्तीत्यत आह॥ तदनुस्मृतितः तस्य विशेषज्ञानदर्शनस्पर्शनादिशून्यस्य सुखात्मनः सुषुप्तसाक्षिणः स्मृतिर्नोऽस्माकं भवति॥ एतावन्तं कालं सुखमहमस्वाप्सं न किंचित्॥ अवेदिषमिति स्मृतेर्नत्र

अंडेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र॥ सन्ने यदिंद्रियगणेऽह-
मि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः॥ ३९॥ यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोम-
लानि विधमेद्गुणकर्मजानि॥ तस्मिन्विशुद्ध उपलभ्यत आत्मतत्त्वं साक्षाद्यथामलदृशोः सवितृप्रका-
शः॥ ४०॥

भूतस्यास्मरणादस्यैव सुषुप्तसाक्षिण आत्मानुभवः विषयसंबंधाभावात्तस्य इति भावः॥ तथा च श्रुतिः न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इति ननु च यदि सुषुप्तौ कूटस्थात्मानुभवेत् कथं पुनरपि संसारः ``` अविद्यासंस्काराणां विद्यमानत्वादिति चेत्तदा तर्हि तन्निवर्तकोऽनुभवो भवेत्॥ ३९॥ वितैषणा॥ दिविहाय केवलमब्जनाभस्यैव चरणयोर्या उरुभक्तिस्तया पुमान् चेतसो मलानि तया भक्त्या क्षालयेत्॥ तदा तस्मिन्॥ विशुद्धे चेतसि सति साक्षादेव यथा नेत्रात्मतत्त्वमुपलभ्येत अमलयोर्दृशोः सूर्यस्य यथा सूर्यमेव सवितृप्रकाशः इति भक्तेः कर्मयोगाद्योगात्तत्त्वात्॥ प्रकृतिपुरुषः॥ ४०॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नैष्कर्म्यं कर्मनिवृत्तिसाध्यमतो वेदप्रतिपाद्यमित्याह ॥४०॥ तदुक्तं शहस्याम पृच्छतं पितुर्विदितं लौकिकं ब्रह्मणः ॥ पुत्राः सनत्काद
यः सर्वज्ञा अपि नाब्रुवन् ॥ गुह्यत्वेनयोग्यतानायाद्भितीयप्रश्नोत्तरं ॥ प्रकटयन्नाह ॥४१॥ कर्म विहितमकर्मतद्वि
तपरीतविकर्मनिषिद्धं कर्म विहिताकरणं एतत् ॥ प्रत्यक्षेद्वा ॥ दोवेदैकगम्यं नलौकिकः वेदस्योपयत्वात्।

राजोवाच ॥ कर्मयोगं वदत नः पुरुषो येन संस्कृतः ॥ विधूयेहाशु
कर्माणि नैष्कर्म्यं विन्दते परं ॥४१॥ एवं प्रश्नमृषीन्पूर्वमपृच्छं पितुरं
तिके ॥ नाब्रुवन्ब्रह्मणः पुत्रास्तत्र कारणमुच्यतां ॥४२॥ ॥ राम ॥

तदीयवाक्ष्यत्वात् ॥ आम्नायैरुक्तयज्ञादिमर्थः ॥ पुंवाक्येहि चलत्व मित्रायज्ञोर्थज्ञानं शास्त्रमयोरुषेयत्वे नके
वलेवाक्यपौर्वापर्यायैनैव तात्पर्यावधारणं तत्र तु बुद्धेरितिनरकर्मादौ विद्वांसो मुह्यंति ॥ किं तावत् ॥ अत
स्तवतदा बालत्वान्नैवाब्रुवन्निति तुर्त्तीय वेदतात्पर्यमाह ॥४३॥ ॥ ॐ तत्सद्रामाय नमो नमः ॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दुर्ज्ञेयं वेदतात्पर्यमाह ॥ परोक्षवाद इति ॥ अन्यो यथाश्रुतोऽर्थः संगोपयितुमन्यथाहत्वोच्यते स परोक्षवादः तथा
च श्रुतिः ॥ तं वा एतं चतुर्होतारं सन्तं चतुर्होतेत्याचक्षते ॥ परोक्षेण परोक्षप्रिया इव हि देवा इति परोक्षवादत्वमेवाह कर्ममो
क्षायेति ननु स्वर्गाद्यर्थं कर्माणि विधत्ते न कर्ममोक्षाय तत्राह ॥ बालानामनुशासनं यथा भवति तथा ॥ अत्र दृ
ष्टान्तः ॥ अगदं औषधं यथा पिता बालमगदं पाययन् खण्डलड्डुकादिभिः प्रलोभयन् पाययति तद्वदा निवत्ता

आविर्होत्र उवाच ॥ कर्माकर्मविकर्मेति वेदवादो न लौकिकः ॥ वेदस्य चेश्वरात्मत्वात्तत्र मुह्यन्ति सूरयः ४३ मूलत्रुटि

परोक्षवादो वेदोऽयं बालानामनुशासनं ॥ कर्ममोक्षाय कर्माणि
विधत्ते ह्यगदं यथा ॥४४॥ नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रि
यः ॥ विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ॥४५॥ राम ॥

ति ॥ नैमावनागदपानस्य न लाभः प्रयोजनमपित्वारोग्यं तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् कर्ममोक्षा
यैव कर्माणि ॥४४॥ ननु कर्ममोक्षश्चेत्पुरुषार्थः ॥ तर्हि प्रथममेव कर्म त्यजतां ॥ अत आह नाचरेदिति अ
जितेन्द्रियत्वाद्धि अज्ञः स्वयं यदि नाचरेत् ॥ तर्हि विकर्माचरणलक्षणेनाधर्मेण मृत्योरनन्तरं मृत्युमेव प्रा
प्नोति ॥ तथा च श्रुतिः ॥ मृत्वा पुनर्मृत्युमापद्यते ॥ अद्यमानः स्वकर्मभिरिति अस्माद्वेदोक्तमेव कुर्वाणो
वेतुति सिद्धे ॥४५॥ राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भाग. टी. ८

नतु कर्माणि क्रियमाणेन सिद्धानि कानि ॥ न फलं च श्रूयते न तु नैष्कर्म्यरूपां सिद्धिं न प्राप्नुयात् ॥ निःसंगस्त्वनभिनिवेशवान् ई
श्वरेर्पितं न तु फलोद्देशेन तु फलस्य श्रुतत्वात् कर्माणि कृते फलं च वेदवचनो रोचनार्थ इति कर्माणि रुच्युत्पादनार्थं यथा ग
दपाने खण्डलड्डुकादिवत् न तु स्वकर्मनिरूप्यादेवाह्यसमर्पक विचारयति ॥ तदा चतुर्योवा पतदन्त्यम विदित्वा गा
गंपस्या लोकास्वैति सम्यक् पर्णाहृम्य नात्मन्न स्वकृपणता ॥ तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्म
चर्येण तपसा श्रद्धया यज्ञेन नाना शाकेन चेति ययातादीनां ज्ञानशेषतो चावयायन्निष्कामेण कर्मस्य प्रवर्त्तनेन तस्मा

वेदोक्तमेव कुर्वाणो निःसंगोर्पितमीश्वरे ॥ नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥४६॥ यथा
शु हृदयग्रंथिं निर्जिहीर्षुः परात्मनः ॥ विधिनोपचरेद्देवं तंत्रोक्तेन च केशवं ॥४७॥ लब्ध्वानुग्रह आचा
र्यात्तेन संदर्शितागमः ॥ महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः ॥४८॥ ॥ ॐ तत्सेरामायनः

स्वर्गकामो यजेतेत्यादिभिः ॥ कामितस्य स्वर्गादेः फलत्वेनावगमाद् कामितो सौन भवतीति नैष्कर्म्यसि
द्धि भवतीति भावः ॥४६॥ वैदिकं कर्मयोगमुक्त्वा तांत्रिकमाह य आशु इति परात्मनः परस्य च सनत्यात्मनो जी
वस्य हृदयग्रंथिमहंकारबंधं निहन्तुमिच्छुः सः तंत्रोक्तेन च विधिना प्रकारेण भजेत् । तंत्रमार्गागमः च कारादै
दिके न सह समुच्चयमाह ॥४७॥ तमेव विधिमाह लब्ध्वानुग्रह इत्यादि वाते माचार्यस्य संदर्शितः आगमः अर्चन
प्रकारो येन सः ॥४८॥ ॥

८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मूर्तेः संमुखमासीनः ॥ आदिशब्देन भूतशुद्ध्यादि पिंडं देहं विशोध्य संन्यासैः कृता रक्षा येन सः ॥ ४९ ॥ अर्चादावेव द्रव्या-
णि द्रव्यादीनि तलादिशोधनेनदिति संमार्जनादिना आत्मानमवश्यं तत्वा लिंगं मूर्तिश्च तुलेपलालनादिना निष्पा-
द्य प्रोक्षणादि कृत्वा ॥ ५० ॥ पाद्यादिपात्राण्युपकल्प्य संनिधाप्य हृदि संपूजितं श्रीमूर्तौ ध्यात्वा ॥ हृदादिभिः हृदयशिरः
शिखाकवचैः न्यासः सांगं चैः ॥ मूलमंत्रेण चदेवे कृतन्यासो मूलमंत्रेणार्चयेत ॥ ५१ ॥ अंगानि हृदयादीनि उपांगा-

शुचिः संमुखमासीनः प्राणसंयमनादिभिः ॥ पिंडं विशोध्य संन्यासैः कृतरक्षोर्चयेद्धरिं ॥ ४९ ॥ अर्चादौ
हृदये वापि यथालब्धोपचारकैः ॥ द्रव्यक्षित्यात्मलिंगानि निष्पाद्य प्रोक्ष्य चासनं ॥ ५० ॥ पाद्यादीनुपक-
ल्प्याथ संनिधाप्य समाहितः ॥ हृदादिभिः कृतन्यासो मूलमंत्रेण चार्चयेत ॥ ५१ ॥ सांगोपांगां सपार्ष-
तां४ दां तां मूर्तिं स्वमंत्रतः ॥ पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ॥ ५२ ॥ गंधमाल्याक्षतस्रग्भिर्धूप-
दीपोपहारकैः ॥ सांगं संपूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिं ॥ ५३ ॥ आत्मानं तन्मयं ध्यायन्मूर्तिं संपू-
ध्या२ जयेद्धरेः ॥ शेषामाधाय शिरसा स्वधाम्न्युद्वास्य सत्कृतं ॥ ५४ ॥ एवमग्न्यर्कतोयादावतिथौ हृद-
ये च यः ॥ यजतीश्वरमात्मानमचिरान्मुच्यते हि सः ॥ ५५ ॥ इति श्री भागवते एकादशस्कंधे त्रितीयोध्या-
यः ॥ ३ ॥

तिस्पर्शनादीनि तन्मयाहितां स्वपापहृदा सपर्विवास्य केरूपायैव र्जयेत ॥ तदहं पायेति ॥ आधाय शत्रूनेन समर्पक मा-
त्मने च ॥ ५२ ॥ अतत्तानातिलकालेकारैनैव पूजनाया ॥ नात्ततं वर्च ये स्थिदं तके तक्यां सहस्रेरे इति निषेयात ॥ ५ य-
हारांतेनैवेद्यशेषं निर्माल्यं स्वधाम्नि स्वस्थाने देवं हृदि मूर्तिकरंडकेड्वा समुद्वास्य वित्वा पूजा विधिं समापयेदि-
ति शेषः ॥ ५४ ॥ नां त्रिकर्म योगमुपसंहरति एवमिति ॥ ५५ ॥ इति श्रीमद्भावार्थदीपिकायां एकादशे त्रितीयः ३

37

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री॰
भाग॰
टी॰
१८

वतर्यैवंवतारेहाप्रश्नस्योत्तरउक्तवान् ॥ जयंतीनंदनोनाम्नाद्रुमिलोनवमस्तमम ॥ ७ ॥ सूर्याभिमतयात्मनइत्यतेनात्म
नःप्रियसंवत्सरस्तानमपेक्षितंतेनयोग्यात्स्वैःस्वावतारैर्हरिमित्युक्ते ॥ कर्मसत्तानंवापेक्षितंतत्रतःप्रकृतिवानियानी
निकृतानिकरिष्यतिवायानीहप्राप्तानिकालत्रयसंबंधीनिसकलान्यवतारकर्माणिकथयितुमशक्यानिसंक्षेपतस्तु।
कानिचित्कथयिष्यामीत्याह ॥ योवाइत्यादिनाअनंतस्यगुणाननुक्रमिष्यन्गणयितुमिच्छतियःसतुबालानामिवबुद्धिर्यस्य

राजोवाच ॥ यानियानीहकर्माणियैर्यैःस्वच्छंदजन्मभिः ॥ चक्रेकरोतिकर्तावाहरिस्तानिब्रुवंतुनः १
द्रुमिलउवाच ॥ योवाअनंतस्यगुणाननंताननुक्रमिष्यन्सतुबालबुद्धिः रजांसिभूमेर्गणयेत्कथंचि
त्कालेननैवाखिलशक्तिधाम्नः ॥ २ ॥ भूतैर्यदापंचभिरात्मसृष्टैःपुरंविराजंविरचय्यतस्मिन्
स्वांशेनविष्टःपुरुषाभिधानमवापनारायणआदिदेवः ॥ ३ ॥

स्वच्छंदमतिःकालेनमहताकोऽपसंख्यामतिःरजांसिगणयेदपिअखिलशक्तिधाम्नःसर्वशक्तिधाम्नःसर्वश।
क्त्याश्रयस्यभगवतोगुणांस्तुनैवगणयेत्तथाचश्रुतिः विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेर
जांसीत्यादि ॥ २ ॥ तत्रादौपुरुषावतारमाह ॥ भूतैरिति यदास्वसृष्टैर्भूतैर्विराजं ॥ ब्रह्मांडंपुरंनिर्माययतस्मि
न्स्वांशेनजीवेनयदाप्रविष्टः नारायणस्तदापुरुषाभिधानमवाप ॥ लीलयाप्रविष्टःमतुभोक्तृत्वेनप्रभूततु
एवमस्यजीवस्यतत्रभोक्तृत्वात् ॥ ३ ॥ ॥ राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्य त्रयस्य कर्मणो याहृद्वयेन यत्कार्यं रति ॥ यस्याधिष्ठेयः कार्यप्रपञ्चः कार्य इति सूत्रमीमांसा ॥ तदनुभूतं समष्टिव्यष्टिजीवा
नां तानुकर्मेंद्रियाणि यस्य स्वतः स्वरूपभूतान्यत्वा तदनुभूतोऽज्ञानं यस्य स्वतः सिद्धिं ज्ञानमिति वा यस्य श्वसनं ततः प्राणा
त् बलदेहधृतिः श्रमः इंद्रियशक्तिः ईहा क्रिया यस्य सत्वादिभिर्विश्वस्थितिलयोद्भव आदिकर्ता आदिकर्तृत्वम
नेन तत्सर्वं कृतकर्तृत्वं न च स पिसूचितं ॥ ४ ॥ तदेवाह यितुं गुणावतार ब्रह्मा वा चरस्थाद्यादिकर्तृत्वमाह ॥ आदावितिया
स्येति अनुषंगः यस्य वजसाऽस्य जवनतः सर्वकार्यं शातयतिव स्यात् भूतस्थितो च विलयः यस्य सत्वेनेति शेषः क्र

यत्कायप्रपञ्चवनत्रयसन्निवेशो यस्येंद्रियैस्तदनुभूतास्त्वमेव इंद्रियाणि ॥ ज्ञानं स्वतः श्वसनतो बलमोज
ईहा सत्वादिभिः स्थितिलयोद्भव आदिकर्ता ॥ ४ ॥ आदावभूच्छतधृती रजसास्य सर्गे विष्णुः स्थितौ क्र
तुपतिर्द्विजधर्मसेतुः ॥ रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु ॥ ५
धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नरऋषिप्रवरः प्रशान्तः ॥ नैष्कर्म्यलक्षणमुवाच चचा
र कर्म योऽद्यापि चास्त ऋषिवर्यनिषेविताङ्घ्रिः ॥ ६ ॥ ॥

तुपतिः तत्फलदाता द्विजातीनां तद्धर्माणां च सेतुः पालकः इत्यर्थः ॥ यस्य तमसा अस्याप्ययाय रुद्रो भूत इति एतै
र्ब्रह्मादिभिर्निमित्तभूतैः ॥ प्रजासु उद्भवादयो यतो भवंति ॥ स आद्य पुरुष इत्यन्वयः ॥ ५ ॥ धर्मस्य भार्या या दक्ष
दुहिता तस्या मूर्तिसंज्ञायां नारायणो नरश्च ऋषिस्तद्द्वयेन अजनिष्ट जातः तत्र विशेषमाह ॥ नैष्कर्म्यं आत्मस्वरूपं लक्षते
येन तत्कर्म निर्हारं रूपं चाउवाच नारदादिभ्यः ॥ स्वयं च चार च ॥ योऽद्यापि कर्माचरन्नास्ते ऋषिवर्यैर्निषेविताङ्घ्रि
श्चीयस्यास्तेः ॥ ६ ॥ ॥ ॥ राम ॥

श्री. भा. स्कं. ११

भगवदवतारेषु येन कस्य स्योपशमं दर्शयन्नितिहासमाह ॥ इंद्रेति द्वाभ्यां ॥ धाम स्थानं तपसा गृहीतमिच्छती
ति विशंक्य तस्य नाशाय कामं न्ययुंक्त प्रेषयामास सगणः कामः बदरीमित्युपाख्यायते यः ॥ तेन तस्याश्रमे अप्सरोग
णादिभिः ॥ सह गत्वा स्त्रीणां प्रेक्षणान्येवेषवो बाणास्तैः ॥ न तस्य महिमानं जानाति ॥ अतन्महिज्ञः अक्रमं अपराधं
प्रहस्य प्रहस्यैव इति विस्मयो दर्पः गतः ॥ एजमानान् शापभिया कंपमानान् भो विभो असमर्थे हे देववध्वः मा भैष्ट

इंद्रो विशंक्य मम धाम जिघृक्षतीति कामं न्ययुंक्त सगणं स बदर्युपाख्यं ॥ गत्वाप्सरोगणवसंतसुमंदवा
तैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ॥ ७ ॥ विज्ञाय शक्रकृतमक्रममादिदेवः प्राह प्रहस्य गत
विस्मय एजमानान् ॥ मा भैष्ट भो मदन मारुत देववध्वो गृह्णीत नो बलिमशून्यमिमं कुरुध्वं ८
इत्थं ब्रुवत्यभयदे नरदेव देवाः सव्रीडनम्रशिरसः सघृणं तमूचुः ॥ नैतद्विभो त्वयि परेऽविकृते विचि
त्रं स्वारामधीरनिकरानतपादपद्मे ॥ ९ ॥ ॥

बलिं आतिथ्यं तास्वार्थ्यं यते ॥ इममस्माकमाश्रमं ॥ आतिथ्याभावे शून्यप्रायः स्यादित्यर्थः ॥ ८ ॥ हे नरदेव ॥ अभ
यदे श्रीनारायणे इत्थं ब्रुवति सति ॥ देवाः कामादयः सव्रीडानम्राशिरसो येषां ते लज्जामवेक्ष्याराधनत
शिरस्का इत्यर्थः ॥ सघृणं यथा भवति कृपां जनयन्त इत्यर्थः कृपायुक्तमिति वा ॥ मायातः परे अतो विकृते स्वा
रामा आत्मनि रता धीरास्तेषां निकरैरानतं पादपद्मं यस्य तस्मिन् ॥ ९ ॥ ॥ ॥

८०

५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्वषिएतत्तस्यतोभावुकंपादिनविघ्नं ॥ अस्माकं चापरायाचरणं स्वभावत्वान्नविघ्नमिमाङ्कः त्वामितित्वांसेवतांसेव
मानानांजनानांसुरैरिंद्रादिभिः ॥ कृताअंतरायाविघ्नाभवंति कस्मादिमनत्याह स्वौकइति ॥ स्वस्थानं स्वर्गमति
क्रम्यपरमंतवस्थानंव्रजतांनानान्यस्यनामसेवमानस्यकृतः ॥ बर्हिर्विषयत्वेस्वभावान्प्रवोडाशादीन्वलीनक
रान्कृषिकरत्ववाजेंद्रादिभ्याददतःप्रयच्छतः ॥ तर्हि किमङ्ग को विघ्नं पश्यतिनेत्याह ॥ यन्नइतिवंदीतिनिस्त्वये।
यतस्तसर्वस्वरादीश्वरोविनायकः अतोसौविघ्नानांमूर्ध्निपदमस्थियत्तेऽतःपुनःविषयिविघ्नशंकेतिभावः १०
त्वद्भक्तानांतुकेवलंनपञ्चरत्नाहुयीगतिः ॥ अस्माकंवावशंयातिकोयस्यवा ॥ तत्रस्तद्दशाःकामोपभोग।

त्वांसेवतांसुरकृताबहवोंतरायाःस्वौकोविलंघ्यपरमंव्रजतांपदंते ॥ नान्यस्यबर्हिषिवलीन्ददतःस्व
भागान्धत्तेपदंत्वमवितायदिविघ्नमूर्ध्नि ॥१०॥ क्षुत्तृट्त्रिकालगुणमारुतजैह्व्यशैश्नानस्मानपार
जलधीनतितीर्यकेचित् ॥ क्रोधस्ययांतिविफलस्यवशंपदेगोर्मज्जंतिदुश्चरतपश्चवृथोत्सृजंति ॥११

मपितावदनुभवंतिक्रोधस्यवशाः ॥ पुनरतिमंदाइत्याह क्षुत्तृडिति ॥ क्षुच्चतृट्चत्रिकालगुणाश्चशी
तोष्णवर्षाणिमारुतश्चप्राणोवायुर्वाजैह्व्याः जिह्वाभोगाश्चशैश्नाः ॥ शिश्नोपभोगाश्चएतानस्मानपारजला
धिरूपानतितीर्यविलंघ्यगोष्पदेमज्जंति ॥ कुतःइतःक्रोधस्यविफलस्यवशंयांतिगच्छंतिकिंचजलेमज्जनाय
याविवशाःसंतोमस्तकारोपितभारस्तुल्यजंति ॥ तथाहुष्यानमोज्ञायनचभोगायशापादिनाकुस्वरंतपउ
त्सृजंति ॥ हेभगवन्सर्वसाधनानतपाञ्चाश्रयित्वत्सेवाहीनाःसंसारंनतरंतीतिभावः ॥११ ॥ ॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री. भाग. टी. २०

स्त्रियः योगर्तिस्मिताः स्त्रीः सुश्रूषांकुर्वतीः स्वर्चिताः सुष्ठुवालंकृताः ते षां स्वलावण्यादि दर्पोपशमाय ॥ दर्शयामास १२
रूपिणीमूर्तिमतीश्रीरिव ताः स्त्रीः सृष्टास्ता सा च रूपसौंदार्येण महत्वेन हताश्रीः कांतियेषां ते ॥२॥ रूपं वर्णाधिकं
वयं वराकाः क्व चेमाः इति चेतसा हताः ॥ सवर्णा समानरूपा नैकाप्यस्मद्रूपेति चेतसा भवत ॥ तयाप्यसवर्णस्य भूषणा ।
रूपा ॥४॥ सुरवंदिनः देवस्तुताः ॥५॥ इंद्रायइंद्रप्रति नारायणबलम् ॥ ॥ शक्रास्तत्रास संग्रामः विस्मितस्त्व

इति प्रगृणंतां तेषां स्त्रियोमत्कृतदर्शिताः ॥ दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः ॥१॥ ते देवानुच ।
रात्रृस्वास्त्रियः श्रीरिव रूपिणीः ॥ गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियाः ॥२॥ तानाह देवदेवेशः प्रण
तान्प्रहसन्निव ॥ आसामेकतमां वृङ्ध्वं सवर्णां स्वर्गभूषणां ॥४॥ ओमित्यादेशमादाय नत्वा तं सुरवंदि
नः ॥ उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥५॥ इंद्रायानम्य सदसि शृण्वतां त्रिदिवौकसां ॥ ऊचुर्ना
रायणबलं शक्रस्तत्रास विस्मितः ॥६॥ हंसस्वरूप्यवददच्युत आत्मयोगं दत्तः कुमार ऋषभो भगवा
न्पिता नः ॥ विष्णुः शिवाय जगतां कलयावतीर्णस्तेनाहृता मधुभिदा श्रुतयो हयास्ये ॥७॥ ॥राम

तत्रविस्मितआसेनिवा ॥८॥ अस्मानप्यवताराः स्त्त्रविलानि चाह ॥ हंसस्वरूपीतिदत्तः दत्तात्रेयः कुमारः
सनकादिनः पिता ऋषभः च विष्णुदेवकलयावतीर्णः सत्रास्मयोगः मभेवदत्ते तेन विष्णुनाहृता हयास्ये हयग्री
वावतारे मधुभिदा सनातनः पातास्ततः सनातनाः ऋतयः श्रुतयः आहृताः ॥ ७॥ ॥ ॥ ॥ ॥ रामायनमः ॥
राम ॥ ॥ ॥ ॥ ॥ ॥ राम राम

२०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इत्वा दृष्ट्वाथो घयथ यस्तु रामाः श्रीरोदे वराहावतारो ग्राहान् गजेंद्रमश्चंचत ॥ मोचयामास एव माद्यैय ग्रावनतारना मा।
स्तिनत्रविसः शिवायज्ञ वानां कलयावती गिरिं सुवर्तनीयं संस्तन्वतः स्तुतिं कुर्वाणान् ऋषीन् बालखिल्यान् कश्यप
पार्श्वसमिया हरणो गोष्पदे निमग्नान् द्विजेणापहसितान्वशु रूमाः पदो मोचयत् तत्र यसि वसहस्यायां प्रविष्टं मोचया

गुप्तोप्यये मनुरिलौषधयश्च मात्स्ये क्रौडे हतो दितिज उद्धरतांभसः क्ष्मां ॥ कौर्मे धृतो द्रिरमृतोन्मथने
स्वपृष्ठे ग्राहात् प्रपन्नमिभराजममुंचदार्त्तं ॥ १८ ॥ संस्तुन्वतो निपतितान् श्रमणान् ऋषींश्च शक्रं च वृत्रवध
तस्तमसि प्रविष्टं ॥ देवस्त्रियो सुरगृहे पिहिता अनाथा जघ्ने सुरेंद्रमभयाय सतां नृसिंहः ॥ २० ॥ देवा
सुरे युधि च दैत्यपतीन् सुरार्थे हत्वांतरेषु भुवनान्यदधात्कलाभिः ॥ भूत्वाथ वामन इमामहरद्बलेः क्ष्मां
याच्ञाच्छलेन समदाददितेः सुतेभ्यः ॥ २१ ॥ निःक्षत्रियामकृत गां च त्रिःसप्तकृत्वो रामस्तु हैहयकुला
प्ययभार्गवाग्निः ॥ सोब्धिं बबंध दशवक्त्रमहन् सलंकं सीतापतिर्जयति लोकमलघ्नकीर्तिः ॥ २२ ॥

मास ॥ असुरगृहे पिहिता निरुद्धा या देवस्त्रियस्ता स्वास्थं चंदने कौवनाशैः ॥ अंतरेषु सर्वमन्वंतरेषु कलाभिः
मूर्तिभिर्भुवनानि अदधात् ॥ अपालयत् ॥ क्ष्मां क्ष्मां समदात् ॥ ददौ हैहयानां कुलस्याप्ययाय भार्गवरूपोऽग्निः
सर्वो नोदाशरथिः सलंकं सह लंकया लंकाया स्थितं ॥ सर्वजयति वर्तमानकालीनो वर्तावर्तस्यार्थः ॥ २१ ॥ राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री॰
भाग॰
टी॰
२१

009529

भाविनं रामकृष्णावतारमाह॥ भूमेरिति बुद्धावतारमाह॥ वादैरिति अतदर्हान् यज्ञानर्हान् दैत्यान् विमोहयिष्यति॥ क
ल्क्यवतारमाह शूद्रानिति निहनिष्यति॥ २३ इति श्रीभावार्थदीपिकायामेकादशस्कंधे चतुर्थोऽध्यायः॥ ४॥ पंचमे भक्ति
हीनानां कानिष्ठा को गुणो गुणे॥ पूजाविधिविनिश्चयश्च युगेषु समुच्यते॥ त्वामेवं तां स्तवकृतावदवोंतनयाऽस्मेनेन।
श्रीहरिभक्ता विघ्नमूर्ध्नि पदं दत्त्वा परं यांतीत्युक्तं॥ अभक्तानां तु विघ्ना न भवंतीत्युक्तं तर्हि तेषां का गतिर्भवतीति पृ
च्छति भगवंतमिति हे आत्मवित्तमाः अविजितात्मनामत एवाशांतकामानां कानिष्ठा किं श्रा मस्मित्यर्थः स्वजनस्यत्रा।

भूमेर्भारावतरणाय यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि॥ वादैर्विमोहयति यज्ञकृतोऽतद
र्हान् शूद्रान्कलौ क्षितिभुजो न्यहनिष्यदंते॥ २३॥ एवंविधानि कर्माणि जन्मानि च जगत्पतेः॥ भूरीणि भू
रियशसो वर्णितानि महाभुज॥ २४॥ इति श्रीभागवते एकादशमस्कंधे चतुर्थोऽध्यायः॥ ४॥ राजोवाच॥
भगवंतं हरिं प्रायो न भजंत्यात्मवित्तमाः॥ तेषामशांतकामानां कानिष्ठाविजितात्मनां॥ १॥ श्रीचमस उ
वाच॥ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह॥ चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक्॥ २॥ य ए
षां पुरुषं साक्षादात्मप्रभवमीश्वरं॥ न भजंत्यवजानंति स्थानाद्भ्रष्टाः पतंत्यधः॥ ३॥ ॥ ॥ रामस्मो

वोर्भगवतोऽनादरात्तु रुद्रो हेणातुर्वर्तितयांतीति वक्तुं भगवतः सकाशाद्वर्णाश्रमाणामुत्पत्तिमाह॥ मुखेति त्रि।
णैरिति सत्त्वेन विप्रः सत्त्वरजोभ्यां क्षत्रियः रजस्तमोभ्यां वैश्यः तमसा शूद्र इति येषां मध्ये ये तु त्वां न भजंति ये च त्वा
मप्यवजानंति आत्मनः प्रभवो जन्म यस्मात्तं तदभजने कुतस्त्वनामस्याहईश्वरमिति स्थानाद्वर्णाश्रमाद्भ्रष्टाः॥ ३॥

राम
२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र येषां नैसर्गिकी विद्या नास्ति अज्ञप्रायाः स्त्र्यादयः तानाह॥ दूरे इति। हरेः कथा एव येषां ते अत एव दूरे एव अच्युतकीर्तनं येषां ते दूरेऽच्युतकीर्तनाश्च इति। यास्तानलवञ्चुं विदुषः यास्त्र विविक्तास्त्वा उपेक्ष्या इमा प्रायेनाह विप्र इति॥ श्रौतेन उपनयनाख्येन उपलक्षणात् सततम्॥ अध्ययनादिनापि हरेः पदांतिकं तज्जन्मनामाधिकारं प्राप्ता अपि मुह्यंति कर्मफलेषु सक्ताः ततः आम्नायेषु ये वादास्तेषु ये वादाः ते मोहकथ्या यावितिहे येषां ते॥ तदुक्तं गीतासु॥ यामिमां पुष्पितां वाचं प्रवदं

दूरे हरिकथाः केचिद् दूरे चाच्युतकीर्तनाः॥ स्त्रियः शूद्रादयश्चैव तेऽनुकंप्या भवादृशां॥ ४॥ विप्रो राजन्यवैश्यौ वा हरेः प्राप्ताः पदांतिकं॥ श्रौतेन जन्मनाथापि मुह्यंत्याम्नायवादिनः॥ ५॥ कर्मण्यकोविदाः स्तब्धा मूर्खाः पंडितमानिनः॥ वदंति चाटुकान् मूढा यया माध्व्या गिरोत्सुकाः॥ ६॥

त्यविपश्चितः। वेदवादरताः पार्थ नान्यदस्तीति वादिनः इत्यादिना सार्वदा ध्यायं ते येषां मोहं प्रपंचयंति॥ कर्मणि ममात्मनाकोविदाः यथा बंधकं न भवति तथा कर्मकर्तुमक्ताः॥ न चाभिज्ञाः न एकं त्वियत स्तब्धा अन्नम्राः स्तब्धत्वे हेतुः॥ यतो मूर्खा अपि पंडितं मन्यमानानि बाध्यमानतया इत्यादिकया यथा माध्व्या गिरोत्सुकाः संतो मूढास्तया चाटुकान्॥ अस्माभिः सह विचारिणाम्॥ इत्यादिप्रियान् भावान् वदंति॥ ६॥ ॥ ॥ राम ॥ ॥

0035529
45
CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किंच तेषां कर्माभिनिवेशात्कामक्रोधदंभादयो भवंतीत्याह॥ रजसेति घोरा अभिचारादिसंकल्पा येषां ते अहेरि
व मन्युर्येषां ते कामुकत्वं प्रपंचयति वदंतीति उपासिताः स्त्रियो यैः ते तथाभूताः ते मैथुन्यं मिथुनसुखमेव परेषु ते
ष्विति गृहादिषु गृहेषु आशिषो वदंति॥ इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथं॥ इदमस्तीदमपि मे भविष्यति पुनर्धन
मित्याशिषः दांभिकत्वं प्रपंचयति यजंतीति॥ असृष्टान्नविधिं निर्दक्षिणं असृष्टाः न संपादिता अन्नविधानदक्षिणा य
था तथा यजंति॥ यथावद्धर्मकार्यं परं केवलं पशून्घ्नंति अतद्विदः हिंसादोषानभिज्ञाः मानितां प्रपंचयति

रजसा घोरसंकल्पाः कामुका अहिमन्यवः॥ दांभिका मानिनः पापा विहसंत्यच्युतप्रियान्॥७॥ वदं
ति तेऽन्योन्यमुपासितस्त्रियो गृहेषु मैथुन्यपरेषु चाशिषः॥ यजंत्यसृष्टान्नविधानदक्षिणं वृत्त्यै परं घ्नंति
पशूनतद्विदः॥८॥ श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा॥ जातस्मयेनांधधि
यः सहेश्वरान्सतोऽवमन्यंति हरिप्रियान्खलाः॥९॥ सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मा
नमभीष्टमीश्वरं॥ वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदंति वार्त्तया॥१०॥

श्रियेति श्रिया धनादिविभूत्या ऐश्वर्येण श्रियादिना जातो यः स्मयो गर्वस्तेन अंधा धीर्येषां ते ईश्वरसहितान्
सतः अवमन्यंते किंच॥ एवं वर्तमाना नास्तिका वेदतत्त्वार्थस्फुटमपि न जानंतीत्याह॥ सर्वेष्विति केनचिद्रूपेणावस्थि
तं तदाह॥ आत्मानमीश्वरं आत्मतया ईश्वरतया ईश्वरतयो वा अवस्थितं॥ एवमप्यसंगतमाह॥ यथा खं तथा
र्यनामाह॥ अभीष्टं स्फुटत्वमाह॥ वेदोपगीतं चेति तत्कुतः यतो मनोरथानां व्यवायामिषमद्यसेवालिप्सया
णां वार्त्तयोप्रवदंति प्रवृत्तिपरमिति वर्णयंति॥१०॥ ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मद्य
व्यवायामिषसेवा
सुर

ननु व्यवायादीनामपि श्रुतौ भार्यामुपेयात् ऋतौ शेषं भक्षयेत् इत्यादिना विहितत्वात् कथमेवं निंद्यते अत आह लोक इति व्यवा
यः स्त्रीसेवा: निमाः रागत एव निमग्नाः जंतोः प्राणिमात्रस्य प्रतत्तत्र नास्तु चोदना विधिर्नास्ति ननु ऋतौ भार्यामुपे
यादित्यादि विधिदर्शितः समस्तत्व स्यासमस्तविधिः नागतः प्राप्तत्वात् ॥ किंतु नियमविधिरूपेण वाविताः एतामस्य तुत्रा
नावक्रियते तदाह व्यवस्थितिरिति ॥ तेषु व्यवायादिषु केः विवाहयज्ञसुराग्रहैः ॥ विवाहविषय एव व्यवायः यज्ञ
एवामिषसेवा सौत्रामण्यां सुराग्रहणात् न तु ह्यन्यतो ति इत्येवं वमस्येसेवेति नियमः क्रियते ॥ ननु च नियमपक्षे कार्यः२

लोके व्यवायामिषमद्यसेवा नित्यास्तु जंतोर्न हि तत्र चोदना
व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा ॥११॥

प्राप्तव्यपरकृत्वात् निंदा युक्ता अत आह आसु निवृत्तिरिष्टेति अयं भावः ॥ नायं नियमविधिः किंतु परिसंख्या मत्वान्यत्र
तो निवृत्तिः परिसंख्येव अत्र व्यवायामिषमद्यसेवा अविधिरिष्टः ॥ कथं तर्हि व्यवस्थितिरित्युच्यते न तावत्
परिसंख्याविधिनाऽन्यतो निवृत्तिरुच्यते ॥ तथा स्वार्थत्यागः परार्थकल्पना प्राप्तबाधश्चेति दोषत्रयं स्यात्
अतः क्वचित् प्राप्यतो यथेष्टपापोमनर्थकमित्यपूर्वविधिद्वारेण निवृत्तिः फलतो भवति तथा ॥ ११
॥ राम ॥ राम ॥

द्वा॰ १

श्री॰
भाग॰
टी॰
२२

इमामभगुरुंशानमरुतस्येसवस्वामियानीमादन्नब्रमबरत्पानालिंगानोगार्दभाश्चाभियानीवशलाढ्येश्रापमुनोसंबस्याप्रदेवविधि
द्वारापरिसंख्यायते॥ यथोक्तंतंचवार्तिके॥ अप्राप्तविधिरेवायमतोमंत्रस्वनियम्लिनः॥ परिसंख्याफलेनोक्तानविशेषः
पुनःश्रुतेरिति॥ कचित्तुरागानोनियमप्राप्तस्याप्राप्तांशपूरणेनलक्षणस्यनियमफलस्याप्यभावात्रियमविधिद्वारापफल
नःपरिसंख्यायामवति॥ यथापंचपंचनखाभक्ष्याइति॥ नचारागानोनियमप्राप्तस्यपावाद्यादेर्विवाहादिनियमेनानभ्य
नुज्ञानेनुयथस्वनुज्ञासाममेतत्स्यात्॥ नहिंकृतस्नानांनुयोभार्यासंनियोगोनोपनाक्रति॥ ज्योतायांश्रुणहन्त्यायांपरा
तेनाचमैथुनस्यादिदोषश्रवणंनस्यात्॥ नैषदोषःमनसिकामेसत्यपितस्यामरुच्याद्वेषादिनोवानामनुपगच्छ
तोदोषश्रवणोपपत्तेरिति सर्वंमननवघदोषरहितवेषंज्ञानत्वमसिमर्थ॥ तद्देवेविवायादिमनोरथोक्तलितस्नादभीष्ट
मात्मानेनमूपवस्तिहितमुक्तं॥ इदानीयनस्यापिधर्मद्वारापरमात्मप्रापकस्यतत्त्वोयमोयार्थविनियोगाज्ञान

यत्रंचयमैकफलंयतोवेज्ञानंसविज्ञानमनुप्रशंसति॥ गृहेषुयुंजंतिकलेवरस्यस्तंतंनपश्यंतितुरंतवीर्यं ॥ ११ ॥
यद्घ्राणभक्षोविहितःसुरायाः तथापशोरालभनंनहिंसा॥ एवंव्यवायःप्रजयानरत्यैइमंविशुद्धंनविदुःस्वधर्मं ॥ १२ ॥

ज्ञानवंयोपीत्याहृत्यनवेतियधर्मएवैकःफलंपश्यतत्त्वतःयतःधर्मात्सविज्ञानमपरोक्षज्ञानसहितंतरज्ञंपरोलंना
नंभवतिकथंभूतंप्रज्ञपचमानितिग्रन्ज्ञनंतरमेवप्रकृष्टशांतिनिर्वाणलक्षणायस्मतत्॥ एवंभूतधर्मगृहेषुदेहायग
र्युजंति॥ ११॥ किंचव्यवस्थायापिव्यवायायस्यनुज्ञानमयथेष्टंग्रपिवसंचेवेत्याहयदितियसुरायाः॥ घ्रा
णभक्षःअवघ्राणसएवविहितःनव्यन॥ तथापशोरप्यालभवमेवविहितंनतुहिंसाग्रयमर्थःदेवतोद्देशेनयम
स्पृहननेनतदालभनेवायवंश्येतसजमालभेतेत्यादिश्रुतेःनतुहिंसा॥ यावेदविहितांहिंसांनहिंसेतिकीर्त्तन
इतिवचनात्॥ भक्षणोद्देशेनतत्क्रियमानेलौकिकहननवद्धिंसैव॥ अन्नत्वाभवमेवविहितंनतुहिंसाअनेन
यथेष्टमद्यपानाभ्यनुज्ञेत्यर्थः॥ एवंव्यवायोपिप्रजयानिमित्तभूतयानतुरत्यैअनेनमनोरथवादिनइमंविशुद्धंस्वधर्मं

ब्रीहीनवहुत्या
दिरूपत्र्यावैहन
न्निसुधीकर
णतत्तुनतुनरवे
रपिपुरोडीका

श्रीभागवतटीका
२२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवंभगवद्विमुखानांबहुदोषतामुक्तात्रपंच्यतविशेषंप्रपंचयतिपंचभिः येत्विति अनेवंविदः नएवंधर्मंविदं
तियेतेविस्रब्धाः निःशंकाः अनेनममकोद्रोहोभविष्यतीतिविश्वस्तावाइदानींतुतपोषितान्वातैःपशुभिर्विश्वस्ताः
तेपशवःप्रेत्यमुत्रतान्खादंतिमांसभक्षिताः प्रत्ययस्यमांसमिहाद्म्यहं ॥ एतन्मांसस्यमांसत्वंप्रवदंतिम
नीषिणःइतिवचनात ॥१४॥ आत्मविघातादिनाद्विषंतः मृतकेदेहे सानुबंधेपुत्रादिसहिते ॥१५॥ अक्ताः ततस्तेरत्वंके

ब्धाः ... स्ताः

येत्वनेवंविदोसंतस्तब्धाःसदभिमानिनः ॥ पशून्द्रुह्यंतिविस्रब्धाःप्रेत्यखादंतितेचतान् ॥१४॥ द्विषंतः
परकायेषुस्वात्मानंहरिमीश्वरं ॥ मृतकेसानुबंधेस्मिन्बद्धस्नेहाःपतंत्यधः ॥१५॥ येकैवल्यमसंप्रा
प्तायेचातीताश्चमूढतां ॥ त्रैवर्गिकाह्यक्षणिकाआत्मानंघातयंतिते ॥१६॥ एतेआत्महनोशांताअ
ज्ञानेज्ञानमानिनः ॥ सीदंत्यकृतकृत्यावैकालध्वस्तमनोरथाः ॥१७॥ हित्वात्मायासरहिताग्रहाप
त्यसुहृच्छ्रियः ॥ तमोविशंत्यनिच्छंतोवासुदेवपराङ्मुखाः ॥१८॥ चिर

पिताः तरंतितत्त्वज्ञास्तत्त्वतः येनवासंततमक्ताः ॥ नचतेतत्त्वज्ञाः तेनबालवत्निः पतंतीत्याहयेइतिकैवल्यं
तत्त्वज्ञानमसंप्राप्ताः अतएवतः त्रिवर्गप्रधानाः ॥ अक्षणिकाः क्षणशांतिरहिताः देहादिस्थैर्यबुद्धयोवाते
स्वयमेवस्वात्मानंघातयंति ॥१६॥ तदाह एतइति आत्महनः ॥ आत्मापह्नवकर्त्तारः आज्ञानेकर्मणि ॥ तथाच
श्रुतिः असूर्यानामतेलोकाअंधेनतमसावृताः ॥ तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाइति ॥१७॥ या

गृहापत्यसुहृच्छ्रियस्ताहित्वा १८ ॥ धासे

न देव भगवद्भक्तिरेव कर्मं चेति निश्चिते ॥ न च विशेषं पृच्छति कस्मिन्काले इति ॥ किं वर्णः कीदृग्वर्णो वा न कीदृशः
कीदृगाकारः केन वा नाम्ना केन वा विधिना ॥ एवं कृतादि काले नानाप्रकारा वर्णाभिधाकारा यस्य सः नानैव वि
धिनैव मार्गेण ॥१९॥ न देव वर्णादि चतुष्टयमाह कृत इत्यादिना ॥२०॥ कृष्णाजिनादीन् बिभ्रदिति ॥२१॥ त्र

श्रीराजोवाच ॥ कस्मिन्काले स भगवान्किं वर्णः कीदृशो नृभिः ॥ नाम्ना वा केन विधिना पूज्यते तदि
होच्यतां ॥१९॥ करभाजन उवाच ॥ कृतं त्रेता द्वापरं च कलिरित्येषु केशवः ॥ नानावर्णाभिधाकारो ना
नैव विधिनेज्यते ॥२०॥ कृते शुक्लश्चतुर्बाहुः जटिलो वल्कलांबरः ॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दं
डकमंडलू ॥२१॥ मनुष्यास्तु तदा शांता निर्वैराः सुहृदः समाः ॥ यजंति तपसा देवं शमेन च दमेन च २२
हंसः सुपर्णो वैकुंठो धर्मो योगेश्वरोमलः ॥ ईश्वरः पुरुषोव्यक्तः परमात्मेति गीयते ॥२३॥ त्रेतायां र
क्तवर्णोसौ चतुर्बाहुस्त्रिमेखलः ॥ हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः ॥२४॥ तं तदा
मनुजा देवं सर्वदेवमयं हरिं ॥ यजंति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः ॥२५॥ ॥ राम

स्याच्चाविशेषो दर्शितः तपसा ध्यानेन ॥२२॥ २३ ॥ त्रिगुणादीनां प्रभूता मेखला यस्य सः यज्ञमूर्तिः ।
हिरण्यकेशः पिशंगकेशः ॥२४॥ त्रय्या विद्यया वेदत्रयोक्तकर्मभिः ॥२५॥ ॥ रामायनमः ॥
राम ॥ राम ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पृश्निगर्भः तस्याः पुत्रः वृषाकपिः स्मृतः सम्यक् वर्षति कामान् वृष्ट्या कंपयति च क्लेशानिति तथा जयन्तमेवं सर्वं द्रष्टव्यं जयन्तः ।।२६
श्यामः अतसीपुष्पसंकाशः निजानि चक्रादीन्यायुधानि यस्य सः श्रीवत्सो वामवक्षसि दक्षिणभागे रोम्णां प्रद
क्षिणावर्तः सध्यादिर्येषां करचरणादिगततत्पद्मादीनां तैः अंकैश्चिह्नैः चिह्नैः लक्षणैः वस्त्रैः कौस्तुभादिभिः ।।२७।।
महाराजोपलक्षणं छत्रचामरादियुक्तं वेदतन्त्राभ्यां वैदिकेन तान्त्रिकेन च मार्गेण यजन्ति पूजयन्ति परमी

विसृजन्तः पृश्निगर्भः सर्वदेव उरुक्रमः ।। वृषाकपिर्जयन्तश्च उरुगाय उदीर्यते ।।२६।। द्वापरे भगवाञ्
श्यामः पीतवासा निजायुधः ।। श्रीवत्सादिभिरंकैश्च लक्षणैरुपलक्षितः ।।२७।। तं तदा पुरुषं मर्त्या महा
राजोपलक्षणं ।। यजन्ति वेदतन्त्राभ्यां परं जिज्ञासवो नृप ।।२८।। नमस्ते वासुदेवाय [illegible] नमः संकर्ष
णाय च ।। प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः ।।२९।। नारायणाय ऋषये पुरुषाय महात्मने ।। वि
श्वेश्वराय विश्वाय सर्वभूतात्मने नमः ।।३०।। इति द्वापर उर्वीश स्तुवन्ति जगदीश्वरं ।। नानातन्त्रविधा
नेन कलावपि तथा शृणु ।।३१।। कृष्णवर्णं त्विषाकृष्णं सांगोपांगास्त्रपार्षदं ।। यज्ञैः संकीर्तनप्रायैर्य
जन्ति हि सुमेधसः ।।३२।। ।।

श्वरं तावत् स्तुतिरुक्ता ।।२९।। नामान्याह नमस्त इति नानातन्त्रविधानेनेति कलौ तन्त्रमार्गं सम्प्रदायं संदर्शयति सूक्ता।
नानाविधानेनेयति ।।३१।। त्विषाकान्त्या अकृष्णं इन्द्रनीलमणिवदुज्ज्वलं यदा त्विषा कृष्णं कृष्णावतारं चानेन कलौ
कृष्णावतारस्य प्राधान्यं दर्शयति ।। अंगानि हृदयादीनि उपांगानि कौस्तुभादीनि अस्त्राणि सुदर्शनादीनि
पार्षदाः सुनन्दादयः तैः सहितं ।। संकीर्तनं नाम नामोच्चारणं तत्प्रधानैः यज्ञैः स्वमेधसो विवेकिनः ।।३२

स्तुतिमाह ध्येयमिति हे प्रणतपाल हे महापुरुष ते चरणारविंदं कथंभूतं ध्येयं ध्यातुं योग्यं सदेति सर्वत्र संबध्यते ध्ये-
यत्वहेतवः इंद्रियकुटुंबादिभिर्यः परिभवस्तिरस्कारः तं हंतीति तथा तं॥ किंच॥ अभीष्टदोहं मनोरथपूरकं किं-
च॥ तीर्थास्पदं गंगायाः आश्रयं तेन परमपावनं शिवविरिंचिभ्यां नुतं स्तुतं महत्तमैर्नतत्वेनोक्तार्थो विवक्षितमर्थं ताभ्यां स्तु-
तं तत्राह शरण्यं आश्रययोग्यं स्वखात्मकमित्यर्थः॥ तर्हि ब्रह्मादिस्तुतं प्राकृतजनस्य कथं गोचरं स्यात्॥ न भृत्यार्तिहं यस्य
कस्यापि भृत्यमात्रस्यार्तिहं न केवलमागंतुकार्तिमात्रहृत् किंतु भवाब्धिपोतं संसारार्णवतारकं च ॥३३॥ इदा-

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यं॥ भृत्यार्तिहं प्रणतपाल भवाब्धि-
पोतं वंदे महापुरुष ते चरणारविंदं ॥३३॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यव-
चसा यदगादरण्यं ॥ मायामृगं दयितयेप्सितमन्वधावद्वंदे महापुरुष ते चरणारविंदम् ॥३४॥

नीं स्वयमात्मकामनुरूपैर्वये त्वं भक्तार्थं स्वापेन तां दर्शयन्॥ श्रीरामवंदं स्तौति त्यक्त्वेति त्र्यर्थैः सुदुस्त्यजया या
सुरेप्सिता राज्यलक्ष्मीस्तां त्यक्त्वा यदिति यदरण्यं॥ गतः अरण्यमगात् किं राज्यवैकल्यदर्शनेन न धर्मिष्ठः कुतः
आर्यस्य गुरोर्दशरथस्य वचसा किंच एवं रामः स्वक्तापि भक्तवत्सलेन दयितया सीतया ईप्सितं मायामृगं तं स्व-
र्णकारं यो न्वधावत्॥ तस्य भगवतस्तच्चरणारविंदं वंदे॥ यद्वाह धर्मिष्ठेति संबोधनं तथाप्यविवदितत्वात् शार्व
परेनमर्थिर्नभवति॥ तथा यदगादिति चरणारविंदनो वोच्यते॥ यच्च मायामृगमन्वधावत् तत्तत्पदारविंदं वंदे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यद्युगानुरूपाभ्यां नामरूपाभ्यां ।।३५।। एतेषु चतुर्षु युगेषु कलिरेव श्रेष्ठ इत्याह ।। कलिमिति गुणज्ञाः कलेर्गुणं जानंति येते न
नु दोषं यस्तो वहुत्वात्कथं सभाजयंतीति तत्राह ।। सारभागिनः सारांशग्राहिणः को सौ गुणः तत्राह यत्रेति तदुक्तं ध्याय
न् कृते यजन् ।। यज्ञैस्त्रेतायां द्वापरेर्चयन् ।। यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवमिति ।।३६।। तस्मात्कालो
ऽतः अस्मात्संकीर्तनात्परमो लाभो नास्ति यतः संकीर्तनात् ।।३७।। किंच कृतादिष्विति ।। अमलाशयाः संतः प्रा

एवं युगानुरूपाभ्यां भगवान्युगवर्तिभिः ।। मनुजैरिज्यते राजन्श्रेयसामीश्वरो हरिः ।।३५।। कलिं सभा
जयंत्यार्या गुणज्ञाः सारभागिनः ।। यत्र संकीर्तनेनैव सर्वः स्वार्थोभिलभ्यते ।।३६।। न ह्यतः परमो लाभो दे
हिनां भ्राम्यतामिह ।। यतो विंदेत परमां शांतिं नश्यति संसृतिः ।। ३७।। घोरे कलियुगे प्राप्ते सर्वधर्मविव
र्जिते ।। वासुदेवपरा मर्त्यास्ते कृतार्था न संशयः ।।३८।। ते सभाग्या मनुष्येषु कृतार्था नृप निश्चितं ये स्मरं
ति स्मारयंति हरेर्नाम कलौ युगे ।। ३९।। कृतादिषु प्रजा राजन् कलाविच्छंति संभवं ।। कलौ खलु भवि
ष्यंति नारायणपरायणाः ।।४०।। क्वचित्क्वचिन्महाराज द्रविडेषु च भूरिशः ।। ताम्रपर्णी नदी यत्र कृत
माला पयस्विनी ।।४१।। प्रायो भक्ता भगवति वासुदेवेमलाशयाः ।। देवर्षिभूताप्तनृणां न किंकरो नायमृ
णी च राजन् ।।४३।। सर्वात्मना यः शरणं शरण्यं गतो मुकुंदं परिहृत्य कर्तं ।।४३।। ।। पितॄणां २
+२ कावेरी च महापुण्या प्रतीची च महानदी ।। ये पिबंति जलं तासां मनुजा मनुजेश्वर ।।४२।। +२

यः प्रायशो भवंति महाभक्ता भवंति ।। भक्तस्य विधिर्येषु निवृत्ते ।। कृतकृत्यतामाह देवर्षीति आप्ताः पोष्याः कुटुंबिनः इ
तरे देवादयः पंच यज्ञदेवताः एते पोषणार्थं भक्तैः ऋणिनो भवत एव तेषां किंकरः तद्दोषी नित्यं पंचयज्ञादि कर्ता न यस्ता
व स्मृतिः ।। हीनजातिपतिर्ज्ञीणमृणार्थं कर्म कारयेदिति ।। अयं तु न तथा ।। को सौ यः सर्वभावेन सम्यक् देशांतरं
गतः कृत्यं परिहृत्य यदा कर्तं भेदं परिहृत्य कालो देवमनुष्यान् ।। वासुदेवः सर्वमिति त्वेव हि संघैः ।। भ

कृतादिषु प्रजा राजन् कलौ विइच्छंति संभवं कलौ खलु भविष्यंति नाराय णपरायणाः ३८ लोत्रुटि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग.
टी.
२९

विदितकर्मनिवृत्तिश्च कालविषयनिमित्तप्रायश्चित्तनिवृत्तिमाह ॥ स्वपादमूलमिति त्यक्तः अन्यस्मिन् देहादौ देवतांतरे वा भावो
येन अत एव तस्य विकर्मणि प्रवृत्तिर्न संभवति ॥ यच्च कथंचित्प्रमादादिना उत्पतितं भवेत् ॥ तदपि हरिर्धुनोति ॥ ननु यम
स्त्वमयेत ॥ तत्राह परेशः ननु वस्तुतिष्ठतो भमेवासे निभया वहतु नास्त्युत्तामं वा कथं सह हेतं तत्राह ॥ प्रियस्य ननु ना
यं पापं तत्याग भजतेन तत्राह हृदि संनिविष्टः ॥ नहि वस्तुशक्तिरर्थिनामपेक्षते इत्यर्थः ॥४२॥ जायंतेयान जयमाः उ

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ॥ विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि
संनिविष्टः ॥४२॥ नारद उवाच ॥ धर्मान्भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः ॥ जायंतेयान्मुनीन्प्रीतः सो
पाध्यायो ह्यपूजयत् ॥४३॥ ततोंतर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः ॥ राजा धर्मानुपातिष्ठन्नवाप परमां
गतिं ॥४४॥ त्वमप्येतान्महाभाग धर्मान्भागवतान्श्रुतान् ॥ आस्थितः श्रद्धया युक्तो निःसंगो यास्यसे प
रं ॥४५॥ युवयोः खलु दंपत्योर्यशसा पूरितं जगत् ॥ पुत्रतामगमद्यद्वां भगवानीश्व
रो हरिः ॥४६॥ दर्शनालिंगनालापैः शयनासनभोजनैः ॥ आत्मा वां
पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ॥४७॥ रामायनमः

ज्ञात ॥४३॥ उपातिष्ठन् अनुतिष्ठन् ॥४४॥ निःसंगो भूत्वा शास्त्रप्रक्रियेय श्रद्धायुक्तो वा प्रसंगात पवक्तृता
र्थानित्याह युवयोरिति द्वाभ्यां युवयोः वच सर्वकर्मार्पणादि भागवतधर्मैः वलमेवाभिवसुदेवयोः सत्वशुद्धिरा
पारतीयाप्रयुज्योपलादते नैव भागवतधर्मसर्वस्वनिष्ठतविसातदर्शनेति ॥ कृष्णे पुत्रइति स्नेहं प्रकुर्वतो
र्वांतस्य दर्शनादिभिरात्मा पावितः शोधितः ॥४७॥ ॥ राम ॥ २९

54

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मा०२

पन देवकेमुग्धत्वायेन स्फुटयति वैरेणेति यं शयनासनादौ वैरेण ध्यायंते स्तस्तसप्यानि विलासाद्यैः आकृतधियः तृतदा कारा धीर्येषां ते व स्वसाम्यमापुः किं पुनर्वक्तव्यमनुरक्तधियां तत्साम्यं भवतीति ॥ ४८ ॥ न त्वपत्यस्नेहस्तेनास्ति हेतुः न हि सर्वज्ञेऽपत्यत्वं ॥ तत्राह ॥ मायमनुष्यत्वमिति ॥ अपत्यमिति बुद्धिं माकृथाः अप्रत्ययः छांदसः ॥ ४९ ॥ न केवलं पार्थ

स०ना०

वैरेण यं नृपतयः शिशुपालपौंड्रसाल्वादयो गतिविलासविलोकनाद्यैः ॥ ध्यायंत आकृतधियः श
यनासनादौ तत्साम्यमापुरनुरक्तधियां पुनः किं ॥ ४८ ॥ मापत्यबुद्धिमकृथाः कृष्णे सर्वात्मनीश्वरे ॥ माया
मनुष्यभावेन गूढैश्वर्ये परेऽव्यये ॥ ४९ ॥ भूभारासुरराजन्यहंतवे गुप्तये सतां ॥ अवतीर्णस्य निर्वृत्यै यशो
लोके वितन्यते ॥ ५० ॥ श्रीशुक उ० ॥ एतच्छ्रुत्वा महाभागो वसुदेवोऽतिविस्मितः ॥ देवकी च महाभागा जहतु
र्मोहमात्मनः ॥ ५१ ॥ इतिहासमिमं पुण्यं धारयेद्यः समाहितः ॥ स विधूयेह शमलं ब्रह्मभूयाय क
ल्पते ॥ ५२ ॥ इति श्रीभागवते एकादशस्कंधे पंचमोऽध्यायः ॥ ५ ॥

मीश्वरे मानुषः स्यात् कथं वा तस्य विश्वास्रष्टादिकर्तृः ॥ पूतनाशोषणादिकर्माश्चर्यं सिध्यति नृपते ॥ तत्रा
ह भूभारभूपाश्च सदा एव येषां ॥ जन्याः तेषां हंतवे तान् हंतुं निर्वृत्यै मोक्षाय ॥ ५० ॥ इहं अतिविस्मिते वदे हेश
मलं मोहं विधूय ब्रह्मत्वाय कल्पते ॥ ५२ ॥ इति श्रीभावार्थदीपिकायां एकादशस्कंधे पंचमोऽध्यायः ॥ ५ ॥

राम ॥ ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

षष्टे ब्रह्मादिभिः स्तुत्वा योतं विज्ञापितं हरिं ॥ उद्धवः प्रार्थयामास स्वया सह यमामिपि ॥ अतः परमतिविस्तरेणात्मविद्यां
निरूपयितुं तन्नस्तावमाह अथेति आत्मजैः सनकादिभिः अभ्यगाद्द्वारकामिति च तत्पर्यनान्वयः ननु ते पार्षुपेद्रादि
रूपं भगवतं तनि संप्रपश्यन्ता पश्यतां ॥ केयमसिद्धि दत्ताद्यत आह वपुषेति ॥ येन वपुषा नरलोकमनोरमाः सन् सर्वलो

प्रभूतमुदं संयुक्तान्त्यगीत हृतस्त्रमाः ४

शुक उवाच ॥ अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात् ॥ भवश्च भूतभव्येशो ययौ भूतगणैर्वृतः ॥ १ ॥ इंद्रो
मरुद्भिर्भगवानादित्या वसवोऽश्विनौ ॥ ऋभवोऽङ्गिरसो रुद्रा विश्वे साध्याश्च देवताः ॥ गंधर्वाप्सरसो नागाः गः
सिद्धचारणगुह्यकाः ॥ ऋषयः पितरश्चैव सविद्याधरकिन्नराः ॥ ३ ॥ द्वारकामुपसंजग्मुः सर्वे कृष्णदिदृ
क्षवः ॥ वपुषा येन भगवान्नरलोकमनोरमः ॥ ४ ॥ यशो वितेने लोकेषु सर्वलोकमलापहं ॥ तस्यां विभ्रा
जमानायां समृद्धायां महर्द्धिभिः ॥ ५ ॥ व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शिनं ॥ स्वर्गोद्यानोपगैर्माल्यैः
छादयंतो यदूत्तमं ॥ गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरम् ॥ ६ ॥

केशव यशोवितेते न वति ॥ स्वदरं वपुः दिदृक्षवः यववतन पश्यपत् ॥ ५ ॥ स्वर्गोद्यानस्यैर्माल्यैः चित्राणि स्त्रैरवला
वेयप्रायातिपदानि अर्थाश्च याः स्तवाभिर्गीर्भिः ॥ ॥ ८ ॥ ॥ ओं नमस्यै रामाय रामचंद्राय नमः ॥ ॥ रामस्री
राम ॥ राम ॥ राम ॥ ॥

56

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बुद्धीन्द्रियादिभिः दर्शनादिना प्राणेन च बलदेव नादेः स्वस्थाणिपादेन दर्शनाद येन मस्तु मर्वंतः स्मेति विस्मयेय
थाहुः दाम्भ्यां जानुभ्यां उरसा शिरसा दृष्ट्या मनसा वचसा चेति प्रणाम अष्टांग ईरितः ॥ स्वशाखोक्त विसर्ग
यविशेषमणे कर्मम पादु रुयाशास्त्रानुसृत भिन्न विप्रुकैरपि यत्केवलमन्तर्हृदि विविनातेन तदूपते तद्येन
तः अहो भाग्यमसि मर्त्यः ॥ ७ ॥ नतु मम त्वापि रिरुह्ना हृष्ट कर्म करणेन ॥ उत्तो म सदारविंदा च तनेकर्मे पाशान्नुउ

श्रीदेवा उवाच ॥ न नाम्स्तु ते नाथ पदारविंदं बुद्धीन्द्रिय प्राण मनो वचोभिः ॥ यश्चिंत्यतेंतर्हृदि भावयुक्तैः
मुमुक्षुभिः कर्ममयोरुपाशात् ॥ ७ ॥ त्वं मायया त्रिगुणयात्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुंपसि
तद्गुणस्थः ॥ नैतैर्भवानजित कर्मभिरज्यते वै यत्स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः ॥ ८ ॥ ॥ राम

त्वाभिः क्रियते न ज्ञाउः त्वमिति हे अजित आत्मसिरुन्नीतं च सिद्धमलं कर्म स्वं व्यक्तं महदादि प्रपंचं सृजसि पा
लयसि संहरसि च तद्व्यात्मस्थेव न पृथक् दुर्विभाव्यं मनसाप्यवितर्क्यं तद्गुणस्थः ॥ न स्वामायायागुणेषु
दियंतत्वेन स्थितः ॥ अयथ च एतैः कर्मभिः भवान्नाज्यते न लिप्यते ऊ तः यो भवान् अनवद्यः रामाविरहितः य
तः स्वे आत्मरूपे सुखे अव्यवहिते ॥ अनावृते अभिरतः ॥ अत स्त्वं कर्म कुर्वन्नपि आत्मारामः परमेश्वर इति स्तुत्य

श्री॰ भाग॰ टी॰ २८

न स्यात्तथा स्यात् किं कर्मकर्तॄणां न तथा शुद्धिरित्याह शुद्धिरिति ... नां विद्या उपासना विद्यादि
भिस्तथा शुद्धिर्न भवति सत्त्वात्मनां सत्त्वप्रधानानां त्वद्यशसि श्रवणेन संभृतया परिपुष्टया अभिवृद्धया सच्छ्रद्धया यथा
स्यात् ऋषभ श्रेष्ठ ... यशसो वितानाय तव कर्मोच्चारणमिति भावः ॥९॥ तदेवं तव यशःश्रवणेन शुद्धिरित्युक्तं अ
स्माभिस्तु तवाङ्घ्रिरीड्यः ॥ अतस्तवाङ्घ्रिर्नोऽस्माकं अशुभाशयानां विविधविषयवासनानां धूमकेतुः तद्दाहकः

शुद्धिर्नृणां न तु तथेड्य दुराशयानां विद्याश्रुताध्ययनदानतपःक्रियाभिः
सत्त्वात्मनामृषभ ते यशसि प्रवृद्धसच्छ्रद्धया श्रवणसंभृतया यथा स्या
त् ॥९॥ स्यान्नस्तवाङ्घ्रिरशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदो
ह्यमानः ॥ यः सात्वतैः समविभूतय आत्मवद्भिर्व्यूहेऽर्चितः सवनशः
स्वरतिक्रमाय ॥१०॥ ॥ राम

स्यात् ॥ कथंभूतः यः क्षेमाय मोक्षाय मुनिभिः मुमुक्षुभिः प्रेमार्द्रहृदा उह्यमानः ध्रियमाणः यश्चात्म
वद्भिर्भक्तैः समविभूतये समानैश्वर्याय तुरीयवासुदेवादिव्यूहेऽर्चितः तैश्च ... सवनशो
वैः स्वरतिक्रमाय स्वर्गमतिक्रम्य वैकुण्ठप्राप्तये सवनशः त्रिकालमर्चितः ॥१०॥ रामाय नमः ॥
राम ॥ ॥ राम ॥ ॥ राम ॥ ॥

२८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एतेषां चतुर्विंशान्नतादीनां षण्णां सेवकानां मध्ये परं भागवतेषु लक्ष्मणा अपितत्वमीतिरचयिके निस्संदेवं निर्युक्ष्य एतिर
उभावः क्वा दसः श्रूदंयच व साभितं चैव व द्यास्यिपर्युषिताषीयं वसती तिश्रतिवतसपत्नीचत श्रीः संस्पर्धमानाभव
तितद्यापित्ता स्पर्ध मानास्त्रियमनोऽस्य यो भवान्पर्युषितयाषिन्नसुया वनमालया मुकेर्पितयमिति श्रीमान्क
प्राणीनस्पृहसे पादिते यया भवतित याई णांश्जा मा द दन सोकुन वान् ॥ तस्य न दाग्निर्नःश्रयु ॥ धूमकेतुर्धूमा
तुयः स्प्रणीतमेदहणां मादृदत ॥ स नोत्रभाषा यः धूमकेतुर्भूयादिमत्वयः ॥ अथ वै वसंबेयः पतेभ्यो यान्
दितिष्टेभ्यापित्र घशाभिष हृदुस कुहृवतएवकृतायी भवावतो यथाः प्रियत्वादित्याहुः पर्युष्टयावशकाता
विमस्यानपवितः सर्वा राज्ञ षयाकांतयाशोभितवनमालया वत्तसिएकदेशे वर्तमाना श्रीः संस्पर्धमानाभ

यच्छ्रिंमते प्रयतपाणिभिरध्वरेषु ग्रीवया विनतकविधि नेशा सुवर्णदीना ।ः या न्यालयो रा इनयो विभि
तालमायां जिता सुभिः परमभागवतेतपरोहः ॥ ॥ पर्युष्टयात वविभावनमालये ये संस्पर्धि नो भग
वती प्रतिपत्निवळ्ळौः ॥ यः स्पूप्रणीतमकृयाहणामादवो भूयान्मदाग्निर्व स्वभाषाय धूमकेतुः १२

भवति ॥ तया प्यान्सायमनुव्रतैर्वक्रया वर्णितयाकीतिर्मया वै जयं त्या वनमालयैव यो भवानस्पृपणीतमु
र्हणमादृदित्यादि पूर्ववत् ॥ १२ ॥ किंच ॥ प्रयतपाणिभिः संयतहस्तैर्हविर्गृहीतव्यं यथा ग्रीवाहवनीया दौ
यत्तिकेवरी श्रीमतेतनयसै देवताये हविर्गृहीतंस्यानां ध्यामेद्द यद्वहविव्यविति वदनातनने देवताचिंतेनेनं श्र
तशाहुः तत्याविनतके नविधिस्मुरइादिन्यणी वयन्तथ्स्पः चिंतानत्यर्थः ॥ इति किंच ॥ अध्या त्मयोगेश्वरसा
यिकोरेर्याणेयो भिलिसप्यात्मनस्तव मायोद्भ्रणामादित्याजितासुभिः तत्कामे यच्छ्रिंमते परम भागवतेत्त
मुमेर्यः परोहः सर्वतः प्रजितांः सतताग्निनां भाषाय धूमकेतुः स्यादिति पूर्वेणान्वयः इति परस टीका ॥ १२

श्री. भाग. टी. ३९

त्वत्तु रागस्य भक्तस्य पातः प्रसिद्ध एवेति स्तवेतः सार्धयं तत्केन विनिवलिवंधने विमिर्विक्रमैर्धृतः तत्र द्वितीयविक्रमे
सत्यलोकगतः तत्पादः केतः अस्य कुतो विजयध्वजस्तु नन्नं पादयति ॥ त्रियतत्स्वनाकः त्रियापतंती वा गायता
कायस्य सः ॥ तथा अस्य तु देवचस्तोः तत्सोन्नयो रुभयो भंया भयकरः साधुरुपस्वरेषु ॥ वगायत्वलेशुस्वरेषुइत
रायश्रयो गमाययएवं केतत्रूपस्तेपादः समभजतानः अर्चितुनातशोषसत ॥ अत्रादि निति याते भजतो नः ३।

केतस्त्रिविक्रमयुतस्त्रिपतत्पतो कोयस्ते भयाभयकरो
सुरदेवचस्वोः स्वर्गाय साधुषु खलेष्वितराय भूमन्पा
दः पुनातु भगवन्भजतामघं नः ॥ ३ ॥ ॥ रामज्यो ॥

तिकर्माणिच सौरस्याङ्गजनो स्मास्तुनाविति ॥ तथा च श्रुतिः ॥ चरणं पवित्रं विततं पुराणं येन पूतस्तर
ति दुष्कृतानि तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम ॥ लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्म
द्भ्राजमानं महस्वत् ॥ अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधात्विति ॥ ३ ॥ ॥
राम ॥ ६ ॥ राम ॥ ६ ॥ राम ६ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु पुरुषे देवास्वराडाद्यः परस्परं यज्ञं निजीयं ते वा किं अहं न ते मन आहुः॥ न सीतिमि योमि याः अर्थमानाः प्रद्वादिभिः
पीड्यमानाः अस्माद्यो पि यस्य तव वशो भवंति॥ ननु ज यपराजये वा मतंत्राः कइव न सिना सिकथा ओतः त्रा सि
कामा विधियन्त्राः गावो नसीव परिवक्रुतः कालस्य कलयितुः प्रवर्तकस्य तव देवकृतः प्रकृतिपुरुषयोरा
पि परस्य तस्य ते पुरुषो नाम स्य वाहेनः प्रोतनोतव॥१४॥ प्रकृतिपुरुषाभ्यां परत्वमुपपादयेतः कालत्वेन पुरु

नस्पो तनगाव हव युसवशो भवंति ब्रह्मास्य सनुभुनो मिथ्क रर्जमानाः॥ कालस्यैने प्रकृतिपुरुष
योः परस्य प्राज्ञ स्तनो तुव वणाः पुरुषोत्तमस्य॥१५॥ अस्मासि हेतु रुदयस्थितिसंय
मानां व्यक्त जीव महतामपि कालमाहुः॥ सोयं त्रिणाभिरखि
मर लापचये प्रवृत्तः कालो गभीररय उत्तम
पूरुषस्त्वं॥१५॥

पोत्तमत्वमाहुः असेति॥ असज्जवा नउदयादीनां हेतुरसि॥ कृतः अव्यक्तं प्रकृति जीवः पुरुषः महान्त्मा
हत्तत्वं तेषां काले नियंतारं त्वामाहुः अत एव तत् परम्महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किं
चित्साकाष्ठा सा परा गतिरित्याद्याः श्रुतयः॥ किंच॥ अयं संवत्सरात्मको यः कालः त्रिणाभिः जीतोचातुर्मा
स्यानि नाभयो यस्य सो पि त्वमेव अतः त्वमुत्तमपुरुष इति॥ न प्यवागीतास्तु॥ यस्मात्क्षरमतीतोहमक्षरा
दपि चोत्तमः॥ अतो स्मि लोके वेदे च प्रथितः पुरुषोत्तम इति॥१५॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्वमेव प्रकृत्यादिद्वारा जगज्जन्मस्थित्यादिहेतुरित्याह ॥ तत्केन प्रकारेणेत्यत आह । त्वत्त इति त्वत्तः पुरुषः पुरुषो वीर्यं शक्तिं स
मधिकृत्य आश्रयया यया मायया स्वमहान्तं धत्ते । किमिव ॥ अस्य विश्वस्य गर्भमिव सोऽयं महान् तयैव मायया अनुगतः
सन् आत्मनः सकाशात् अण्डकोशं ससर्ज तयानुगत इति पाठे तयानुगतया अधिष्ठितः ॥२॥ ततश्चैवंभूतस्य सर्वस्य त्वमेव
ऊतीश्वर इत्याह । तदिति तत् तस्मात् तस्थुषः स्थावरस्य जगतो जङ्गमस्य च भवान् अधीशः यद्यस्मात् मायया
ऽजस्रं भिन्नया गुणविक्रिया इन्द्रियवृत्तिः ॥ तयोपनीतान् अर्थान् विषयान् जुषन्नपि — हे हृषीकपते न लि

गम्य

त्वत्तः पुमान् समधिगम्य ययास्य वीर्यं धत्ते महान्तमिव गर्भममोघवीर्यः ॥ सोऽयं तयानुगत आत्मन आण्डको
शं हैमं ससर्ज बहिरावरणैरुपेतं ॥२॥ तत्तस्थुषश्च जगतश्च भवानधीशो यन्मायया गुणविक्रिय
योपनीतान् ॥ अर्थान् जुषन्नपि हृषीकपते न लिप्तो येऽन्ये स्वतः परिहृतादपि बिभ्यति स्म ॥ ३ ॥ स्माया
वलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तु षोडशसहस्रमनंगबाणै
र्यस्येंद्रियं विमथितुं करणैर्न विभ्व्यः ॥ ४ ॥ ॥

ज्ञाह के

मा त्वं ये त्वन्ये जीवा योगिनो वा स्वतः परिहृतादपि अविषयानामकादापि विषयजातो ब्रह्मणो हि बिभ्यति वा स न्ता ।
भावेनाव ध्यंत इत्यर्थः ॥ ३ ॥ अलिप्तत्वमाह । स्मायेति स्मायावलोको मंदस्मितविलसितावलोकः तस्य लवः
कटाक्षः तेन दर्शितो यो भावोऽभिप्रायः तेन यद्वेद्धाविय तत् भ्रूमंडले तेन प्रहिता ये सौरतमंत्रास्तैः शौंडैः प्रगल्भ ।
लैर्बाणैर्वाणैः समोहनैः करणैः कामकलाभिः षोडशसहस्रं पत्न्यः यस्येंद्रियं मनः विमथितुं क्षोभयितुं
न विभ्व्यः न समर्था आसन् भवान्न लिप्यत इति सर्वेषामन्वयः ॥ ४ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तस्मात्तव अस्मत्तनुपालकपालनदेवसुदृढं वृंहतीति तथा कीर्तिनिधः तथा पादावनेजनसरितो गंगा या सा त्रिलोक्याः

शमलानि हरतु विस्मयः केन प्रकारेण आत्मनः अस्मत्प्रवृत्तिरूपचारणामत्वं अस्मद्गुणतत्वं मत्वा भावेदः तवभवं कीर्तिर्पयन्ती।

विस्मयस्तवात्मनः कयोद्वहास्त्रिलोक्याः पादावनेजसरितः शमलानि हन्तुं ॥ आत्मश्रवं श्रुतिभिरं त्रिज

मसेवतोः तीर्थं हृदयेष्व विषदस्तव यस्मा शांति ॥ ९ ॥ बादरायणिरुवाच ॥ [illegible] इम

मिष्टयविद्वयैः संस्तुः श्रुतिभृतिर्हविः ॥ यज्ञभावनतयो विदन् प्रणम्यो व्रतमास्थितः ॥ १० ॥ ब्रह्मोवाच ॥ भूमे

भीरावतारायपुत्रा विज्ञापितः प्रभो ॥ त्वमस्माभिरशेषात्मं स्तत्त्वथैवोपपादितं ॥ ११ ॥ धर्मश्च सत्यापिता

सत्त्वं सत्यं संयेषु वै त्वया ॥ कीर्तिश्च दिक्षुविदिक्षु सर्वलोकमलापहा ॥ १२ ॥ अवतीर्य यदोर्वंशे बिभ्र

द्रूपमनुत्तमं ॥ कर्माण्युद्दाममहात्मानि हितायजगतो [illegible] ॥ १३ ॥ यानि ते चरितानीश मनुष्याः साधवः क

लौ ॥ शृण्वन्तः कीर्तयन्तश्च तरिष्यन्त्यंजसातमः ॥ १४ ॥ यदुवंशावतीर्णस्य भवतः पुरुषोत्तम ॥ शरच्छ

तं व्यतीयाय पंचविंशाधिकं प्रभो ॥ १५ ॥ नाधुनाते अखिलाधार देवकार्यावशेषितं ॥ कुलं च विप्रशापेन

नष्टप्रायमभूदिदं ॥ १६ ॥ ततः स्वधाम परमं विशस्व यदि मन्यसे ॥ सलोकान्लोकपालान्नः पाहि वै

कुंठकिंकरान् ॥ १७ ॥ श्रीभगवानुवाच ॥ अवधारितमेतन्मे यदात्थ विबुधेश्वर ॥ कृतं वः कार्यम

खिलं भूमेर्भारोवतारितः ॥ १८ ॥ तदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतं ॥ लोकं जिघृक्षद्रुद्धं मे वेलयेव महार्णवः ॥ १९ ॥

यं श्रुतिभिः श्रवणेन्द्रियैः अंत्रि जनेर्वा नामग्रोः एवं अत्रविषदः सत्सु मयम यम स्मिन्नात्त्वनमो र्थ हृदय अपस्पृशांति संवंत

इति ॥ विबुधैः सह विविधमावितावितो ॥ [illegible] निहता निविदकलायेश्च नानिकनोणी वीर्यशौर्यश्चक्रया स्त्रिया ॥

श्री° भाग° टी° ११

उद्वेलेन लंघितमर्यादेन वैकुंठं यास्यन्न तत्र भवनं यास्यामि ॥ प्रयास्यामः स्याम इति वदतां यमभिप्रायः एते देवांशाः सा-
धिका यातेवार्हनिनत सद्यो मोदं द्वारवतोऽस्मतामद्यैव नूतं स्यादभ्युदयफले प्रभासे नेष्यामीति ॥ दत्तशापाय त्वत्॥

यत्र संस्नानमत्रेण नाम यहूनां विपुलं कुलं ॥ नातास्माभिर्न न लोकोयमुद्वेलेनैव वित्तस्यति ॥ २१ ॥ इदानीं नाथ ग्रावद्रुः
कुलस्य द्विजशापतः ॥ यास्यामि भवनं ब्रह्मन्नेतदंते तवानघ ॥ २२ ॥ शुकउवाच ॥ इत्युक्तो लोकनाथेन स्व
यंभूः प्रणिपत्य तं ॥ सह देवगणैर्देवः स्वधाम समपद्यत ॥ २३ ॥ अथ तस्यां महोत्पातान्द्वारवत्यां समुत्थि
तान् ॥ विलोक्य भगवानाह यदुवृद्धान्समागतान् ॥ २४ ॥ श्रीभगवानुवाच ॥ एते वै सुमहोत्पाता व्युत्तिष्ठंती
ह सर्वतः ॥ शापश्च नः कुलस्यासीद्ब्राह्मणेभ्यो दुरत्ययः ॥ २५ ॥ न वस्तव्यमिहास्माभिर्जिजीविषुभिरार्य
काः ॥ प्रभासं सुमहत्पुण्यं यास्यामोद्यैव माचिरं ॥ २६ ॥ यत्र स्नात्वा दक्षशापाद्गृहीतो यक्ष्मणोडुराट् ॥
विमुक्तः किल्बिषात्सद्यो भेजे भूयः कलोदयं ॥ २७ ॥ वयं च तस्मिन्नाप्लुत्य तर्पयित्वा पितॄन्सुरान् ॥ भोजयि
त्वोशिजो विप्रान्नानागुणवतांधसा ॥ २८ ॥ तेषु दानानि पात्रेषु श्रद्धयोप्त्वा महांति वै ॥ वृजिनानि तरिष्या
मो दानैर्नौभिरिवार्णवं ॥ २९ ॥ शुकउवाच ॥ एवं भगवतादिष्टा यादवाः कुलनंदनाः ॥ गंतुं कृतधिय
स्तीर्थं स्यंदनान्समयूयुजन् ॥ ३० ॥ तन्निरीक्ष्योद्धवो राजन्श्रुत्वा भगवतोदितं ॥ दृष्ट्वारिष्टानि घोराणि
नित्यं कृष्णमनुव्रतः ॥ ३१ ॥

सुम हा ५

गृहीतस्त्वं द्रो यत्र स्नानमात्रेण सत्ता किल्बिषमस्माद्दोषात्तुः स्वात्सृज्यो विमुक्तः सत्कलावृद्धिं लेभे जे ॥ २८ ॥ उशि-
नः कमनीयान्नप्रयसा अन्नेन ॥ २९ प्रफलं भवति ॥ तथा दानं सत्पात्रे इति ॥ ३० ॥ ३१ ॥ ३२ ॥

६५

३९

लोकं मम मे लोकं ||४१|| न प्रभासाहन्न नश्यति ह ` ` ` शाप्यादिषु हां भक्ताः नित्यं से वितषेतो वयं कथं मनेन ` ` ` वक्तुम
शाक्तवत् प्रार्थयेन मायादिस्याहन्न वयेतिश्चर्चिन्नाश्चले कृताः हि निश्चितं तयेन ||४२|| संन्यासिनो हि ब्रह्मचर्यो द्विजो

३६७

विविक्त उपसंगम्य जगतामीश्वरेश्वरं || प्रणम्य शिरसा पादौ प्रांजलिस्तमभाषत ||४१|| विदेह उवाच || दे
वदेवेश योगेश पुण्यश्रवणकीर्तन || संहृत्यैतत्कुलं नूनं लोकं संत्यक्ष्यते भवान् ||४२|| विप्रशापं समर्थो
पि प्रत्यहन्न यदीश्वरः || नाहं तवांघ्रिकमलं क्षणार्धमपि केशव ||४३|| संत्यक्तुं समुत्सहे नाथ स्वधाम नय
ब्रल मामपि || तव विक्रीडितं कृष्ण नृणां परममंगलं || कर्णपीयूषमासाद्य त्यजन्त्यन्यस्पृहां जनः ||४४|| श
न८ य्यासनाटनस्थानस्नानक्रीडाशनादिषु || कथं त्वां प्रियमात्मानं वयं भक्ताः त्यजेमहि ||४५|| त्वयोप
भुक्तस्रग्गंधवासोलंकारचर्चिताः || उच्छिष्टभोजिनो दासाः तव मायां जयेमहि ||४६|| वातवसना य
ऋषयः श्रमणा ऊर्ध्वमंथिनः || ब्रह्माख्यं धाम ते यांति शांताः संन्यासिनोमलाः || ४७|| वयं
त्विह महायोगिन् भ्रमंतः कर्मवर्त्मसु || त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ||
४८|| स्मरंतः कीर्तयंतस्ते कृतानि गदितानि च || गत्युत्स्मितेक्षणक्ष्वेलि यन्नृ
लोकविडंबनं ||४९|| श्रीशुकः || एवं विज्ञापितो राजन् भगवान्दे ||
वकीसुतः एकांतिनं प्रियं भृत्यमुद्धवं समभाषत ||५०
इति श्रीभागवते एकादशस्कंधे षष्ठोध्यायः ||६

कथं तिन्नवेति || वयं तु न नायासेनैव ततरिष्यम इत्याह वाततरशनाद्युतिक्रूर्ध्वरेतसः तावकैः भक्तैः सह त्वद्वार्तया ||४८
क्ष्वेली परिहासः ह्रदैकत्वं ||४९|| एकांतिनमित्यादि स्वाभिप्रायवचनेहेतवः ||५०|| इति श्री एकादशस्कंधे षष्टः ||६

श्री॰ भा॰ ए॰ टी॰ ३२

सप्तमे तूद्धवस्यात्मज्ञानसिद्ध्यै हरिः स्वयं ॥ अवधूतेतिहासोक्त्या [illegible] गीयत ॥ यदात्थ मां संहृत्यैतत्कुलमिति स्वर्वा
सं वै ऊर्ध्ववासं प्रति ॥ १ ॥ तं च सर्वपरित्यागेनात्मनिष्ठो भवेति वक्तुमाह कुलमिति त्रिभिः ॥ २ ॥ तदेवायं नष्टमङ्गलो भवि
ष्यति ॥ ४ ॥ न वस्तव्यमेव त्वया ॥ ५ ॥ ननु गुणदोषाभ्यां विषमे लोके कथं नः समदृष्टिः स्यात् ॥ अत आह यदिदमिति ॥

पापना कहिने हितः ॥

श्रीभगवानुवाच ॥ यदात्थ मां महाभाग तच्चिकीर्षितमेव मे ॥ ब्रह्मा भवो लोकपालाः स्वर्वासं मेऽभिकाङ्क्षि
णः ॥ १ ॥ मया निष्पादितं ह्यत्र देवकार्यमशेषतः ॥ यदर्थमवतीर्णोऽहमंशेन ब्रह्मणार्थितः ॥ २ ॥ कुलं वै
शापनिर्दग्धं नङ्क्ष्यत्यन्योन्यविग्रहात् ॥ समुद्रः सप्तमे ह्येनां पुरीं च प्लावयिष्यति ॥ ३ ॥ यर्ह्येवायं मया त्य
५४ क्तो लोकोऽयं नष्टमङ्गलः ॥ भविष्यत्यचिरात्साधो कलिनापि निराकृतः ॥ ४ ॥ न वस्तव्यं त्वयैवेह मया त्य
क्ते महीतले ॥ जनोऽभद्ररुचिर्भद्र भविष्यति कलौ युगे ॥ ५ ॥ त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु ॥ म
य्यावेश्य मनः सम्यक् समदृग्विचरस्व गां ॥ ६ ॥ यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ॥ नश्वरं
गृह्यमाणं च विद्धि मायामनोमयं ॥ ७ ॥ पुंसोऽयुक्तस्य नानार्थो भ्रमः स गुणदोषभाक् ॥ कर्माकर्मविक
र्मेति गुणदोषधियो भिदा ॥ ८ ॥ ॥

मन आदिभिर्गृह्यमाणं मनोमयत्वान्मायेति विद्धि तदपि नश्वरं किंतु नश्वरं च विद्धि ॥ ७ ॥ मनोमयत्वे हेतुः पुंस इ
ति ॥ अयुक्तस्य विक्षिप्तमनसः ॥ नानार्थ इति भेदविषयो भ्रमः ॥ स भ्रम एव गुणदोषभाक् ॥ ननु वेदेनैव विधिनिषे
धाभ्यां भेदः स्यात्तत्राह ज्ञानभ्रमविहीनं ह्येतद्गुणदोषबुद्धेः पुंसः कर्म विहितं अकर्म मलोपः विकर्म निषेधमिति
भेदः ॥ अविद्यावद्विषय एव वेदे रमर्थः ॥ ८
॥ ॥ ॥ ॥ ॥ २२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कथमात्मनिपरिछिन्नेविततंजगदीक्षणीयं।।आत्मानमितिमयिब्रह्मणितद्रूपेणेत्यर्थः।।९।।नन्वेवंयुक्तचित्तस्यकर्माक
रणाद्देवादयोविघ्नान्करिष्यन्तीनेत्याह।।ज्ञानेति।।ज्ञानंवेदतात्पर्यनिश्चयः।विज्ञानंतदर्थानुभवः।ताभ्यांसम्यग्युक्तः
ततश्चात्मानुभवेनतुष्टचित्तः।।अतःशरीरिणांदेवादीनामात्मभूतःअंतरायैर्नविहन्यसे।।अयंभावः।।यावद्देहभव
ययोरात्मकर्माणिकुर्यादिव।।तदनंतरंसर्वेषामात्मभूतत्वान्नकोपिविघ्नानाचरतीति।।तथाचश्रुतिः।।तस्यहन

तस्माद्युक्तेंद्रियग्रामोयुक्तचित्तइदंजगत्।।आत्मनीक्षस्वविततमात्मानंमय्यधीश्वरे।।९।।ज्ञानविज्ञा
नसंयुक्तआत्मभूतःशरीरिणां।।आत्मानुभवतुष्टात्मानांतरायैर्विहन्यसे।।१०।।दोषबुद्ध्योभयातीतो
निषेधान्ननिवर्तते।।गुणबुद्ध्याचविहितंनकरोतियथार्भकः।।११।।सर्वभूतसुहृच्छांतोज्ञानविज्ञान
निश्चयः।।पश्यन्मदात्मकंविश्वंनविपद्येतवैपुनः।।१२।।श्रीशुकउवाच।।इत्यादिष्टोभगवतामहाभाग
वतोनृप।।उद्धवःप्रणिपत्याहतत्त्वजिज्ञासुरच्युतं।।१३।। [illegible]

देवासुरभूताईशानेआत्मास्वेषांसम्भवतीति।।१०।।नचोभयज्ञानस्यापियथेष्टाचरणप्रसंगइत्याहदोषबुद्ध्येति
गुणदोषबुद्धीतोपिप्रोक्तनसंस्कारात्निषेधाद्विवर्ततएव।।किंतुनदोषबुद्ध्याविहितंप्रायशःकरोतिनगुण
बुद्ध्यायथार्भकःसंकल्पविकल्परहितः।।किंचिन्करोतिकुतश्चिन्निवर्ततेनतद्वत्।।११।।एवंभूतस्यपुनःसंसारइ
त्याहसर्वभूतेति।नविपद्येतनपुनःसंसरेत्।।१२।। ।।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्वं तु सर्वं परित्यज्योपाध्युपदेशमात्मनो योगं यं मत्वा नः॥ इत्यतीयोगे शांतियोगफलदायिन योगविदांस्मा मोनाग्रनिर्मा
ण्योनिर्लेपा विशेषः॥ यद्वा योगानि न्यस्तेक्रियत्वे यस्मिन् योगात्मनुयोगे आत्मा प्रकटो भवति यस्य योगस्वरूपेणैव
योगस्य संभवाय स्थात् चतुर्भिरेतैः संबोधनैः सम हि स्रोकेवलं त्वया पदिष्टं न त्वमदधिकारं पश्यामीत्यते योगितित्न
दाह निःश्रेयसायेति न चारोग्याय धर्मे सर्वस्वदानादिवदयस्मात्राः किंतु संन्यासलक्षणः अप्रमाणमिति रूपः यं प्रतिमा
गायकः पदिष्टं सोहं मूढमतिः अतः समेति आह मिति चसाधु वयं च सोहितेत्वन्माययाविरचिते आत्मनि देहेति

उद्धव
विदुर उवाच॥ योगेश योगविन्यास योगात्मन् योगसंभव॥ निःश्रेयसाय मे प्रोक्तस्त्यागः संन्यासलक्ष-
णः॥१४॥ त्यागोयं दुष्करो भूमन् कामानां विषयात्मभिः॥ सुतरां त्वयि सर्वात्मन्नभक्तैरिति मे मतिः॥ १५
सोहं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबंधे॥ तत्त्वंजसा निगदितं भव
ता यथाहं संसाधयामि भगवन्ननुशाधि भृत्यं॥१६॥ सत्यस्य ते स्वदृश आत्मन आत्मनोन्यं वक्तारमीश
विबुधेष्वपि नानुचक्षे॥ सर्वे विमोहितधियस्तव माययेमे ब्रह्मादयस्तनुभृतो बहिरर्थभावाः॥१७॥

गाढो विमग्नः तत्त्वं भवता निगदितं यथाहमंजसा सम्यक् साधयामि तथा भृत्यं माम् अनुशाधि शिक्षय॥१६॥ मयात्मा
ननु पतत्उक्तं विस्तरतः त्वयात॥ इत्यत आह सत्यस्येति स्वदृशः स्वप्रकाशस्य सत्यस्यात्मनः आत्मनो मां
प्रति वक्तारं तेत्वन्यं॥ अन्यं तावद्विबुधेषु अपि न पश्यामि सर्वज्ञाः स्वतः सिद्धज्ञाना नान्ये तो ममिति चाक्षत इत्यत आह॥ सर्वइ
ति॥ बहिर्वर्थभावा विषये वा यत्र हृदयः॥ १७॥८॥ ॥ राम॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

केचिद्गुः शीलाभवंति केचिन्मेविनः फलकाले विनश्यंति केचिद्दज्ञाः केचिद्दलो समर्थाः केचित्स्थानभ्रष्टाः तद्ध
हूमत्यैमनवद्यमित्यादीनि पंच विशेषणानि॥ तद्यतः कालतः पारं देशतश्च यस्य तं कालादिभिरकुंठो विकुंठलोकधि
ष्ण्यं यस्य तं इह भावद्रूरस्फुटनिर्वेदहेतुः वृजिनैर्दुःखैरभितप्तः इह कारणौ रवा याद्यप्रकाशोत्सुकः स्वपदं।
नीतः तद्वद्वयमपि त्वामविकुंठनाममनदाह॥ नारायणमिति॥ नरसखं कपितमाह॥ नरोजीवः तस्य सखायं भवंतं शर
णं प्रपद्ये॥१९॥ तदेव मम भावना विपरीतभावनाभ्यामुपदिष्टं तन्मनवगाहमानं प्रति तत्त्वविच्छन्नयेगुरूपदेशावि

तस्मात्त्वामनवद्यमनंतपारं सर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं॥ निर्विण्णधीरहमुहवृजिनाभितप्तो नारा
यणं नरसखं शरणं प्रपद्ये॥१९ श्रीभगवानुवाच॥ प्रायेणमनुजा लोके लोकतत्त्वविचक्षणाः॥ समुद्ध
रंति ह्यात्मनात्मानं आत्मनैवाशुभाशयात्॥२०॥ आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः॥ यत्प्रत्यक्षानुमाना
भ्यां श्रेयोसावनुविंदते॥२०॥ पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः॥ आविस्तरां प्रपश्यंति स
र्वशक्त्युपबृंहितं॥२१

विनापि स्वान्वयव्यतिरेकाभ्यामेव तत्त्वप्रतिपत्तिर्भवतीति दर्शयित्वमाह॥ प्रायेणेति॥ लोकतत्त्वस्य विचक्षणाः परीक्ष
काः अशुभाशयात् विषयवासनातः॥२०॥ तदुपपादयति आत्मनः पश्वादिशरीरेभ्यो विहितज्ञानगुरुः॥२१॥ तत्र
प्रमत्वे दर्शयति पुरुषत्वे चेति॥ तथा च श्रुतिः॥ पुरुषत्वेवाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति
विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोऽथेतरेषां पशूनामशनापिपासे एवाभि पा।

श्री॰ भा॰ टी॰ ३५

अतः पुरुषत्वं स्त्रीत्वं लिंगं केतिते ॥ २२ ॥ अनुमानमाह ॥ अत्रेति अत्र पौरुष्यां पुरि युक्ता अप्रमत्ताः अग्राह्यं ग्राहकेभ्यो हंकारादि
भ्यो व्यतिरिक्तं मां श्रद्धा साक्षात् ॥ मृगयंति मार्गयंति प्रकारद्वयमाह ॥ गृह्यमाणैर्बुद्ध्यादिभिः जडानां प्रकाश्याः स्वप्रका
शं मेकं विना न घटते अनुपपत्ति गुणैर्वलनतकैः तथा लिंगैर्व्याप्तिमद्भिः लिंगैरनुमानतः ईश्वरं प्रवर्तकं स्वायत्ते बुद्ध्या
दि करणानि कर्तृप्रयोज्यानि करणत्वात् दात्रादिवदिति ॥ २३ ॥ भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः दृश्यैर्बु

गुणैर्हेतुः

एकद्वित्रिचतुष्पादो बहुपादस्तथापदः ॥ बह्व्यः संति पुरः सृष्टास्तासां मे पौरुषी प्रिया ॥ २२ ॥ अत्र मां मा
र्गयंत्यद्धा युक्ता हेतुभिरीश्वरं ॥ गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानतः ॥ २३ ॥ अत्राप्युदाहरंतीममितिहासं
पुरातनं ॥ अवधूतस्य संवादं यदोरमिततेजसः ॥ २४ ॥ अवधूतं द्विजं कंचिच्चरंतमकुतोभयं ॥ कविं निरीक्ष्य
यदु३ तरुणं यदुः पप्रच्छ धर्मवित् ॥ २५ ॥ यदुरुवाच ॥ कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा ॥ यामासाद्य
भवाल्लोकं विद्वांश्चरति बालवत् ॥ २६ ॥ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः ॥ हेतुनैव समीहंते
आयुषो यशसः श्रियः ॥ २७ ॥ ॥

द्ध्यादिभिर्दृश्यैर्लक्षणैरनुमापकैर्विति ॥ न चैतावता आनुमानिक आत्मेति मंतव्यं देहादिव्यतिरिक्तत्वे यथार्थ
बुद्धिमात्रसंवादरूपेणैव निवर्तितत्वात् ॥ २४ ॥ भूयोऽन्वयव्यतिरेकाभ्यामसंभावनादिनिरसनार्थमितिहासमाह
अत्रापीति ॥ २५ ॥ सुविशारदा अतिनिपुणा ॥ २६ ॥ सर्वलोकवैलक्षण्यमाह प्राय इति धर्मादिषु विवित्सायां ज्ञा
नविचारे च मानवाः समीहंते अत्रापि आयुरादिहेतवा कामेन यत्र ॥ २७ ॥ ॥ ॐ नमो नारायणाय नमो नमः
राम ॥ ॥ राम ॥ ॥ राम ॥ ॥ राम ॥ ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्वं तु न कस्यचित्कर्मसंगाः कर्त्ता भवसि न च किंचिदीहसे इच्छसि न च शक्तो वा प्रमत्तो नेन वा अनैपुण्येन वा किं तु पत्वेन वा भवामि।
न या वाऽजो दासीचेट तएवं वनेऽथाहं कल्प इत्यादिना ॥२५॥ महामानं दग्धं तव कुतः इति पृच्छति जनेष्विति स्पर्शो विषयैः हीनस्य
विषयभोगरहितस्य सुखहेतुः केवलात्मनः कलत्रादिशून्यस्य तद्ब्रूहि ॥ वाणाश्रिताः स्वीकृता न तु पदे योजन उदासि पर्याः।

त्वं तु कल्पः कविर्दक्षः सुभगोऽमृतभाषिणः ॥ न करोषि नेहसे किंचिज्जडोन्मत्तपिशाचवत् ॥२६॥ जनेषु
दह्यमानेषु कामलोभदवाग्निना ॥ न तप्यसेऽग्निना मुक्तो गंगांभस्थ इव द्विपः ॥२७॥ त्वं हि नः पृच्छतां ब्रह्म
न्नात्मन्यानंदकारणं ॥ ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥२८॥ श्रीभगवानुवाच ॥ यदुनैवं म
हाभागो ब्रह्मण्येन सुमेधसा ॥ पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः ॥२९॥ ब्राह्मण उवाच ॥ संति
मे गुरवो राजन् बहवो बुद्ध्युपाश्रिताः ॥ यतो बुद्धिमुपादाय मुक्तोऽटामीह तान् शृणु ॥३०॥ पृथिवी वायु
राकाशमापोऽग्निश्चंद्रमा रविः ॥ कपोतोऽजगरः सिंधुः पतंगो मधुकृद्गजः ॥३१॥ मधुहा हरिणो मीनः
पिंगला कुररोऽर्भकः ॥ कुमारी शरकृत्सर्प ऊर्णनाभिः सुपेशकृत् ॥३२॥ एते मे गुरवो राजन् चतुर्विं
शतिराश्रिताः ॥ शिक्षा वृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ॥३४॥ ॥ यतो यदनुशिक्षामि यथा वा
नाहुषात्मज ॥ तत्तथा पुरुषव्याघ्र निबोध कथयामि ते ॥३५॥

दासि ॥३१॥ शोभनं रूपं कीटस्य करोतीति सुपेशस्कृत ॥३२॥ मे मया आश्रिता नाऽस्तदाह ॥ एतेषां वृत्तिभिर्वात्मनः शि
देहस्थोपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः ॥ अदेहस्थोपि देहस्थः कुमतिः स्वप्नदृग्यथा ॥८॥ इन्द्रियैरिन्द्रियार्थेषु गुणैरपि गुणेषु च ॥ गृह्यमाणेष्वहं कुर्यान्न विद्वान्यस्त्वविक्रियः ॥९॥ दैवाधीने शरीरेस्मिन्गुणभाव्येन कर्मणा ॥ वर्तमानोबुधस्तत्र कर्तास्मीति निबध्यते ॥१०॥ ॐ तस्मै रामाय नमः

मीति मतिं न कुर्यादित्यर्थः कुतः गुणा गुणेषु गृह्यमाणेषु अतएव अविक्रियः बाधादिशून्यः तदुक्तं गीतासु तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ इति ॥९॥ अबुधस्तु एवं कर्माधीनेस्मिन्नपि शरीरे वर्तमानः गुणैरिन्द्रियैर्भाव्येन कर्मणा नरदेहादौ निबध्यते ॥ कुतः कर्मास्मीत्यहंकारेण तदुक्तं तत्रैव प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ॥ अहंकारविमूढात्मा कर्ताहमिति मन्यते इति ॥१०॥ राम

राम राम ॥

105

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग.
टी.
५२

एतैः त्रिभिः श्लोकैः कथं वर्तेत यस्य प्रश्नस्योत्तरं उःरत सूक्ष्मो निरभिमानस्य देहे वर्तेत यस्य तस्य कथं भवति केवलत्वं णं ततरं
वदन् किं भुंजीत त्यादि प्रश्नो नस्माहुः एवमिति त्रिभिः ॥ अयं यतते मेव कर्माभ बध्नाती सेव विरक्तो विद्वान् ॥५ तथा विद्वानि
वशाय नासनादि भुंजन् बध्यते कुतः तत्र तत्र विषयेषु प्राणानींद्रियाणि आदयन् भोजयन् तत्स्मालिप्तेनवर्तमानः न तस्य
यमदन एतदेवकुतः न चाहं प्रकृतिस्थोपीति साईयया स्वं स्वर्णस्थितमपि न सज्जते यथा सविताजलप्रतिबिंबि

पूर्वं विरक्तः शयन आसनाटन मज्जने ॥ दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ॥ ।।। न तथा बध्यते वि
द्वान् तत्र तत्रादयन् गुणान् ॥ प्रकृतिस्थोप्यसंसक्तो यथा खं सवितानिलः ॥२॥ वैशारद्योलया संग
शितया छिन्नसंशयः ॥ प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्तते ॥ ३ ॥ यस्य स्युर्वीतसंकल्पाः प्राणें द्रि
यमनोधियां ॥ वृत्तयः स विनिर्मुक्तो देहस्थोपि हि तद्गुणैः ॥ ४ ॥।

तो पियथानिलः सर्वत्र संचरन्नपि तद्वत् ॥२॥ असंगेन वैराग्येण शितया तीक्ष्णया छिन्नाः संशया असंशाया
असंभावनादयो यस्य सः ॥ नानात्वात् देहादि प्रपंचात् ॥३॥ कथं विहरेदित्यस्योत्तरं त्वेन केवलत्वं णं तत्रमाह
यस्य स्युरिति तद्गुणैर्देहगुणैः संकल्पः ॥ त्र्यासाभिः प्राणादिवृत्तिभिर्विहरन्नुक्तः इत्यर्थः ॥४॥ ॥ ॥ राम ॥
राम राम राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवं नानादेहयुक्तयोः सर्वत्र युग्मे च वेलनत्वयुक्तं दाती केवलत्वं येन लत्वे विस्मोत्तरं तयापयात् संयुक्तेलत्

एवंतावद्वस्तुभक्तयोः स्वयं वेषमेव वेलन्तगणमुक्तं इदानीं केवलज्ञायेन लब्धगौरिमस्योन्नतनयापवैवपिमन्तेयंवेलन्न
एषमाह यस्मान्मेति त्रिभिः हिंसे उर्जनेरस्यैवांघाणिभिः यस्मान्नादेहः पीडनेयहेद्ध यायेनकेनापि कचितकिं
चित्स्वयमेतेवासः तुहस्वेतनत्वत्यतिक्रियते नानिविकिल्लियत इत्यर्थः नउक्तं याज्ञवल्क्यनयः केटके विविदतिवं
दतैर्यस्वलिंपति ॥ यदुक्तोपविनष्टस्वसमस्तस्य चतस्यचेति ॥५॥ किंच अमायुवाकुर्वतो वाजनान् ॥ नस्तवीनन

यस्मान्माहिंस्यते हिंस्रैः र्येन किंचिद्गृहस्थया ॥ अर्थितेवाक्कचित्तत्र नव्यातिक्रियते त्रयः ॥५॥ नस्तवी
ननिंदीतकुर्वतः साधुसाधुवा ॥ वदतो गुणादोषाभ्यां वर्जितः समनुकल्पितः ॥६॥ नकुर्यान्नवदेत्किं
चित्त्रयायेन्मायसाधुवा ॥ आत्मारामो नयाहृस्याविवेजडवन्मुनिः ॥७॥ शाब्दब्रह्मणि निष्णातो नवि
ष्णातोयात्परे यदि ॥ श्रमस्तस्यश्रमफलो ह्यधेनुमिव रक्षतः ॥८॥

चनिंदेतयोलौकिकव्यवहारे विमुखः सम्यक्कार इत्यर्थः ॥५॥ अपि वा न कुर्यादिति ॥ यो दैहिको पि कर्मण्युदासी
नः सम्यक्कारस्तवो वदइत्यर्थः ॥७॥ एतान्येव सर्वाणि सूत्रतोः साधनानि ज्ञातव्यानि यस्तु केवलं शाब्दब्रह्मण्येव नि
ष्णातो ऽपि मायाचक्राचीनकर्मैः साधनैः तदर्थनिष्ठो भवेत् + ध्यानाद्यभियोगं न कुर्यात्तस्य शास्त्रश्रमः श्रमैक ।
॥ फलः नतु पुरुषार्थपर्यवसायी ॥ यतश्चिरप्रसक्तो ॥८॥ ॥ ॥ राम ॥ ॥ ॥
+ ॥ यत् ॥ नंनिंदति शाब्दब्रह्मणि निष्णातः ...नो विपरे ब्रह्मणि न निष्णायात ॥+॥२ ॥

107

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री· भाग· टी· ५३

ते देवा स्वार्थनिदर्शने· अयं पंचयति गामि तिङुस्य तत्रैतिदेहः यद्यदुक्षयोदोहो नो जनवदो व्योवित्तयुस्माः तां अर्थयस्यां असतीं
भार्यां कांसंस्पृशांदेहं परायीनं प्रतिवचागां ङुः स्वदेहे तं च यद्यपि स्वा न ज्ञात्वा स्वायन स्पृशं पुत्रं अतीर्थीकृतं आत्मानं पाते दत्तं वि
तंडु श्रीर्तिडुरिता पादकं अंगं हे ङुस्व च ङुः स्वा न तं चङुः स्वत्से व य स्य सः च लति ॥ १९ ॥ न या हीनो वा च सिस्वकं विगुणो ति
य संसो जगतः श्रायकं चरित्रं नस्यात किं नत ॥ अस्य विषयस्य सिय्या दिह पं नद्धेत्र विपर्यः लीला च ना वे पुड्दे पितेज

ङुः स्व

गांडवयदोहामसंतीव भार्यादिहं पराधीन मस स्यजां च ॥ विनं त्वती र्थीकृतमं राचा चं हीनं मयाचलतितिङुः
स्वी ॥ १९ ॥ यस्यां नमे पावनमंगकर्म स्थित्यद्भव प्राणनिरोधमस्य ॥ लीलावतारे प्सितजन्म वा स्यात् वंध्यां
गिरं तां विभूयान्न धीरः ॥ २० ॥ एवं जिज्ञासयापोह्य नानात्वभ्रममात्मनि ॥ उपारमेत विरजं मनो मय्यर्प्य
सर्वगे ॥ २१ ॥ यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलं ॥ मयि सर्वाणि कर्माणि निरपेक्षः समाचर ॥ २२
श्रद्धालुर्मे कथाः शृण्वन् सुभद्रा लोकपावनीः ॥ गायन्ननुस्मरन् कर्म जन्म चाभिनयन्मुहुः ॥ २३ ॥ वाम

तः प्रेमास्पदं ॥ श्रीरामकृष्णादिजन्मवान स्यात् तां निष्फलां गिरं धीरो धीमान् धारयेत ॥ २० ॥ उक्तं ज्ञानमार्गमु
पसंहरति एवं निश्चिन्त्य विचारेणात्मनि नानात्वभ्रमं देहाद्यध्यासं निरस्य निर्मलं मनो मयि सर्वगे परिपूर्णे समर्प्य सं
यार्थउपारमेत तत्र किं चित्कुर्यात् तथा स्वरूपावस्थानमात्रेणोत्सर्थः ॥ २१ ॥ यद्यनीशः अशक्तः तर्हि आत्मानमिदं तत्र कै
वल्यार्थं भवि विषमिह त्यागमयीति ॥ २२ ॥ मदर्पणेन कर्मभिर्विशुद्धसत्त्वस्य तत्रैवाहं किमाह श्रद्धालुरिति ।

५३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आचरन्नेवमानः॥२४॥ ततज्ञानेनप्रकारेणमयिसत्संगेनलब्धयाभक्त्यासमभक्तःमांउपासितामामनाभवतिसच
ध्यानशीलःसद्भिर्दर्शितेनैवनिश्चितंस्वरूपेनैवमेपदंस्वरूपंप्राप्नोति॥२५॥ सत्संगलब्धयाभक्त्योद्धवेनततस्सतोभक्ते
स्वविशेषंपृच्छति॥ साधुरितिसाधवःस्वस्वमतिपरिकल्पितास्संतिबहवः नचतत्कीदृशाःस्वमतःभक्तिरपिब
हुविधालोकेकीदृशीत्वय्युपयुज्येतसद्भिस्तुनारदादिभिरादृता एतन्मेकथ्यतां॥२६॥ हृदंत्यातिप्रश्नंचत्रै

मदर्थेधर्मकामार्थानाचरन्मदपाश्रयः॥ लभतेनिश्चलांभक्तिंमय्युद्धवसनातने॥२४॥ सत्संगल
ब्धयाभक्त्यामयिमांसउपासिता॥ सवैमेदर्शितंसद्भिरंजसाविंदतेपदं॥२५॥ उद्धवउवाच॥ साधुस्तवोत्त
मश्लोकमतःकीदृग्विधःप्रभो॥ भक्तिस्त्वय्युपयुज्येतकीदृशीसद्भिरादृता॥२६॥ एतन्मेपुरुषाध्य
क्षलोकाध्यक्षजगत्प्रभो॥ प्रणतायानुरक्तायप्रपन्नायचकथ्यतां॥२७॥ त्वंब्रह्मपरमंव्योमपुरुषःप्र
कृतेःपरः॥ अवतीर्णोसिभगवन्स्वेच्छोपात्तपृथग्वपुः॥२८॥ श्रीभगवानुवाच॥ कृपालुरकृतद्रो
हःतितिक्षुःसर्वदेहिनां॥ सत्यसारोनवद्यात्मासमःसर्वोपकारकः॥२९॥ ॥ रामायनमः ॥ 107

बबहुवक्तव्यमिमैस्वर्यमाविकरोतिहेपुरुषाध्यक्षेत्यादिनाविशेषणादिविवरणं॥२७॥ अत्रहेतुः त्वमितित्वंव्योमवदसंग
यतःप्रकृतेःपरःस्वेच्छयाउपात्तंपृथग्वपुर्येनसः॥२८॥ तत्रचिह्नंलक्षणैःसाधुंनिरूपयतिकृपा
लुरितिपंचभिः कृपालुःपरदुःखासहिष्णुःसर्वदेहिनांकेषांचिदपिअकृतद्रोहःतितिक्षुःक्षमावान्सत्यसारः
सत्यमेवसारंस्थिरंबलंवावीर्ययस्यसः अनवद्यात्माअसूयादिरहितःस्वयोःसमःयथाशक्तिसर्वेषामुप।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री। भाग। टी। ५५

कामैरभिन्नचित्तः दांतः संयतबाह्येंद्रियः मृदुः अकठिनचित्तः शुचिः सदाचारः अकिंचनः अपरिग्रहः अनीहः दृष्ट
क्रियाशून्यः मितभुक् लघ्वाहारः शांतः नियतांतःकरणः स्थिरः स्वधर्मे मच्छरणः मदेकाश्रयः मुनिः मननशीलः ३०
अप्रमत्तः सावधानः गंभीरात्मा निर्विकारः धृतिमान् विपद्यपि अकृपणः जितषड्गुणः क्षुत्पिपासे शोकमोहौ जरामृ
त्यू षडूर्मयः एते जिता येन सः अमानी न मानाकांक्षी अन्येभ्यो मानदः कल्यः परबोधने दक्षः मैत्रः अवंचकः कारु
णिकः करुणयैव प्रवर्तमानः न तु दृष्टलोभेन कविः सम्यग्ज्ञानी ॥ ३१ ॥ तदेवमाज्ञायेत्यादिना कथयति मयावेदनु

कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः ॥ अनीहो मितभुक्शांतः स्थिरो मच्छरणो मुनिः ॥ ३० ॥ अप्रम
त्तो गभीरात्मा धृतिमान्जितषड्गुणः ॥ अमानी मानदः कल्यो मैत्रः कारुणिकः कविः ॥ ३१ ॥ आज्ञायैवं
गुणान्दोषान्मयादिष्टानपि स्वकान् ॥ धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः ॥ ३२ ॥ ज्ञात्वाज्ञात्वाथ
ये वै मां यावान्यश्चास्मि यादृशः ॥ भजंत्यनन्यभावेन ते मे भक्ततमा मताः ॥ ३३ ॥ ॥

षेणादिष्टानपि स्वधर्मान्संत्यज्य यो मां भजेत सोपि एवंभूतः पूर्वोक्तवत्सत्तमः किमज्ञानान्नास्तिक्याद्वा न धर्माचर
णे सत्त्वशुद्ध्यादीन्गुणान्विपक्षे दोषांश्च मयोक्तान्ज्ञात्वापि यो मद्ध्यानविक्षेपतया मद्भक्त्यैव सर्वं भविष्यतीति दृ
ढनिश्चयेनैव धर्मांस्त्यजेत् स च यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारतया संत्यज्य अथवा विद्धैकादशी कर्मसैकादश्युप
वासानुपवासात्रिवेध आज्ञादयो भक्तिविरुद्धान्धर्मान्संत्यज्येत्यर्थः ॥ ३२ ॥ किंच यावानदेशकालापरिच्छि
न्नः यश्च सर्वात्मा यादृशः सच्चिदानंदविग्रहः तं मां ज्ञात्वा अज्ञात्वापि यद्वा विशेषतः पुनः पुनर्ज्ञात्वा एकांतभावेन

११ ॥ एकादशटी ५५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लिंगानि प्रतिमादीनि ॥ २५ ॥ सर्वलाभोपहरणं सर्वस्थूलत्रुसासमर्पणं ॥ २६ ॥ पर्वाणि जन्माष्टम्यादीनि तद्दत्तमोदनेनं चसं
तोषः ॥ २७ ॥ बलिविधानेऽपुष्पोपहारादिसमर्पणं सर्ववार्षिकपर्वसु ऋतमासैकदशादिषु विशेषतः ॥ २८ ॥ उद्यानादि
करणे सामर्थ्ये सति स्वतः असति चान्यैः संभूय मिलित्वा उद्यमः उद्यानेऽपुष्पप्रधानेउपवनफलप्रधाने वनमाक्रीडं क्रीडा
स्थाने ॥ २९ ॥ समार्जनं जसोपानकस्थाउपलेपः गोमयोदकादिभिः आलेपनं सेकः स्लेरवेष्टनं मंडलवर्तनं सर्वतो

मल्लिंगमस्रकाजनदर्शनस्पर्शनार्चनं ॥ परिचर्यास्तुति प्रहरगुणकर्मकीर्तनं ॥ ३४ ॥ मत्कथाश्रवणे
श्रद्धा मदनुध्यानमेव च ॥ सर्वलाभोपहरणं दास्येनात्मनिवेदनं ॥ ३५ ॥ मज्जन्मकर्मकथनं मम पर्वानुमो
दनं ॥ गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सवः ॥ ३६ ॥ यात्रा बलिविधानं च सर्ववार्षिकपर्वसु ॥ वैदि
की तांत्रिकी दीक्षा मदीयव्रतधारणं ॥ ३७ ॥ ममार्चास्थापने श्रद्धा स्वतः संभूय चोद्यमः ॥ उद्यानोपव हस्य
नाक्रीडपुर मंदिरकर्मणि ॥ ३८ ॥ संमार्जनोपलेपाभ्यां सेकमंडलवर्तनैः ॥ गृहशुश्रूषणं म
ह्यं दासवद्यदमायया ॥ ३९ ॥ अमानित्वमदंभित्वं कृतस्यापरिकीर्तनं ॥ अपि दीपावलोकं मे नोपयु
ज्यान्निवेदितं ॥ ४० ॥ यद्विमासोपवासेस्तुयफलं परिकीर्तितं ॥ विलोनैवेद्यसिक्ते न तुप्यंत कुंजनैक

लो ५।

मद्यादिकरणां गुरूंसमम ॥ ३९ ॥ स्वयमन्येन वा निवेदितं स्वीकुर्यात् एतच्च साधारणस्थावरविषयं राजग्रामवि
षयं वा भक्ष्यादि ग्रासनेव ॥ ४० ॥ यदिष्टपशुखेनाममनेवेद्यमदेवहरेत ॥ पादोदकं च निर्माल्यमस्तके यस्य सोऽच्युत
इति वचनात् ॥ यद्वा अस्मै निवेदितं नोपयुंज्यात ॥ महत्वं न निवेदयेदित्यर्थः ॥ विलो निर्विदितानां तेनेन यत्सर्वदेव
तानेवे ॥ पितृभ्यश्च पितृदेवतानेत्यायकल्पते ॥ पितृशेषं तु यो दद्याद्दरये परमात्मने ॥ रेतोधाः पितरस्तस्य भवं
ति क्लेशभागिनः इत्यादिवचनेभ्यः ॥ ४० ॥ यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः ॥ तत्तन्निवेदयेन्मह्यं तदानं

यद्यदिष्टतमं लो
के यच्चातिप्रियमा
त्मनः ॥ तत्तन्निवे
दयेन्मह्यं तदानं
त्याय कल्पते ४१
त्रुटि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री॰ भा॰ ए॰ टी॰ ५५

इदानीमेकादश पूजाधिष्ठानान्याह सूर्य इति हे भद्र ॥४२॥ अधिष्ठानभेदेन पूजासाधनान्याह त्रय्या विद्यया सूक्तैरुप-
स्थानादिना अंग हे उद्धव यवसादिना तृणादिना ॥४३॥ बंधुसत्कृत्या बंधुसंमानेन ॥ हृदि खे हृदयाकाशे मुख्यधि- 112

सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलं ॥ भूतात्मा सर्वभूतानि भद्र पूजापदानि मे ॥४२॥ सूर्ये तु विद्य-
या त्रय्या हविषाग्नौ यजेत मां ॥ आतिथ्येन तु विप्राग्र्ये गोष्वंग यवसादिना ॥४३॥ वैष्णवे बंधुसत्कृत्या
हृदि खे ध्याननिष्ठया ॥ वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ॥४४॥ स्थंडिले मंत्रहृदयैर्भोगै-
रात्मानमात्मनि ॥ क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत मां ॥४५॥ धिष्ण्ये-
ष्वित्येषु मद्रूपं शंखचक्रगदांबुजैः ॥ युक्तं चतुर्भुजं शांतं
ध्यायन्नर्चेत्समाहितः ॥४६॥ राम

या प्राणदृष्ट्या इतरत्स्पष्टं ॥ ततथा च तोयैस्तोयादिभिर्द्रव्यैस्तर्पणादिना एवं वायोश्चेति ॥४४॥ स्थंडिलेषु विमं-
त्रहृदयैः रहस्यमंत्रन्यासैः सर्वाधिष्ठानेषु ध्येयमाह ॥४५॥ सर्वाधिष्ठानेषु ध्येयमाह ॥ धिष्ण्येष्वित्यने-
न प्रकारेणैतेषु धिष्ण्येषु ॥४६॥ ॥ श्रीरामायनमः ॥ ॥
रामायनमः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उक्ताया भक्तेः फलमाह इष्टापूर्तेनेति सद्भक्तिं दृढां भक्तिं अस्या भक्तेरंतरंगं साधनमाह || मत्स्मृतिः साधुसेवया भ
वति || यद्वा स्मृतिर्ज्ञानं न तु स्वरूपं भक्तिमतः पुंसः साधुसेवया मत्ज्ञानं भवतीत्यर्थः || ४७ || ज्ञानभक्तिमार्गोक्तेभ्यो तंत्रज्ञा
नमार्गादपि भक्तिमार्गः श्रेष्ठ इत्याह प्रायेणेति सत्संगेन यो भक्तियोगः तेन विनोपायः संसारतरणे न विद्यते सत्सं
गेनैव अत्र हेतुमाह || हि यस्मात् सम्यक् सतामहं प्रायणं प्रकृष्टमयनमाश्रयः अतः सत्संगो मय्येतरं गामर्थः || धृष्ट
इदानीं सांख्ययोगादीनि साधनांतराणि सत्संगापेक्षाणि च सत्संगस्तु स्वतंत्र एव समर्थः || फलाव्यभिचारी |

इष्टापूर्तेन मामेवं यो यजेत समाहितः || लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया || ४७ || प्रायेण भक्ति
सम्यक् योगेन सत्संगेन विनोद्धव || नोपायो विद्यते सम्यक् प्रायणं हि सतामहं || ४८ || अथैतत्परमं गुह्यं श्रृ
ण्वतो यदुनंदन || सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा || ४९ || इति श्रीभागवते एकादशस्कंधे
एकादशोऽध्यायः ॥ श्रीभगवानुवाच || न रोधयति मां योगो न सांख्यं धर्म उद्धव न स्वाध्यायस्त
पस्त्यागो नेष्टापूर्तं न दक्षिणाः || १ ||

चेति वर्णयितुमाह || अथेति || एतद्गुह्यमाख्यानं परमं गोप्यं श्रृणु एवमर्थः || ४९ || इति श्रीभावार्थदीपिका
यामेकादशे एकादशः || ११ || द्वादशे साधुसंगस्य महिमा वर्णितः स्फुटः || कर्मज्ञानानां त्यागव्यवस्था च ततः परे
नरोधयति न वशीकरोतीति योगः आसनप्राणायामादिः सांख्यं तत्त्वानां विवेकः धर्मः सामान्यतो हिंसादिः स्वा
ध्यायो वेदजपः कृच्छ्रादिः त्यागः संन्यासः इष्टापूर्तं इष्टं च पूर्तं च तत्रेष्टमग्निहोत्रादि पूर्तं कूपारामादिनिर्मा
णं दक्षिणा माहात्म्य नाम्ना व्रतो दानं तस्य सते || १ || ॥ राम ||

113

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री॰ भाग॰ टी॰ ५८

व्रतानि एकादश्यादीनि यज्ञः देवपूजा छन्दांसि रहस्यमन्त्राः॥ अवरुन्धे वशीकरोति॥ १॥ यातुधाना राक्षसाः॥ २॥
त्वाष्ट्रो वृत्रः कायाधवः प्रह्लादः॥ ५॥ ऋक्षो जाम्बवान् गृध्रः जटायुः वणिक्पथः तुलाधारः व्याधः धर्मव्याधः यज्ञप
त्न्यः दीक्षितब्राह्मण्यः॥ ६॥ तेषां सत्सङ्ग एव साधनमित्याह नाधीता श्रुतिगणा नाधीतश्रुतिगणाः॥ श्रुतिगणा यैः तदर्थं च

व्रतानि यज्ञश्छन्दांसि तीर्थानि नियमा यमाः॥ यथावरुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम्॥ २॥ सत्सङ्गेन हि
दैतेया यातुधाना मृगाः खगाः॥ गन्धर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः॥ ३॥ विद्याधरा मनुष्ये
ष्वाश्च वैश्याः शूद्राः स्त्रियोऽन्त्यजाः॥ रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगेऽनघ॥ ४॥ बहवो मत्पदं प्राप्ता
स्त्वाष्ट्रकायाधवादयः॥ वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः॥ ५॥ सुग्री
वो हनुमानृक्षो गजो गृध्रो वणिक्पथः॥ व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे
६॥ ते नाधीतश्रुतिगणा नोपासितमहत्तमाः॥ अव्रतातप्ततपसः श्लो ३
सत्सङ्गान्मामुपागताः॥ ७॥ रामायनमः

न उपासिता महत्तमा यैः ते न तथा॥ किं च अव्रता अतप्ततपसः न व्रतानि येषां न तप्तानि तपांसि यैः ते च ते च तथा सत्
सङ्गात् सत्सङ्गात्॥ इति सद्भिः सङ्गो नाम सर्वेषां सङ्गाः इत्यभिप्रायोक्तिः॥ यद्वा सङ्गस्य अपि सत्सङ्गत्वं विविच्यते स्व
सापि सत्वात् य॥ ७॥ रामायनमः॥ ॥

५८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र वृत्रादीनां भववन्नाम कथंचित्साधनांतरं गोपीप्रभृतीनां तु नास्तीत्याह केवलेनेति सत्संगालब्धेन केवलेनैव
भावेन श्रीमान्नगाः यमलार्जुनादयः नागाः कालियादयः यद्वा तदानीं तत्र सर्वत्र तृणगुल्मादीनामपि भगवति भा
वोस्तीति गम्यते तत्तु कथं यावत्तैव॥ अहो अमी देववरामरार्चितं पादांबुजं ते सुमनः फलार्हणं नमंत्युपादाय शिखाभि
रात्मनस्तमोपहत्यै तरुजन्म यत्कृतमित्यादि सिद्धाः कृतार्थाः संत ईयुः प्रापुः॥८॥ सत्संगस्य दुर्लभत्वमाह॥ यमि
ति योगादिभिः कृतप्रयत्नोपि येन प्राप्नुयात्तं मामीयुरिति पूर्वेणान्वयः॥ अत्र च प्रथमे योगाध्यः पश्चादयोवा

केवलेन हि भावेन गोप्यो गावो नगा मृगाः॥ येऽन्ये मूढधियो नागाः सिद्धा मामीयुरंजसा॥८॥ येन योगे
न सांख्येन दानव्रततपोध्वरैः॥ व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि॥९॥ रामेण सार्द्धं मथुरां॥
प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः॥ विगाढभावेन न मे वियोगतीव्राधयोन्यं ददृशुः सुखाय॥१०॥
ताः ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृंदावनगोचरेण॥ क्षणार्द्धवत्ताः पुनरंग तासां हीना मया कल्प
समा बभूवुः॥११॥

श्री हृत्लेन सह संगताः ते संतः सत्संगोऽस्येषां सत्संगाः तेन च तेषां भक्तिरिति ज्ञातव्यं॥९॥ गोपीनां भावं प्रपंचयति
रामेणेति त्रिभिः श्वाफल्किनाक्रूरेण मथुरां प्रणीते सति मे मत्तोन्यं सुखाय न ददृशुः कुतः वियोगेन तीव्राः आ
ह्व आधयो यासां ताः अत्र हेतुः न विद्यते गाढेनातिदृढेन भावेन प्रेम्णा अनुरक्तानि मे सक्तानि चित्तानि यासां ताः
तत्राधिक्ये च कारणं तास्ता इति मया सह या एव क्षपा रात्रयः क्षणार्द्धवत्सीनाः ता एव पुनः मया हीनाः तासां कल्प
समा बभूवुः॥ कथंभूताः ताः ताः वाचामगोचरा इत्यर्थः॥११॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग
टी.
५८

किंच एवंतीव्राथयस्मात्मोहमिषेणास्मात्स्वांसाहंमत्वाहनाइति मयि प्रवर्तते तदा स्वयमेव ब्रह्मथियो यामिरत्नाः स्वमा
त्मानं स्वदेहं प्रवृत्तः हृदयस्थं इदं सन्निहितं च नाविदन ॥ यद्वा सर्वपति प्रभृत्यादि आत्मानमहंकारः स्वदेश्वरदः परे लोके इदं
इमे लोके च नाविदन्निति यथा शुनयः समाधौ नाम रूपं न विदुः तद्वत् ॥ किं तु अविद्यिनो येन यद्वत् समयि प्रविष्टा इव
त्वयः ॥ २ ॥ एवं ता अबलाः केवलं मत्कामाः अस्वरूपविदः ॥ स्वरूपं तु न जानंतितया पिसम्बंगात् परं ब्रह्मसार।

कमेर

तानाविदन्न यत्तु संगावद्धधियः स्वमात्मानमदः तथेदं ॥ यथा समाधौ मुनयो ब्धि नो येन यथा प्रविष्टा इव
नामरूपे ॥ २ ॥ मत्कामा रमणं जारमस्वरूपविदो ऽबलाः ॥ ब्रह्म मां परमं प्रापुः संगाच्छतसहस्रशः ॥ ३
तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनां ॥ प्रवृत्तिं च निवृत्तिं च श्रोतव्यं श्रुतमेव च ॥ ४ ॥ मामेव शरणं
आत्मानं सर्वदेहिनां ॥ याहि सर्वात्मभावेन मया स्या ह्यकुतोभयः ॥ ५ ॥ उद्धव उवाच ॥ संशयः शृण्वतो
वाचं तव योगेश्वरेश्वर ॥ न निवर्तत आत्मस्थो येन भ्राम्यति मे मनः ॥ ६ ॥ ॥

स्यर

बुद्धिवेयमपि ब्रह्मस्वरूपमेव मायपरं प्राप्नुवि मुर्च्छः ॥ २ ॥ यस्मादेवं भूतो मत्संगजनप्रभावः तस्मात्त्वं चोदनां श्रुति
प्रतिचोदनां स्मृतिं चैव यद्वा विधिं च निषेधं च उत्सृज्य परित्यज्य मामेव शरणं याहि मयैव अकुतोभयः स्याः अत्र
पूर्वं तावत् मयोदितेषु वर्णितः स्वधर्मेष्विमादिना कर्मकर्तव्यमित्युक्तं इदानीं तु सर्वं त्यक्त्वा मां शरणं याहीत्यु
च्यते तत्र किमात्मनः कर्तव्यमिति वेत्स्यामीत्यस्य आत्मविषयः संशयो न निवर्तते यद्वा कर्मकार्यं मया त्यक्तव्यं वा
त्यक्त्वा इति संशयो न निवर्तत इति एवं तिसंशयश्नियेन संशयेन ॥ ६ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उक्तं वेसपषड्मष्टभिः अयंभावः ईश्वरस्तावत्स्वमाया वश्यात्प्रपंचात्मनाभातितत्प्रपंचाध्यासाच्च जीवात्मसनाघ॥ याकर्तृत्वादितनाविधिप्रतिषेधाधिकारः नदानींसत्वश्रद्धयार्थकर्माणि ऊर्ध्वं त्यक्त्वा सत्वेचपुत्रेदेहेषु नः कर्मजायप॥ विहारायभक्तिविलेपककर्मादरं परित्यज्य दृढविश्वासेन भजेदनुक्तं जानातीत्यतद्विधायोनकिंचित्कर्तव्यमस्ती तितत्त्वावदीश्वरेहागादीन्द्रियद्वाराजीवसंसृतिकारणाभूतप्रपंचोद्भममाह स ताईश्वरात्रिभिः स एषः अपरोक्षतः जी वयतीतिजीवः परमेश्वरः अपरोक्षत्वेहेतुः विवरेषु आधारादिचक्रेषु प्रसूतिरभिव्यक्तिर्यस्य सः तामेवाभिव्या।

श्रीभगवानुवाच॥ स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः॥ मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः॥ १७

क्तिमाह॥ घोषेणेति घोषेण परारव्येन नादवता प्राणेन सह गुहां आधारचक्रं प्रविष्टः सन मनोमयं सूक्ष्मं रूपं पश्यन्त्याख्यं मध्यमाख्यं च मणिपूरचक्रे विशुद्धिचक्रे च उपेत्य मुखे मात्रा ह्रस्वादिः स्वर उदात्तादिः वर्णः अकारादिरित्येवं वैखर्याख्यः स्थविष्ठः अतिस्थूलो नाना वेदशाखात्मको भवति तथा च श्रुतिः चत्वा रि वाक्परिमितापदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदं न्ति अभिप्रेतं श्लोकस्यास्याभिप्रायं वरुणा सदनाद्युच्चैर्वृत्ती विघहिं वृणानतः प्राकटकरणेः प्राणासंगात्स्वस्तो। नोपलभ्यतीत्यस्य मञ्जुदितं मम यथा बुद्धिसंस्पर्शादेव कैवल्यविशदो वेलवी च प्रयच्छति॥१७॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ तस्यास्य सतः सूक्ष्मरूपस्य मत्क्रमेणाभिव्यक्तौ दृष्टान्तः यथेति यथाग्निः॥ खे ऊष्माऽव्यक्तो वह्निरूपः दारुण्यधिकं॥
मथ्यमानः अनिलसहायः सन् अणुः सूक्ष्मविस्फुलिंगादिरूपो भवति पुनः प्रकृष्टो जातो हविषा संवर्द्धते त॥
थैव मे वाणी मम अभिव्यक्तिः॥ ५७॥ उक्तां वाग्वृत्तिमुपसंहरन् इतरेंद्रियवृत्तिरपि दिशति एवं गदिः गदनं भा

यथानलः खेऽनिलबन्धुरुष्मा बलेन दारुण्यधिमथ्यमानः॥ अणुः प्रजातो
हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी॥ ५८ ॥ एवं गदिः कर्म गतिर्वि
सर्गो घ्राणो रसो दृक्स्पर्शः श्रुतिश्च॥ संकल्पविज्ञानमथाभिमानः सूत्रं र
जः सत्त्वतमोविकारः॥ ५९॥ रामजयी

षणं मे व्यक्तिः विनुपसंहारः कर्म हस्तयोः इति निर्गतिः पादयोः विसर्गः पायूपस्थयोः इति कर्मेन्द्रियाणां घ्रा
णं अवघ्राणं रसो रसनं दृक् दर्शनं स्पर्शः स्पर्शनं श्रुतिः श्रवणं इति ज्ञानेन्द्रियाणां संकल्पो मनसः वि
ज्ञानं बुद्धिचित्तयोः॥ अभिमानो अहंकारस्य सूत्रं प्रधानस्य सत्त्वरजस्तमसां विका॥
[illegible] विविधः प्रपंचः मे व्यक्तिरिति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

119

तस्मादीश्वराभिव्यक्तिरूप: प्रपंचो नेश्वरात्प्रपंचो भिन्नोस्तीत्याह ॥ अयमिति अयं जीव: ईश्वर: आदावव्यक्त एक एव वय
सा कालेन विश्लिष्टा विसक्ता: वागादीन्द्रियरूपा: शक्तयो यस्य यद्वा विशेषेण श्लिष्टा ॥ अलिंगिता मायाशक्तिर्येन स:
बहुप्रकारइव भातीत्यन्वय: बाद्य: त्रिवृत् त्रिगुणा अयः अब्जयोनि: लोकपद्मस्य कारणभूत: एकस्य बहुधाभा
ने दृष्टांत: योनिं क्षेत्रं प्रतिपद्य प्राप्य बीजानि यद्वदिति ॥ २० ॥ तस्मात्तन्मायया विलसितत्वात्तदात्मकमिदं जग

अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स आद्य: ॥ विश्लिष्टश
क्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत् ॥ २० ॥ यस्मिन्निदं प्रोत
मशेषमोतं पटो यथा तंतुवितानसंस्थ: ॥ य एष संसारतरु: पुराण:
कर्मात्मक: पुष्पफले प्रसूते ॥ २१ ॥ ॥

त् न तत: पृथगिति सदृष्टांतमाह यस्मिन्निदमिति ॥ २० ॥ तंतुविताने संस्था स्थितिर्यस्य स: पटो यथा तथा
यस्मिन् ॥ इदं विश्वमोतं दीर्घतंतुषु पटवत्प्रोतं तिर्यक्तंतुष्विव एवंभूते समष्टिव्यष्ट्यात्मकं विश्वमविद्यात्मका
भिव्यक्तं हृत्तरूपं जीवस्य कर्तृत्वादिसंसारहेतु: ॥ अतस्तद्विवेकज्ञानेन कर्मादि सर्वं त्याज्यमित्युक्त ॥ वृक्षरूपेणाये
नाह ॥ य एष वर्तते सोऽसौ संसृति: पुराण: अनादि: कर्मात्मक: प्रवृत्तिस्वभाव: पुष्पफले भोगापवर्गौ कर्मफले वा ॥
प्रसूते जनयति ॥ २१ ॥ राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भा० टी० ५५

वृक्षरूपकं प्रपंचयति ॥ द्वे पुण्यपापे ॥ अस्य बीजे शतं च परिमिता वासना मूलानि यस्य ॥ त्रयो गुणाः ।
नालानि प्रकांडः पंच भूतानि स्कंधः यस्य पंच रसाः शब्दादयः प्रसूतिर्यस्मात् दशैकादशेन्द्रियाणि शाखा यस्य द्वयोः
सुपर्णयोर्जीवपरमात्मनोर्नीडं यस्मिन् ॥ त्रीणि वल्कलानि त्वचो वातपित्तश्लेष्माणो यस्य द्वे सुखदुःखे फले यस्य

द्वे अस्य बीजे शतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः ॥ दशैकशा
खो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः ॥२१॥ अदंति चैकं
फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः ॥ हंसा य एकं बहुरूपमि
ज्यैर्मायामयं वेद स वेद वेदम् ॥२२॥ ॥ ओं नमो रामाय नमः ॥

सः अर्कं प्रविष्टः सूर्यमंडलपर्यंतं व्याप्तः तं निर्भिद्य यातस्य संसाराभावात् ॥२१॥ तत्फलभोक्तॄनाह गृध्रा इति
गृध्राः कामिनः ग्रामेचरा गृहस्थाः अस्य वृक्षस्य एकं फलं दुःखमदंति पचिणा मतः ॥ स्वर्गादेरपि दुःखरूप
त्वात् ॥ हंसा विवेकिनः अरण्यवासिनः संन्यासिन एकं फलं सुखमदंति ॥ एकं परमात्मानं मायामयं एवं बहु
रूपमिज्यैः गुरुभिः कृत्वा यो वेद तत्त्वार्थवेद ॥२२॥ ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग
टी
९५

ननु यः परिपाल्यमानोऽपि मृषेति मन्यते किं मिति तेन तत्र पश्यति तद्दिने देहे त्वस्माहं देहोऽपीति दैववशोऽन
गच्छन् स्वारंभकं कर्म यावद्दृष्टिनावस्थितं तत्प्रतिसमीक्षत एव सासुः प्राणेंद्रियसहितः ननु तर्हि तत्सिक्त
द्रासंगे तत्रापि तेनाहंतामिति स्वाप्नं वप्रपंचमधिरूढः समाधिपर्यंतो योगो येन अत एव प्रतिबुद्धवस्तु
तत्परमार्थं वस्तु येन सः तथाभूतः न स्मरतावदेवैविरयावत्र विमोऽस्ये ॥ प्रतिक्रमसप्तस्य न रति ॥३७॥ उक्तोऽर्थं
दिस्वाप्नसार्थं स्वरूपमाह ॥ मयेति सांख्ये आत्मानात्मविवेकः योगोऽष्टांगः तयोर्गुह्यं रहस्यं यज्ञं विष्णुमुखं

११ देहोऽपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः ॥ तं सप्रपंचमधिरूढसमा
धियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥३७॥ मयैतदुक्तं वो विप्रा गुह्यं यत्सांख्ययोगयोः ॥ जानी
स्य३ त मागतं यज्ञं युष्मद्धर्मविवक्षया ॥३८॥ अहं योगस्य सांख्यस्य सत्यस्य तेजसः ॥ परायणं द्विजश्रेष्ठाः प्रियं
स्य३ श्रियः कीर्तेर्दमस्य च ॥३९॥ मां भजंति गुणाः सर्वे निर्गुणं निरपेक्षकं ॥ सुहृदं परमात्मानं सा
म्यासंगादयोऽगुणाः ॥४०॥ इति मे छिन्नसंदेहा मुनयः सनकादयः ॥ सभाजयित्वा परया भक्त्यागृ
णत संस्तवैः ॥४१॥ तैरहं पूजितः सम्यक् संस्तुतः परमर्षिभिः ॥ प्रत्येयाय स्वकं धाम पश्यतः परमे
ष्ठिनः ॥४२॥ इति श्रीभागवते एकादशस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ॥

युष्मद्धर्मविवक्षया युष्मत्परिहाराय इति तेऽयम ॥३८॥ अतएव तु यतेऽहं मद्रूपेणात्मनस्तावान् ॥ अगतावमावेव
तेनु वादो भविष्यति ॥ कृ तत्र सत्यं यमानो धर्मः ॥ सत्यम ऋतं यमनोधर्मः तेजः प्रभावः एते षां परमयनम् ॥३९॥
किं च मामिति कथंभूतं अगुणानां गुणानामिति मद्रूपान्भवंतीति किं तु नित्याः इत्यर्थः ॥४०॥ मे मया अगृणत संस्त
वैः प्रतीयाय प्रत्यागतोऽस्मि ॥४२॥ इति श्रीभावार्थदीपिकायां एकादशे त्रयोदशः ॥१३॥ ॥

९५ 121

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मनुगानादिदर्शयति ॥ इत्तितेतिरदं जगदिभ्रममोहेणा तत्र देहवासनो विज्ञेभिनवात दृष्टनात विनाशि
नाश्युत्समवत ॥ प्रतिचंचललताच्च अलातचक्रवत ॥ ननु भ्रमो पि निर्विषायाः कथं स्यात्तत्राह वितान मिति नि
गमनं तस्मात्रिधा यत्रिगुणापरिणाम कृतो विकल्पे भेदः समायेति ॥ २४ ॥ तस्मात्ततो दृश्यात् इंद्रियोपरतिर्वि ॥
सतित्तत्वबोधनुभवाभवति तत्र अत्यार्थं च निवृत्तान्तलेः तल्लीनिरीहस्मभवेत ॥ मनो कायवाप्यापारवर्हि
तः स्पर्शः नवदेहवतः सर्वथाद्वै तदृष्टिप्रतिनिवर्तनायोगात्तुन संसारस्यानतत्राह संस्र रूपतेइतिद्वाभ्यां चिदा 122

ईश्वेन विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं ॥ विज्ञानमेकमुरुधेव वि
भातिमायास्वप्नस्त्रिधागुणविसर्गकृतो विकल्पः ॥ २४ ॥ दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्ण
स्तूष्णीं भवेन्निजसुखानुभवो निरीहः ॥ संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत्स्मृति
रानिपातात् ॥ २५ ॥ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं ॥ दैवाद
पेतमुत दैववशादुपेतं वासो यथा परिकृतं मदिरामदांधः ॥ २६ ॥ ॥

वपुषः कायहारादिषु यद्यपी दृश्यते तथापि पूर्ववदवस्तुबुद्ध्याय त्यक्तं भ्रमाय न भवेद्देहं किं तु देहपात
पर्यन्तस्मृतिः संस्कारमात्रेणाभासमात्रं भवेदित्यर्थः ॥ २५ ॥ एतदेवोपपादयति देहमिति ॥ आसनादुत्थित
उत्थायान्यत्र तत्रैवावस्थितं तेन ततः क्वचिद्दपेतं निर्गतं पुनस्तत्रैवोपेतं वा देहं सिद्धो न पश्यति न जानाति एतत् ॥ यत
देहनस्वरूपमध्यगमत ॥ ज्ञानवान् ॥ तदेहं यतः कारणादिति सापरिकृतं परिहितं वासो गतं स्थितं वा यथा
न वेत्ति तद्वत् ॥ २६ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग
टी
९४

ननु कथं बोधशमितवर्णाश्रमकर्मादिनानाधीर्निवर्तत इत्यत आह ॥ असत्त्वादिति भावा देहादीनां तत्कृता भिदा वर्णा-
श्रमादिरूपा गतयः स्वर्गादिफलानि हेतवः कर्माणि वा अस्यात्मनो मृषा अविद्यावद्विषयो वेद इति भावः ॥ ३ ॥
शुक्तिभिरिवसंकेता एव युक्तीराह द्वय इति ॥ प्रपञ्चस्य सत्यत्वाद्देहादीन् समस्तकरणैः चक्षुरादिभिर्भुंक्ते कथंभू-
तानन्वनुक्षणधर्मिणः क्षणिकत्वात् तत्तात्कालिकस्वभावान् एवं जाग्रद्रसस्वप्नेषु हृदि जागरदृष्टसदृशान् वासनामयान्
भुंक्ते सुषुप्ते सर्वानुपसंहरति स एकः अतः त्रिगुणवृत्तिदृक् ॥ एवमवस्थात्रयेऽपि द्रष्टा ॥ ननु जाग्रदवस्थास्व
वेन्द्रियाणि पश्यन्ति स्वप्ने मनः सुषुप्तौ तत्संस्कारयोगाद् बुद्धिः कथमात्मनस्तद्द्रष्टृत्वमत्राह ॥ इन्द्रियेशाधिपतिः स्मृ

असत्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा ॥ गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥ ३ ॥ यो जागरे ब-
हिरनुक्षणधर्मिणोऽर्थान् भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षान् ॥ स्वप्ने सुषुप्त उपसंहरते स एकः स्मृ-
त्यन्वयात् त्रिगुणवृत्तिदृगिन्द्रियेशः ॥ ४ ॥ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता इ-
ति निश्चितार्थाः ॥ संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माखिलसंशयाधिम् ॥ ५ ॥

तेजसप्राज्ञाभिन्नाः अतः स्मृत्यन्वयात् तिसृणां अवस्थानां व्याप्तत्वात् ॥ यस्तु मानसात् स्वप्नदर्शने तरन् किंवि-
द्वेत्ति स एव ॥ एतर्हि जाग्रति मिथ्यात्वात् भेदेन विश्वादिव्यवहार इति भावः अत एव जाग्रदवस्थास्वप्नसुषुप्त्यवस्थापन्ना
नेनात्मैकोऽद्वय एव ॥ ४ ॥ ततः किमत आह ॥ एवमिति ॥ गुणतो मनसः त्र्यवस्थाः जाग्रदादयः ताः मन्मायया
मयि कृता ॥ ततस्ततः सतीति निश्चितार्थाः सन्तः अनुमानं सदुक्तिः श्रुतिश्च तीक्ष्णो ज्ञानासिना हार्दमहंकारं संछि-
द्य मां भजत किंच अखिलसंशयाधिं हृदि स्थितं भजने नैव छिन्नं भवति इत्याह ॥ ५ ॥ ईक्षेतेति ॥ सत्ताम् अपेक्ष्य:

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न तु तर्हि कथं अहं ज्ञानी भोक्तास्मीति व्यवहारः ॥ अविद्यया आत्मनः मुक्तिस्वरूपस्य भयेति संसृतिः बुद्धित
याविद्यो यस्मात् आत्मनो गुणाहंकारो दृश्यते ॥ यावत्कालपर्यंतं स्थितः तावत् संसृतिर्वा ॥ तत्र ह्यात्मगुणवृत्तिस
गुणानां च तस्य ज्ञानाभावो भवति ॥ ॥ आत्मनः संसृतिबंधः कल्पितः ॥ अहंकारेण तद्बंधन
आत्मनः पार्थ विपर्ययं अनात्मनि यो विद्वान् ज्ञात्वा ॥ निवृत्तः स्वेच्छया ज्ञानार्थं स्थितो

यत्संसृतिसंयोगो यदात्मनो गुणवृत्तिदः ॥ अविविक्तो हि तस्य तावत्
स्यात्कलहकारिता ॥ अहंकारकर्तृत्वं आत्मनोऽर्थविपर्ययः
विहाय त्रिविधं संसारचिंतां तेषां विमुक्तः तेन ॥ तावज्ज्ञानार्थं धीः
मोऽनिवर्तितयुक्तिभिः ॥ तापत्रयविपाकः स्वप्नजागरणं
यथा ॥ २० ॥ ॥

भृत्यसंसारकिंतां ॥ संसारे बुद्धिः नश्यति चिंतामात्रेण अनंतकृतं भोगचिंतां च भजेदिति ॥ २९ ॥ यावद्देहं
न मेनं तावत्तस्य कर्मसंज्ञानां हि सर्वं व्यक्तमित्याह ॥ यावदिति यद्यपि ज्ञानी कर्मादिषु तथापि स्वमा
त्रपरत्रिविधं भवति यतो यस्य यद्यथा तज्ज्ञानं स्वस्वमते दृष्टांतः
मनसि ॥ २० ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भाग टी ५२

एवं प्रश्नं श्रुत्वा नमिषे येनैवात्मस्वरूपं मामन्यतो निरूप्य वृत्तगुणो पिण्डः पदि हरेयुक्तं तत्रोत्तरमाह गुणे
ष्वाविशतेत्यादिना पाञ्चस्थ्याय संसारमिति श्रुत्वा यस्मिन्नध्यायः यदि कर्तृत्वं भोक्तृत्वं रूपं तद्यत्र विषये संश्रयितं चित्तं
स्यादिति शङ्कां वा चरमो जीवस्य स्वरूपं भवेत् ॥ नान्तः स्वद्वियोगेन च वर्त्तनं स्वरूपं सह अह्वे विना स्यात्तेन
गुणाः अत्र जागृत्या विषयेषु प्रविष्टं जीवस्य तत्र स्व स्वरूपं भावनया विषयाणां चेतसि स्थिता नानुसन्धा
नेन सर्वतो निर्विषयं श्रीभगवत्स्वरूपं भवतीति परिहाराय स्वरूपं स्थानमिति स्वज्ञः गुणकाः मत्स्य गुणो
वेन न्याविशति गुणाश्चेतसि एवं गुणाः चेतसि श्रयन्ते स्थिते मदात्मनो ब्रह्मस्वरूपस्य जीवस्य देहः सम्य

गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः ॥ जीवस्य देह उभयं गुणाश्चेतो मदा
त्मनः ॥ २५ ॥ गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ॥ गुणाश्च चित्तप्रभवा म
द्रूप उभयं त्यजेत् ॥ २६ ॥ जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः ॥ तासां विलक्षणो
जीवः साक्षित्वेन विनिश्चितः ॥ २७ ॥

स्वरूपाधिः ननु स्वरूपं ॥ २५ ॥ तस्मात् सुभीक्ष्णं पुनः गुणेष्वाविशच्चित्तं तेन च पुनर्वासना रूपेण चित्ते प्रकर्षे
ण भवतीति तस्मात्ते गुणास्चेतस्य पञ्चभूतमयः स्वरूपः सं त्यजेत् ॥ २६ ॥ ननु जाग्रदाद्यवस्थात्वतः अतः अ
तस्य रूपता तत्राह ॥ जाग्रदादयः स्वप्नः सुषुप्तं वैतिस्रो वृत्तयो बुद्धेः तासां जन्म भाविलक्षणः किं तत्र मवाप्ता
वगो विधावेस्मायत्र मन्यादि स्वतः ॥ स्वरूपं तत्पसाजन्तु रायं विशुद्धमान्नमितिवत् स्यात् एतेन गुणानां
वजीवस्य विलक्षणः ॥ तद्रूपस्यास्य दिव्येनि स्थितः अतः तासां साक्षित्वेन ॥ २७ ॥

125

५२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देहादिविविक्तात्मज्ञानेन सति तन्निष्ठस्य यथा याथात्म्यं भवात्... यन्नेति विषयपवेति मोक्षो भवतीति वक्तुम्
आत्मानं न भिन्नतो वक्तावदात्मा वा न्यविवेकमाह वक्तुनाचिभिः श्लोकैः न किमात्मानोऽयं प्रश्नः तत्र बोधयन्
न सर्वस्य वाचा यथात्मनः कुत्रापि नस्यव वस्तुनः परमार्थरूपस्य प्रत्यात्मने सतीति दृविज्ञाः ॥ सुषुप्ताभिः स्मृतेः प्रत्य-
ईदृशाः वक्तुमुनि परिणामरूपः कथं वदेत्तवक्तृकृत यथात्वमीममक आश्रय ॥ प्रविशेषेण आत्मनि तं के
ज्ञानिगुणादिविशेषमात्मा परिपाकर वक्ष्यामीत्यर्थः ॥ २४ ॥ मूलमेतद्विषयत्वेऽपि सर्ववः प्रश्नवाचामारंभः

वक्तीतो यस्य नान्यात्र मात्मनः श्रुत्वाई दृशाः ॥ कल्पितेनैव सा विद्या वक्त्री
यैव कल्पिता श्रयः ॥ २४ ॥ पंचात्मकेषु भूतेषु समानेषु च वस्तुतः ॥ को
भवानिति वा प्रश्नो वाचारंभणमनर्थकः ॥ २५ ॥ मनस्तु व च सा दृष्ट्वा रू-
मतेनैव परीक्षितः ॥ अहमेवं न मनसो नाहं दिति बुधैरुपमुज्यता ॥ २६ ॥
ध्वा

वाक्यात्रैणारब्धः ॥ यतो नर्थकः अतः भूतेषु देवमनुष्यादिदेहेषु पंचभूतात्मकेषु मनः समानेषु अभिन्ने-
षु च न स्वरूपतः वस्तुतः परमकारणात्मना अभिन्नेषु वा वारंभेदेन विना नामधेयं मृत्तिकेत्येव सत्यमिति श्रु-
तेः ॥ तत्र पंचात्मकेषु पतिलादिसिद्धमेवेति परमकारणाभेदमेव पादयति मनसीति मनसा आदि प्रियपद-
स्यतेनाहमेव समर्थः अजस्य नत्वविचारितो समर्थः ॥ एतेनैव सर्वात्मिकाहमिति मे जसा पुनरमुक्ते भवतीति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवमिति महादेवोपि स्वयंभूरपि भूतानां प्रष्टापि ध्यायमानः विचारयन्नपि प्रश्नस्य बीजं यदज्ञानादयं प्रश्नस्तन्ना
विदत् । यतः कर्मविक्षिप्तधीः ॥ ७ ॥ प्रश्नस्य परमतत्वमभिप्रायो वा न स्पृशति तितीर्षया तितीर्षया तस्याहं सहृ येणोति ।

श्रीभगवानुवाच ॥ एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः ॥ ध्यायमा
नः प्रश्नबीजं नाभ्यपद्यत कर्मधीः ॥ ८ ॥ स मामचिन्तयद्देवः प्रश्नपारं
तितीर्षया ॥ तस्याहं हंसरूपेण सकाशमगमं तदा ॥ १९ ॥
दृष्ट्वा मां त उपव्रज्य कृत्वा पादाभिवंदनं ॥ ब्रह्माण
मग्रतः कृत्वा पप्रच्छुः को भवानिति ॥ २० ॥ इ
त्यहं मुनिभिः पृष्टः तत्त्वजिज्ञासुभिस्त
दा ॥ यदवोचमहं तेभ्यः तदुद्धव
निबोध मे ॥
२१

यथा हंसो नीरं क्षीरं च पृथक्कर्तुं शक्तः ॥ एवमहं गुणांश्चेतश्चेति यो न विविनक्ति तं हंसरूपेण गतोस्मीति ॥ १९ ॥ इत्यहं
मुनिभिः पृष्ट इति पृष्टस्य यद्वाक्यं तदवोचमिति पदत्रयं ॥ २० ॥ वतोस्मः शाखा [illegible] दोषः ॥ तेभ्यो यदवोचं तन्मे वच

127

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

128

विषयदोषदृष्ट्यापि मनोनिरोधाशक्तौ सर्वं तन्निरोधोपायमाह अप्रमत्त इति । अनिर्विण्ण अनलसः ॥ यथाका
ले त्रिषवणस्नानमपि परमानंदरूपे यद्यपि न समाद्ध्यात् ॥ ३ ॥ विषयोत्सर्गे प्राप्तं तत्सामान्यसक्तहृदयो योगेश्वर निष्ठव
मसंभावितं मयं समाने प्रतिनिरूपणाये ति ह्यात्म प्रच्छिपति पुनावानितिन यथार्मन्यावेषयतरयेनावानिमर्षः

ख्य२ ख्य२ दू२

अप्रमत्तोऽनुयुञ्जीत मनो मय्यर्पयञ्छनैः ॥ अनिर्विण्णो यथाकालं जितश्वासो जितासनः ॥ ३ ॥ ए
तावान्योग आदिष्टो मच्छिष्यैः सनकादिभिः ॥ सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा ॥ ४ ॥ उद्धव
उवाच ॥ यदा त्वं सनकादिभ्यो येन रूपेण केशव ॥ योगमादिष्टवानेतद्रूपमिच्छामि वेदितुं ॥ ५ ॥
श्रीभगवानुवाच ॥ पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः ॥ पप्रच्छुः पितरं सूक्ष्मां योगस्यैकान्ति
कीं गतिं ॥ ६ ॥ सनकादय ऊचुः ॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो ॥ कथमन्योन्यसंत्यागो
मुमुक्षोरतितीर्षतः ॥ ७ ॥ ॥ राम

सच्छिष्यैः विक्रेते तेषामपि जायमानमेनेन रूपेणासंभवात् ॥ रूपमिति यदेति तं कालं तदेतद्रूपं च वेदितुमिच्छा
मि तत्कथयेति ॥ ५ ॥ मानसाः पुत्राः सूक्ष्मां दुर्ज्ञेयां एकांतिकीं गतिं परां काष्ठाम् ॥ ६ ॥ तदेवाह गुणेष्वि
ति विषयेषु स्वभावतो रागादिवशाच्चेतः ॥ प्रविशति चाद्भुता विषया वासनारूपेण चेतसि प्रविशन्ति अती
तीर्षोः ॥ विषयानतिक्रमितुमिच्छोः ॥ ७ ॥ ॥ ॥ राम ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाए
टी
८१

नन्वनियतेंद्रियता सात्विकस्य वा प्रमित्याशंक्य पुरुषार्थं तथापि सज्जमाही न विषयात् दुःखमिति जानंतोपि कथ
मेवं तिष्ठंति विद्वांसोपि तत्र दृष्टांतमाह यथा भर्तृ शौनाना प्रपि एवं तापेषु या पश्यं ता घ मृता प्रपि खरी मम यथावि
तः प्रज्ञाया निर्लज्जा हृतस्वामी नो प्रपि न इह न ॥ ७ ॥ मिथ्याभिनिवेशेकस्य न भजते इति सहेतुकमाह ॥ प्रहसीति
विभिः प्रमत्तस्य विवेकप्रमुखस्य देहात्मस्व हमिति मिथ्याबुद्धिकं हित्वा यथा वस्तुपस्यपि तिः ॥ ततो हेतु हेत्वक्वैका
रिकसत्त्वप्रधानमपि मनः प्रतिबोधकं सुखरूपं आत्मक गुणः उपसर्पति मनो ध्यानानी त्यर्थः ॥ ८ ॥ इदमेवोपमिदमेवभो

अर्जुन उवाच ॥ विदंति मर्त्याः प्रायेण विषयान्पदमापदां ॥ तथापि भुंजते कृष्ण तत्कथं श्वखराजवत् ॥ ८
श्रीभगवानुवाच ॥ अहमित्यन्यथाबुद्धिः प्रमत्तस्य यथा हृदि ॥ उत्सर्पति रजो घोरं ततो वैकारिकं मनः
॥ ९ ॥ रजोयुक्तस्य मनसः संकल्पः सविकल्पकः ॥ ततः कामो गुणध्यानाद्दुःसहः स्याद्धि दुर्मतेः ॥
१० ॥ करोति कामवशगः कर्माण्यविजितेंद्रियः ॥ दुःखोदर्काणि संपश्यन्रजोवेगविमोहितः ॥
रजस्तमोभ्यां यदपि विद्वान्विक्षिप्तधीः पुनः ॥ अतंद्रितो मनो युंजन्दोषदृष्टिर्न सज्जते ॥ १२ ॥

संकल्पः स्यात् ततः स्वपरोरूपमहो भवति गुणध्यानाद्दुःसहः कामः स्यात् ॥ १० ॥ ततो
ग्यमिति सविकल्पः संकल्पः स्यात् ततः स्वपरो रूपमहो भवति निवृत्तिः स्यादित्याशंक्याह ॥ यदपि यद्यपि
विषयात् भोक्तुं कर्माणि करोति ॥ ११ ॥ एवं चेन्न कस्यापि दुःखनिवृत्तिः स्यादित्याशंक्याह ॥ विवेकी पुनर्मनो नियच्छन्न सज्जते ॥ १२ ॥
रजस्तमोभ्यां विक्षिप्तधीः ॥ तथापि समनस्यापि विद्वान्विवेकी पुनर्मनो नियच्छन्न सज्जते ॥ १२ ॥

129

८१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सात्विकान्येवेति निवृत्तिपरा स्तान्येव सेवेतेन प्रवृत्तिः पापोदरा स्वात्तितीर्थपवनगंगोदकं धृताचाः प्रसा
ज्ञानं निवृत्तान्वा जनान् ॥ न प्रवृत्तं इत्याचारानविविक्तदेशान् न रथ्यात्पुत्रदेशान् ॥ कालं ब्रह्ममुहूर्तादिकं ध्यानादे 130
न प्रदोषानिशीथादीन् ॥ कर्म च नित्यं न काम्याभिचारादीनि ॥ जन्म च वैष्णवशैवलक्षणं न शाक्तक्षुद्रादिरूपं ।
ध्यानं श्रीविष्णोः न कामिनीकुचादेः मंत्रं प्रणवादिकं न काम्यमन्त्रं संस्कारमात्मनः शोधकं देहगृहादीनां
न तु स्नानं महावाक्याभ्यासात्त्वात्तोदेवोमयते ॥ किंतु च समस्तं धर्मतत्त्वादिना शाम्यति ॥ यावत्स्मृतिः आत्मापरोक्षं

सात्त्विकान्येव सेवेत पुमान्सत्त्वविवृद्धये ॥ ततो धर्मस्ततो ज्ञानं
यावत्स्मृतिरपोहनं ॥ ७ ॥ वेणुसंघर्षजो वह्निर्दग्ध्वा शाम्यति त
द्वनं ॥ एवं गुणव्यत्ययजो देहः शाम्यति तत्क्रियः ॥ ७ ॥

यत्यपंजो

वच्च देहस्य च तत्कारणभूतगुणयोः सावसर्यं तत्त्वज्ञाने भवतीत्यर्थः ॥ ननु गुणत्रयात्मिकाज्जातो देहः
कथं स्वाश्रयभूतान् गुणान् स्वतपवोसमंतु यावद्विद्यायापोस्य समष्टुपरमेत ॥ तत्राह वेणुनामसद्योजातो ।
ग्निर्वह्निर्यथा ॥ स्वतपेवोसमन्वाभिर्ज्वालाभिस्तद्वनं सर्वं ॥ दग्ध्वा स्वयं शाम्यति ॥ एवं देहोपि तत्क्रियो तस्या
गुणविक्रियाया आपागेव समस्यमा ॥ ७ ॥ यत उपसंहृतदेवं एवं निर्दहन्नैव भूतोयस्मात् ॥ ७ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री· भाग· टी· ५०

सधर्मो रजस्तमश्च हन्यात् नूनं ततः न विद्यते उत्तमो यस्मात्सः सर्वोत्तमः यतः सत्वस्य वृद्धिर्यस्मिन् तत्कुर्वाणो वा यस्य सः
अतएव तत्कार्यं धर्मं प्रतिबंधोपि तास्तीत्याह ॥ तस्मिन्नुभयस्मिन्हते उन्मूलः तो रजस्तमसी रागाद्वेषादिना प्रमा
दलस्यादिना प्रमादलस्यादिनाच मूलं यस्य सः ॥३॥ आगमो यथा वेदः अपः स्त्रीः न्यायो या चिंतनं चिंतनं प्रजा मस्तुत्रः
देशः स्वासं चाविप्रविनिकालो वसंतादि कर्म ॥ आयुष्मादि ते तन्मे भयकुलविशुद्धं यानं देवताविषयं मंत्रो या

मूल

धर्मो रजस्तमो हन्यात्सत्ववृद्धिरनुत्तमः ॥ आशु नश्यति तन्मूलो ह्यधर्म उभये हते ॥३॥ आगमो ऽपः
प्रजा देशः कालः कर्म च जन्म च ॥ ध्यानं मंत्रोथ संस्कारो दशैते गुणहेतवः ॥४॥ तत्तत्सात्विकमे
वैषां यद्यद्वृद्धाः प्रचक्षते ॥ निंदंति तामसं तत्तद्राजसं तदुपेक्षितं ॥५॥ ॐ श्रीरामाय तस्मै नमः ॥

यस्मादिसंस्कारः गर्भाधानादिगुणहेतवः ॥ सत्वो यस्मिन्हेतवः एतेषां मध्ये विप्रेभ्यः वृद्धास्तु यद्यदेव सात्विकत्वेन उपदिशंति तत्तदेव
ग्रहणेन सात्विको पासनया सत्वं स्वर्थं निःशंकं तानेन सत्ववृद्धिहेतुं दर्शयित्वा सामान्यतो गुणत्रयवृद्धिहेतुनाह ॥ आ
गमः पापात्स्वप्नश्चापः क्वचिद्रागमो यथा इतिपाठः ॥४॥ यत्तु सात्विकादि निर्णयमाह यद्यामेवप्यामेवम
खे प्रचततेप्रसंसंति ॥ यद्यन्निंदंति तत्तमसं तद्यत् नतोर्ह्देव यदि तं तत्स्वतं नचनिंदितं ॥५॥ ॥ ॥ रामजी
॥ राम ॥ राम ॥ राम ॥ ॥

131

५०

त्वमेवं ज्ञात्वाच्युत कृतमास्त्व ॥ सर्वसाधनं त्यजेत्याह ॥ एवमिति एकान्तभक्त्या शितेन तीक्ष्णेन ज्ञानकुठारेणास्त्वं तं छित्त्वा वाद्ययोः
जीवो यः स्थितिं त्रिगुणात्मकं लिङ्गशरीरं विवृश्चाच्छित्त्वा परमात्मानमेव संपद्य प्राप्याथ च ज्ञानसाधनं त्यजेति ॥ २४ ॥ इति श्री
भावार्थदीपिकायामेकादशे द्वादशः ॥ १२ ॥ त्रयोदशेऽथ सत्त्वस्य वृद्ध्याद्यिध्योदयक्रमः हंसेतिहासतश्चित्तगुणविश्लेष एव
गीतं ॥ विद्याकुठारेण जीवाशयं संवृश्च्य साधनं त्यजेदुक्तं तत्र तत्र आदित्य गुणत्रयवृत्तिप्रवृत्ति वेये सति कथं विद्यामति
विन्याशंकान तु निवृत्या विद्याप्रकारमाह सत्त्वमिति त्रिभिः तत्र यद्यपि बन्धादिवदात्मधर्मा गुणाः स्युस्तर्हि तत्स्व

एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः विवृश्च्य जीवाशयमप्रमत्तः ॥ संपद्य चात्मानम
थ त्यजास्त्रं ॥ २४ ॥ इति श्रीभागवते एकादशस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥ श्रीभगवानुवाच ॥ सत्त्वं रजस्त
म इति गुणा बुद्धेर्न चात्मनः ॥ सत्त्वेनान्यतमौ हन्यात्सत्त्वं सत्त्वेन चैव हि ॥ १ ॥ सत्त्वाद्धर्मो भवेद्वृद्धात्पुंसो
मद्भक्तिलक्षणः ॥ सात्त्विकोपासया सत्त्वं ततो धर्मः प्रवर्तते ॥ २ ॥ वृ२

द्रूपत्वात्तेषां हानिर्न स्यात् ॥ न त्वेतदस्ति बुद्धेः प्रकृतेरेव ते गुणाः सत्त्वात्मन इति ॥ अतः सत्त्वेन सत्त्ववृद्ध्या तत्
मोहस्यात्तरजस्तमो हन्तीनिर्जयेदित्यर्थः सत्त्वं च धर्मरूपदयादिवृत्तिरूपमुपशमात्मकेन सत्त्वेनैव हन्यात् ॥ १ ॥ न
नु गुणत्रयवृत्तीनां परस्परबाधमेव दृष्टं नानात्वसत्त्ववृद्ध्यैवेतरवृत्त्योर्नियमेन हन्तव्याः तत्राह सत्त्वादिति मद्भक्ति
लक्षयति यो धर्मः समद्भक्तिरूप एव वा सत्त्वमेव कथं वर्धते तत्राह ॥ सात्त्विकानां पदार्थानां मुपासया से
वया सत्त्वं वर्धते ततो धर्मः ॥ २ ॥ नम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA.

चतुर्दशे परं श्रेयो भक्तिरेव केवलेतत ॥ इतेतन्न दर्शयितुं ध्यानयोगश्च सह साधनैः एवं तावद्भगवता भक्तियोगो नन्य उक्तः श्रेयस्त्वने
साधनानि वदंति तत्र विशेषादि शेषनिर्धारणाय पृच्छति वदंतीति ॥ श्रेयांसि श्रेयस्साधनानि किं विकल्पेन प्राधान्यं उताहो
किंच एकस्यैव मुख्यता ॥ १ ॥ अपेक्षितोऽस्मानेकाग्रां भवेदिति ॥ अनपेक्षितं न अपेक्षा यस्मिन् सः अहेतुकः अवसर्गः भवता
यो भक्तियोग उक्तः ॥ अन्ये च श्रेयस्साधनानि वदंति तेषां किं साक्षात्फलसाधनत्वेन प्राधान्यं स एव सर्वेषां उतान्यानि प्रथा

उद्धव उवाच ॥ वदंति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः ॥ तेषां विकल्पप्राधान्यमुताहो एकमुख्यता ॥ १ ॥ भवतो
दाहृतः स्वामिन् भक्तियोगो नपेक्षकः ॥ निरस्य सर्वतः संगं येन त्वय्याविशेन्मनः ॥ २ ॥ श्रीभगवानुवाच ॥ का
लेन नष्टा प्रलये वाणीयं वेदसंज्ञिता ॥ मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥ ३ ॥ तेन प्रोक्ता च पु
त्राय मनवे पूर्वजाय सा ॥ ततो भृग्वादयो गृह्णन् सप्त ब्रह्ममहर्षयः ॥ ४ ॥ तेभ्यः पितृभ्यस्तत्पुत्रा देवदा
नवगुह्यकाः ॥ मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः ॥ ५ ॥ किं देवाः किंनरा नागा रक्षः किंपुरुषा
दयः ॥ बह्व्यस्तेषां प्रकृतयो रजःसत्त्वतमोभुवः ॥ ६ ॥

न्येपि किं विकल्पेन सर्वेषां तुल्यफलत्वं यद्वा कश्चिदस्ति विशेष इति तत्र भक्तिरेव महाफलत्वेन ॥ मुख्या ॥ अन्यानि
तु स्वस्वकर्मानुसारेण पृष्ठस्थानीयस्वर्गादिफलबुद्धिभिः प्राणिभिः प्राधान्येन परिकल्पितानि तुच्छफला-
नीति विवक्षुः प्रकृत्यनुसारेण बहुधा वेदनार्थप्रतिपत्तिं प्रकटयन्नाह च कालेनेति सप्तभिः ॥ २ ॥ मदात्मकः म
य्यर्पितात्मा चित्तं येन सः ॥ उभयपदसंबंधीयर्थोनुवर्तनीयः ॥ ३ ॥ भृग्वादयः भृगुर्मरीचिरत्रिः अंगिराः पुलस्त्यः पु
लहः क्रतुरिति एते सप्त ब्रह्मणः प्रजापतयस्तु ते महर्षयश्च ॥ ४ ॥ ५ ॥ किं देवाः क्षुद्रदेवा दोषजंघादिरा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भाग. टी. ९९

द्वियेन किं देवा मनुष्या वेति ॥ संदेहास्पदं द्वीपांतरमनुष्या एवेति वेद्यं ॥ किंनराः किंचिन्नरा एव स्खलतः शरीरतो वा किं
पुरुषाः किंचित्पुरुषा इव वानरादयः प्रकृतयः ॥ वासनाः ब्रह्मः ऊतः रजःसत्त्वतमांसि भुवः जन्मस्थाना नियासा ताः ९
भूतानि देवासुरमनुष्यादीनि वाचः वेदार्थव्याख्यानविषयाः ॥ ७ ॥ एवमित्युक्तोपसंहारः केषांचिदध्ययनादि शून्यानां
मपि उपदेष्टृपारम्पर्येणाग्रुपरे पाषंडमतयः ॥ ८ ॥ न स्वकृतीनां मायाबुद्धिः अनुकूलत्वात् तामाया मोहितधियः अनेका
तेनानाविधं तदेवाह सार्द्धेन ॥ ९ ॥ धर्मं कर्ममीमांसकाः न तु केमोक्षार्थी नं प्रवर्त्तेन तन्न कामस्य निषिद्धयोः नित्यत्वेमिति

याभिर्भूतानि भिद्यंते भूतानां मनवस्तथा ॥ यथाप्रकृति सर्वेषां चित्रा वाचः स्रवंति हि ॥ ७ ॥ एवं प्रकृतिवैचित्र्या
द्भिद्यंते मतयो नृणाम् ॥ पारंपर्येण केषांचित्पाषंडमतयोऽपरे ॥ ८ ॥ मन्मायामोहितधियः पुरु
षाः पुरुषर्षभ ॥ श्रेयो वदंत्यनेकांतं यथाकर्म यथारुचि ॥ ९ ॥ धर्ममेके यशश्चान्ये कामं सत्यं दमं शमं ॥
अन्ये वदंति स्वार्थं वा ऐश्वर्यं त्यागभोजनं ॥ केचिद्यज्ञं तपो दानं व्रतानि नियमान्यमान् ॥ १० ॥ ॥ रामाय नमः

केऽपि यशःस्वस्वाय जिह्वासये साधिय शः ॥ काव्यालंकारकृतः यथाहुः यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीय
ते ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ कामं वात्स्यायनादयः सत्यं मदं च योगशास्त्रकृतः अन्ये दंड नीतिवा
दिनो दंडनीतिकृतः ॥ वेषसिद्धं ऐश्वर्यमेव स्वार्थं पुरुषार्थं वदंति अन्ये तु सामास पाय एव श्रेय एवं स्वार्थं न मिति ते
षां सते ॥ तथैव त्यागं भोजनं च कालायतिका वाद्याः यज्ञं तपो दानं यज्ञो देवतानां हजनं न पश्चदानं च तेषां तच्छक ९९
लविमिसा हुआयतन्वं न इति ॥ १० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एषां लोकाः यैतैः साधनानि फलानि तमो मिश्रा मोहावसानाः भोगकोलप्रसूत्यादिभिः प्रचार्पिताः व्यामाः भक्तेर्मु
क्ते त्वमाहमद्यीतियावन्नमामि ॥१॥ हिसतनमृयापरमानंदरूपेणात्मनास्वरूपत्वेनस्फुरता ॥२॥ किंच ग्रन्थेषां त
त्रलोकादिपरिच्छिन्नं सर्वं भक्तस्य तु परिपूर्णमाह ॥ अकिंचनस्येति ॥३॥ परिपूर्णतामेवाहन पारमेष्ठ्यमिति नरा।

अयं तवेन एवैषां लोकाः कर्मविनिर्मिताः ॥ दुःखोदर्कास्तमोनिष्ठाः त्वद्गता नेदाः प्रचार्पिताः ॥१॥ मय्य
५४२ पितात्मनस्सत्यनिरपेक्षस्य सर्वतः ॥ मयात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनः ॥२॥ अकिंचनस्य दांतस्य
शांतस्य समचेतसः ॥ मया संतुष्टमनसः सर्वाः सुखमया दिशः ॥३॥ न पारमेष्ठ्यं न महेंद्रधिष्ण्यं न सा
र्वभौमं न रसाधिपत्यं ॥ न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् ॥४॥ न तथा मे प्रिय
तम आत्मयोनिर्न शंकरः ॥ न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥५॥ निरपेक्षं मुनिं शांतं नि
र्वैरं समदर्शनम् ॥ अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः ॥६॥

सार्वभौमं पातालादि स्वाम्यं अपुनर्भवं मोक्षमपि ॥ मद्विना ॥ मां हित्वा ॥ अन्यन्नेच्छति अहमेव तस्य प्रेष्ठ इत्यर्थः
समापि स एव स तत्वे प्रेष्ठ इत्याह ॥ न तथेति द्वाभ्यां ॥ आत्मयोनिर्ब्रह्मापुत्रो पि शंकरो मत्स्वरूपभूतोपि संकर्ष
णो भ्राता श्रीः भार्यापि आत्ममूर्तिरपि यथा भक्तः अतिवल्लभेति हर्षेणाह भवानिति ॥५॥ पूयेय मदंतर्वर्तिब्र
ह्मांडानि पवित्रीकुर्यामिति भावेनेत्यर्थः ॥६॥ श्री रामाय नमः ॥ ॥
राम ॥ राम ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री-
भाग-
टी-
५८

किंच मद्भक्तानां सुखमेतावदेवं भूतोरमतिवाकोवक्तासमर्थः यतस्तत्सुखसंवेद्यनिरूपममित्याह निष्किंचना इति सुहृ
न्तो निरहस्मानाः अनालब्धधियः अस्पृष्टचित्ताः निष्किंचनत्वान्नायथेहेतुमद्भावः एवंभूता ममदीयाः यत्सुखं जुषंति
सेवंते तत्सुखं न एव विदुः कुतः नैरपेक्ष्यं तत्ताहिलक्षणं तामीयेये घोनेतिरपेक्षः । नैरवलभ्यं न तु मोक्षापेक्षैरपीत्यर्थः
यद्वा एवंभूताः संतो येममसामित्यर्थः ॥ जुषंते प्राप्नुवंति त एव यन्नैरपेक्ष्यं मम सुखं न तद्विदुः नान्य इत्यन्वयः ॥ १७ ॥ अपि चया
सांतावदुन्नमम मत्कथायात ॥ प्राकृतोपि भक्तः कृतार्थ एवेत्याह ॥ बाध्यमान इति द्वाभ्यां विषयैराकृष्यमाणोपि प्र

निष्किंचना मय्यनुरक्तचेतसः शांता महांतोखिलजीववत्सलाः ॥ कामैरनालब्धधियो जुषंति यत्तैर
पेक्ष्यं न विदुः सुखं मम ॥ १७ ॥ बाध्यमानोपि मद्भक्तो विषयैरजितेंद्रियः ॥ प्रायः प्रगल्भया भक्त्या विषयै
र्नाभिभूयते ॥ १८ ॥ यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात् ॥ तथा मद्विषया भक्तिरुद्धवैनांसि कृ
त्स्नशः ॥ १९ ॥ न साधयति मां योगो न सांख्यं धर्म उद्धव ॥ न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता २०
भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां ॥ भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात् ॥ २१ ॥ धर्मः
सत्यदयोपेतो विद्या वा तपसान्विता ॥ मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि ॥ २२ ॥ ॥ रामाय नमः

136

गल्भया समर्थया ॥ १८ ॥ प्राकाष्टर्थं प्रज्वालितोप्यग्निर्यथा काष्ठानि भस्मीकरोति तथा रागादिनापि कष्टं चित्त
द्विषया सती भक्तिः समस्तपापानि तिभवान्नपि स्वभक्तिमहिमाश्चर्येण संबोधयति अहो उद्धव विस्मयं शृणु इ
ति ॥ १९ ॥ अत एवंभूतं श्रेयो नान्यदस्तीत्याह न साधयति इति द्वाभ्यां ॥ २० ॥ श्रद्धया भक्तिः तया संभवात् ॥ जातिदोषा
दपि समर्थः ॥ २१ ॥ भक्त्या भावे समस्ताय नैरर्थक्यमित्याह द्वाभ्यां धर्म इति ॥ २२ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रोमहर्षादिकं विना कथं भक्तिर्गम्यते भक्त्या च विना कथमाशयः शुध्येदिति ॥२३॥ किंच भक्तिः स्वाश्रयं शोधयति किं
वक्तव्यं यतो वाग्गद्गदा वागादिलक्षणो मद्भक्तियुक्तो लोकं सर्वं पुनातीत्याह वागिति ॥२४॥ अपि च भक्तेरेवात्मशुद्धिर्नान्यत
इति सदृष्टान्तमाह यथेति ॥ यथाग्निना ध्मातं तापितं हेम स्ववर्णाश्रितं मलं जहाति न क्षालनादिभिः स्वं निजं रूपं च भ
जते कर्मानुशयं कर्मवासनां मां भजते मद्रूपतां प्राप्नोतीति ॥२५॥ ननु ब्रह्मविदाप्नोति परं तमेव विदित्वाति मृत्युमे

च२

कथं विना रोमहर्षं द्रवता चेतसा विना ॥ विनानंदाश्रुकलया शुध्येद्भक्त्या विनाशयः ॥२३॥ वाग्गद्गदा
द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च ॥ विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥२४॥
यथाग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपं ॥ आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भ
जत्यथो मां ॥२५॥ यथा यथात्मा परिमृज्यतेसौ मत्पुण्यगाथाश्रवणाभिधानैः ॥ तथा तथा पश्यति व
स्तु सूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तं ॥२६॥ विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते ॥ मामनुस्मरतश्चि
त्तं मय्येव प्रविलीयते ॥२७॥ ॥

तीत्यादिश्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्त्या तत्प्राप्तिरवगम्यते कुतो भक्तियोगेनेत्याशंक्य तत्राह यथा यथेति आ
त्मा चित्तं परिमृज्यते शोध्यते मत्पुण्यकथनाश्रवणाभिधानैस्तु भक्तेरेवान्तरव्यापारो ज्ञानं न पृथगित्यर्थः ॥ २५
किंच ज्ञानेनासक्तचित्तस्य मदाकारपरिणामः स च मां भजतः स्वभाव एव भवति न च यत्नान्तरमपेक्षत इति ।
सदृष्टान्तमाह ॥ विषयानिति ॥ २७ ॥ ॥

137

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यस्मादन्यसाधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात् हित्वा मय्येव मनः ।। समाहितेत्युक्तं चिंतिप्रका
रमेणाध्यायमुपसंहरति तस्मादिति मद्भावभावितं मम भावेन भजनेनैव शोधितं ।। २८ ।। विशेषतेवान्स्यायनाप्युक्तका ।
ममार्गान्निवर्तयन्नाह स्त्रीणामिति आत्मवान् धीरः सन् क्षेमे निर्भये देशे विविक्ते विजने ।। २९ ।। एतदुपपादयति न
तथेति ।। अस्य पुंसः यथा न स्त्रीसंगात् क्लेशो भवेत् यथा च बंधो योषित्संगात् तथान्यप्रसंगात् तेन भवेदिति ।। ३० ।।

।। ।। ।। ।। ।। ।। तस्मादसदभिध्यानं यथा स्वप्नमनोरथं ।। हित्वा मयि समाधत्स्व मनो मद्भावभावितम् ।। २८
स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् ।। क्षेमे विविक्त आसीनश्चिंतयेन्माम
तंद्रितः ।। २९ ।। न तथास्य भवेत् क्लेशो बंधश्चान्यप्रसंगतः ।। योषित्सं
गाद्यथा पुंसो यथा तत्संगिसंगतः ।। ३० ।। उद्धव उवाच
यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं
ध्यायेन्मुमुक्षुरेतन्मे ध्यानं मे वक्तु
मर्हसि ।। ३१ ।। राम

मां चिंतयेदित्युक्तं तत्प्रकारं पृच्छति ।। यथेति ।। ध्यानोपायप्रश्नः ।। यादृशमिति ध्येयविशेषणप्रश्नः एतन्मे ध्यानं मे व
क्तुमर्हसि इति पाठः ।। तत्रायमर्थः ।। मुमुक्षुस्त्वां यथा ध्यायेत ।। तन्मे वक्तुमर्हसि जिज्ञासोः कथनायमेव तवैत
त् ।। तवेदास्यमेव गुरुत्वार्थः ।। तत्तु ध्यानेन वक्तुमर्हसीति तिन उक्तं ।। त्वयोपपदमुक्तमस्त्रगृह्येपेक्षा ।
दित्वं वक्तुमर्हसीति पाठः स्वरसः ।। ३१ ।। ॐ राम ।। ।।

138

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवंध्यानांगमुक्त्वा याद्दृशाभिमतोत्तरप्रायेणविधानमाह॥ हृत्पुंडरीकमितित्रिभिर्श्लोकैः॥ अंतःस्थंदेहांतर्वर्ति ऊर्ध्वनाल
मधोमुखं॥ मुकुलितं च कदलीपुष्पसंकाशं यद्भवति तद्विपरीतं ध्यात्वा सम्यक्॥ ३६॥ सम्यक्त्विंतनयेन विशेषणं ध्यानमा
ह॥ वह्निमध्यतइतिषड्भिः॥ ध्यानमंगलं ध्यानस्य शुभविषयो॥ ३७॥ समं अवक्रं तुल्यावयवं दीर्घौ चारवः चत्वारो भुजाय।

हृत्पुंडरीकमंतस्थमूर्ध्वनालमधोमुखं॥ ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकम॥ ३६॥ कर्णिका
यां न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं॥ वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं॥ ३७॥ समं प्रशांतं सुमुखं दीर्घ
चारु२ बाहुचतुर्भुजं॥ सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितम॥ ३८॥ समानकर्णविन्यस्तस्फुरन्मकरकुंडलं
हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनं॥ ३९॥ शंखचक्रगदापद्मवनमालाविभूषितं॥ नूपुरैर्विलसत्पा
दं कौस्तुभप्रभयायुतं॥ ४०॥ द्युमत्किरीटकटककटिसूत्रांगदायुतं॥ सर्वांगसुंदरं हृद्यं
प्रसादसुमुखेक्षणं॥ सुकुमारमभिध्यायेत्सर्वांगेषु मनो दधत॥ ४१॥ राम॥
एवंमध्यानसंयुक्तो योगी भवति मानवः॥

स्मिंस्तत॥ नयाः स्वचारुत्रतिरम्यम॥ ३८॥ समानयोः कर्णयोर्विन्यस्ते स्फुरती मकराकारे कुंडले यस्मिंस्तत
श्रीवत्से श्रियो निकेतनं वक्षसि दक्षिणावामतः॥ नाभ्यां युक्तमित्यर्थः॥ ३९॥ द्युमद्भिः किरीटादिभिः
आसमंतायुतमलंकृतं प्रसादेन॥ सौम्यं सुमुखं॥ ईक्षणं यस्मिंस्तत सुकुमा
रमतिकोमलं॥ ४०॥ ४१॥ राम॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र ध्यानांगत्वेन प्राणायामप्रकारमाह सम इति चतुर्भिः समेतानुक्तितेनान्तीचयासने केवलादेः समकायः समग्रीवा स्वस्व मासीनाइति नास्ति स्वस्तिकादिनियम इत्युक्तेनासाग्रनिरीक्षणं च चित्तस्थैर्यायेति तले देवा बहिर्दृष्टिः स्थिरचित्तः ॥ सुसंयत इति योगशास्त्रोक्तेः ॥ ३१ ॥ द्विपर्ययेण रेचक पूरक कुंभक कुंभ एण पियद्वा वामनाया पूरितं दक्षिणयाम तेन ॥ तया वापूरितं वाम ॥ इत्यं वद्विपर्ययेण यथोक्तं योगे ॥ इत्यत्रापूरये दुत्यंते पिंगलायां नत इति निर्जितेंद्रिय इति प्रत्याहार उक्तः ॥ ३२ ॥ प्राणायामो द्विविधः सगर्भो ॥ गर्भश्च तित्तत्र श्रेष्ठत्वात्प्रणवगर्भमाह ॥

श्रीभगवानुवाच ॥ समं आसनमासीनः समकायो यथासुखं ॥ हस्तावुत्संगमाधाय स्वनासाग्रकृतेक्षणः ॥ ३२ ॥ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः ॥ विपर्ययेणापि शनैरभ्यसेन्निर्जितेंद्रियः ॥ ३३ ॥ हृद्यविच्छिन्नमोंकारं घंटानादं बिसोर्णवत् ॥ प्राणेनोदीर्य तत्राथ पुनः संवेशयेत्स्वरं ॥ ३४ ॥ एवं प्रणवसंयुक्तं प्राणमेवं समभ्यसेत् ॥ दशकृत्वस्त्रिषवणं मासादर्वाग्जितानिलः ॥ ३५ ॥ ॥ रामाय नमः

दीति हृद्यां मूलाधारादारभ्याविच्छिन्नं संततं घंटानादवत्तलमोंकारं हृदि स्थितं प्राणेनोदीर्य ऊर्ध्वं द्वादशांगुलपर्यंतं नीत्वा कथं बिसोर्णवत् कमलनालतंतुवत् तत्र मात्रातीते स्वरे पेच दशां विदु संवेशयेत् अथ पुनरियास्यतं च बिंदुशिरस्कं कुर्यादित्यर्थः ॥ यद्वा मूलाधारादारभ्य सूर्यपर्यंतं बिसतंतुवत्सूक्ष्मं अविच्छिन्नं संततं हृदिस्थितं सि प्राणेनोदीर्य अभिव्यज्य अथ पुनस्त्वोंकारे घंटानादवत् स्वरमुदात्तेनादेः स्थिरीकुर्यादिति ॥ ३४ ॥ मासा ।

२ टीकलिगिनिमवलि ॥ ४२ ॥ मम

140

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सविक्षेपं ध्यानमुपसंहरति ॥ इंद्रियाणीति त्रिभिः कौशलेन यावत् सर्वतः सर्वांगमुखेषु ॥४२॥ यदा तु एवाभिलषितो मनसा परतयावाणोनि-
र्विशेषणत्यागेन ध्यानमेव समाधिपर्यंतमाह तदिति त्रिभिः एकत्रैवांगे मुख्याङ्गे ध्यानं यावन्न चिंतयेत् ॥४३॥ एकाग्रेति यदुक्तं तदेव
वाहं दर्शयति ॥ सुस्मितमिति ॥ व्योम्नि सर्वकारणरूपे तच्च कारणत्वमपि त्यक्त्वा मदारोहः मयि शुद्धे ब्रह्मण्यारूढः स

इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः ॥ बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ॥४२॥ तत्सर्वव्याप-
कं चित्तमाकृष्यैकत्र धारयेत् ॥ नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखं ॥४३॥ तत्र लब्धपदं चित्तमाकृ-
ष्य व्योम्नि धारयेत् ॥ तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत् ॥४४॥ एवं समाहितमतिर्मामेवात्मा-
नमात्मनि ॥ विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतम् ॥४५॥ ध्यानेनेत्थं सुतीव्रेण युंजतो योगि-
नो मनः ॥ संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ॥४६॥ इति श्रीभागवते एकादशस्कंधे चतुर्दशो-
ध्यायः ॥ १४ श्लो० ४६

न किंचित्ध्येयविभागमपि चिंतयेत् ॥४४॥ मामेवात्मनि विचष्टे ॥ आत्मानं च सर्वात्मनि मयि संयुतं विचष्टे ज्यो-
तिषि संयुक्तमिवेत्यन्वयः ॥४५॥ एवंभूतसमाधिपर्यंतस्य फलमाह ॥ ध्यानेनेति मनो युंजतः समादधतः
द्रव्यज्ञानक्रियाभ्रमः ॥ अधिभूताधिदैवाध्यात्मरूपः द्रष्टृदृश्यदर्शनरूपो वा भ्रमः ॥ निर्वाणं शांतिं सम्यग्या-
स्यतीति तदर्थः ॥ ४६ ॥ इति श्रीभावार्थदीपिकायां एकादशस्कंधे चतुर्दशोध्यायः ॥ १४ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ततः पंचदशे प्रोक्ताः ॥ सिद्धयो धारणायुताः ॥ याभिः स्वपदसंप्राप्तावंतरायतया मताः ॥ एवं मनो युंजतो योगिनोंतरा विभू-
तयः ॥ सिद्धयोप्यंतरायप्राया एव प्रसक्ताः ॥ यदि स्वयं परमेश्वर एव भवेदिति वक्तुं सिद्धीराह जितेंद्रियस्य नियुक्तस्य स्थि-
रचित्तस्य ॥१॥ इंद्रियधिष्ठानत्रयाधिदैवं इंद्रियमध्यात्मं विषयोधिभूतं ॥२॥ सिद्धिरिति वितर्के का स्वित् किंनामा कथं स्वि-
त् ॥ कीदृशी वा धारणास्य कतिः प्रश्नांतरे वा शब्दः त्वमेवैतन्माख्यासि नान्य इति आशयेनाह योगिनामिति ॥४॥ धा-
रणास्वष्टादशसु मध्ये योगपारगेतितिविकालज्ञानादिरदृष्टसिद्धीरन्येपि जानंतीति भावः ॥ अष्टदसैव प्रधानं।

श्रीभगवानुवाच ॥ जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः ॥ मयि धारयतश्चेत उपतिष्ठंति सिद्धयः ॥१॥
उद्धव उवाच ॥ कया धारणया का स्वित् कथं स्वित् सिद्धिरच्युत ॥ कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवा-
न् ॥२॥ श्रीभगवानुवाच ॥ सिद्धयोष्टादश प्रोक्ता धारणा योगपारगैः ॥ तासामष्टौ मत्प्रधाना दशैव गु-
णहेतवः ॥३॥ अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिंद्रियैः ॥ प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमी-
शिता ॥४॥ गुणेष्वसंगो वशिता यत्कामस्तदवस्यति ॥ एता मे सिद्धयः सौम्य अष्टौ चौत्पत्तिका मताः
५

गुणाः स्वभावतः आश्रयो यासां ताः मत्स्वरूपं प्राप्तेषु किंचित्स्व न आभावंतीति भावः ॥ सत्त्वोत्कर्षहेतुकाः ॥३॥ आ-
नास्वरूपेणोपदिशति ॥ अणिमेति सार्धैः पंचभिः अणिमा महिमा लघिमा मूर्तेर्देहस्येति त्रयः सिद्धयः प्राप्तिर्ना-
म सिद्धिः स च प्राणिनामिंद्रियैः सह ॥ तत्तदधिष्ठातृदेवतारूपेण संबंधरस्पर्शः ॥ श्रुतेषु पारलौकिकेषु दृष्टेषु
दर्शनयोग्येष्वपि सर्वेषु भूविवरादिपिहितेष्वपि प्राकाम्यं भोगदर्शनसामर्थ्यं सिद्धिः शक्तीनां मायायास्तदंशभूतानां
प्रेरणं तत्त्वेश्वरे मायाः आसेभूतदंशानां प्रेरणमीशिता नाम सिद्धिः ॥४॥ विषयभोगेष्वसंगो वशिता सिद्धिः यत्कामः

14R

गुणहेतुसिद्धीराह ॥ अनूर्मिमत्त्वं क्षुत्पिपासादिरहितता अनूपप्राप्तिः परकायावेशः ॥६॥ स्वेच्छामृत्युः अप्सरोभिः स
ह देवानां क्रीडा तस्यां अनुदर्शनं प्राप्तिः संकल्पानुरूपप्राप्तिः अप्रतिहता आज्ञा समनन्तागतिः यस्याः साज्ञा ज्ञातवेस
तादृशस्त्वं इसिद्धीश्चाह त्रिकालज्ञत्वमिति अद्वंद्वं शीतोष्णाद्यनभिभवः अग्न्यादीनां स्तंभने ॥८॥ तत्र धारणाभिः स
ह विशेषतो निरूपयति ॥ यथेति यावत्समाप्तिः ॥९॥ भूतसूक्ष्मात्मा यो मयि तन्मात्रे भूतसूक्ष्माकारं सत्तन्मात्रोपास
कः मम मदीयमणिमानं ॥१०॥ ज्ञानशक्तिमहत्तत्त्वोपाधौ मयि यथासंस्थं महत्त्वाकारं भूतानां चेति आकाशादि

अनूर्मिमत्वं देहेस्मिन् दूरश्रवणदर्शनं ॥ मनोजवः कामरूपं परकायप्रवेशनम् ॥६॥ स्वच्छंदमृत्युर्देवा
नां सह क्रीडानुदर्शनं ॥ यथासंकल्पसंसिद्धिराज्ञाप्रतिहता गतिः ॥७॥ त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्य
भिज्ञता ॥ अग्न्यर्कांबुविषादीनां प्रतिष्टंभोऽपराजयः ॥८॥ एताश्चोद्देशतः प्रोक्ता योगधारणसिद्धयः
यया धारणया या स्याद्यथा वा स्यान्निबोध मे ॥९॥ भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयेन्मनः ॥ अणिमा
नमवाप्नोति तन्मात्रोपासको मम ॥१०॥ महत्यात्मन्मयि परे यथासंस्थं मनो दधत् ॥ महिमानमवाप्नोति
भूतानां च पृथक् पृथक् ॥११॥ परमाणुमये चित्तं भूतानां मयि रंजयन् ॥ कालसूक्ष्मार्थतां योगी लघिमा
नमवाप्नुयात् ॥१२

निमर३

भूतोपाधौ च मयि मनो धारयन् तत्तत्कृतमहिमानं प्राप्नोतीत्यर्थः ॥११॥ वाय्वादिभूतानां ये परमाणवः तन्मये
तदुपाधौ चित्तं मयि रंजयन् ॥ कालस्य सूक्ष्मो योऽर्थस्तां कालपरमाणुपाधिरूपतामिति लघुत्वं विवरणा।
तदुक्तं ॥ स कालः परमाणुर्वै यो भुंक्ते परमाणुतामिति वै काहंकारोपाधौ मयि अखिलमेकाग्रमात्मत्वं अधि
ष्ठातृत्वं अग्रहेतुः मन्मनाः मयि मनोधारणाप्रभावादेव भवति नात्र लीवहेतुरनुसंधेय इति भावः एवं मद्धार
णाप्रभावेन सर्वोपागबलमाश्रयेदित्यादि द्रष्टव्यं ॥१२॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्रियाशक्तिप्रधानं ॥ महत्तत्त्वमेवसूत्रं तदुपाधौ मयि सः ॥ पारमेष्ठ्यं ॥ सर्वोत्कृष्टं प्राकाम्यं विंदते कथंभूतस्य।
अव्यक्तजन्मयस्तस्य ॥ तदुपाधेर्ममेवार्थः ॥ ४ ॥ अथौपाधिकं त्रिगुणमायानियंतरि अत एवैकालविग्रहे ॥

धारयन्मय्यहंतत्वेमनोवैकारिकेखिलम् ॥ सर्वेंद्रियाणामात्म
त्वंप्राप्नोति मन्मनाः ॥ ६ ॥ महत्यात्मनि यः सूत्रे धारयेन्मयि
मानसं ॥ प्राकाम्यं पारमेष्ठ्यं मे विंदतेऽव्यक्तजन्मनः ॥ ७ ॥ विष्णौ त्र्य
धीश्वरे चित्तं धारयेत्कालविग्रहे ॥ स ईशित्वमवाप्नोति क्षे
त्रज्ञक्षेत्रचोदनां ॥ ८ ॥ ॥ श्रीराम

आकालापितृरूपे ॥ अंतर्यामिणि ईशित्वं विशनष्टि देवज्ञानां जीवानां क्षेत्राणां ॥ शरीराणां तदुपाधीनां चोद
नं प्रेरणं ॥ ततविश्वसृष्ट्यादिकर्तृत्वलक्षणायमर्थः ॥ ८ ॥ ॥ रामा
य नमो नमः ॥ ॥ ॐ श्रीगणेशाय नमः ॥ ॥
ॐ नमो भगवते वासुदेवाय ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तुरीयाख्यो विराड्‌हिरण्यगर्भश्च कारणं चेत्युपाधयः ईशस्य यैस्त्रिभिर्हीनं तुरीयं तत्पदं विदुः विलेवं लत्तणोपेस्य
र्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ तद्वति भगवच्छब्दशब्दिते १७
यत्र परमानंदे सर्वोपि कामः तदेकशेषतो वसीयते समाप्यते तत्र ॥१८॥ अतः परं श्वेतद्वीपपतौ ... शुद्धेस

नारायणो तुरीयाख्ये भगवच्छब्दशब्दिते ॥ मनो मय्यादधद्योगी मद्धर्मा वशितामियात्‌ ॥१७॥ निर्गुणो ब्रह्मणि मयि धारयन्विशदं मनः ॥ परमानंदमाप्नोति यत्र कामोवसीयते ॥१८॥ श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि ॥ धारयं छुक्लतां याति षड्‌ऊर्मिरहितो नरः ॥१९॥ मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन्‌ ॥ तत्रोपलब्धा भूतानां हंसो वाचः शृणोत्यसौ ॥२०॥ ॥ ॥ ॐ नमो भगवते वासुदेवाय नमः ॥ ॥ राम

सत्वात्मिके श्वेततां शुद्धतां ॥१९॥ आकाशात्मा वायुः प्राणः समष्टिरूपः तद्रूपे मयि मानसो घोषं नादं चिंतयन्‌ ॥ असौ हंसो जीवः तत्र आकाशे उपलब्धः ज्ञाता सन्‌ ॥ तत्रस्थाः विविधा वाचः ॥ प्राणोति ॥ यद्वा तत्राव तिष्ठे उपलब्धा अभिव्यक्ता याः भूतानां वाचः ता दूरतः ॥ शृणोति इति
॥२०॥ ॥ ॥ राम ॥ ॥

145

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्वष्टाः आदिमः तस्मिन्नपरिच्छिन्ने चूत्रः संयोज्य तं च तत्त्वपि संयोज्य तत्रोभय संयोगेन मां ध्यायेत् ॥ विश्वं कृतं त्वंद्भुर नःप
श्यति ॥२०॥ मनो देहं च तदनुवर्तिना वायुना सह मयि सं संयोज्य ॥ धारणा क्रियते तेनस्याः प्रभावेन यत्र म
नो याति तत्रात्मा देहो यातीत्यर्थः ॥ यद्वा मनः कं तु आत्मानो वायुना सह मयि संसंयोज्य यत्र याति तत्र देहो या

चेतस्त्वष्टरि संयोज्य तत्त्वावमपि चेद्धषि ॥ मां तत्र मनसा
ध्यायन्विश्वं पश्यति सूक्ष्मदृक् ॥२०॥ मनो मयि सुसंयोज्य
देहं तदनुवायुना ॥ मद्धारणानुभावेन तत्रात्मा यत्र
वै मनः ॥२१॥ यदा मन उपादाय यद्यद्रूप
पंबभूषति ॥ तत्तद्भवेन्मनोरू
पं मद्योगबलमा ॥
श्रयः ॥२२॥

नीति ॥२१॥ मदनउपादाय यद्यद्याया वंकारणं कुलायय यदेवादिरूपं भवितुमिच्छति ॥ तत्तन्मनोरूपं मनोभीष्टं
रूपं योगीभवेत् ॥ कुतोः ॥ यतो मद्योगबलं ॥ योह मचिंत्य शक्तिर्नानाकारस्तस्मिन्मयि मनसो योगो धारणा
तस्य बलं प्रभावः ॥ स एवाश्रयः कारणं ॥ २२ ॥ ॥ श्री राम २२

146

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यत्र प्रविविक्षति तत्रात्मानं चिंतयेत् ततः पिंडं स्वदेहं हित्वा प्राणः प्राणप्रधानलिंगशरीरोपाधिः वायुभूतः वायुवदा
योभूतः प्रविशेन्नेतेन मार्गेणेत्यर्थः॥२२॥ पिंडं हित्वेत्युक्तं तत्र स्वकायत्यागप्रकारमाह॥ पार्ष्ण्येति॥ गुदं निरु
ध्य प्राणं प्राणोपाधिमात्मानं ब्रह्मरंध्रेण मूर्धच्छिद्रेण ब्रह्मेत्युपलक्षणं ब्रह्मवासस्थानं मेरूपरिस्थितं स्थानं मनसा
नीत्वा॥२४॥ मत्स्थं मत्स्वरूपनिष्ठं शुद्धं सत्त्वं विचिंतयेत् तदा सत्त्ववृत्तयः सत्त्वांशभूताः॥२५॥ यदा दाश्रकाले पिय

स्था

परकायं विशन्सिद्ध आत्मानं तत्र भावयेत्॥ पिंडं हित्वा विशेत्प्राणो वायुभूतः षडंघ्रिवत्॥२३॥ पार्ष्ण्या
पीड्य गुदं प्राणं हृदुरःकंठमूर्धसु॥ आरोप्य ब्रह्मरंध्रेण ब्रह्म नीत्वोत्सृजेत्तनुं॥२४॥ विहरिष्यन्सुरा
क्रीडे मत्स्थं सत्त्वं विभावयेत्॥ विमानेनोपतिष्ठंति सत्त्ववृत्तीः सुरस्त्रियः॥२५॥ यदा संकल्पयेद्बुद्ध्या
यथा वा मत्परः पुमान्॥ मयि सत्ये मनो युंजंस्तथा तत्समुपाश्नुते॥२६॥ यो वै मद्भावमापन्न ईशितुर्व
शितुः पुमान्॥ कुतश्चिन्न विहन्येत तस्य चाज्ञा यथा मम॥२७॥ मद्भक्त्या शुद्धसत्त्वस्य योगिनो धारणा
विदः॥ तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता॥२८॥

यथेति पाठे यथा वा केनापि प्रकारेण बुद्ध्या संकल्पयेत्॥ यथाकामं मत्परो मयि विश्वासवान् भवति तदा।
यदेति पाठे तत्तद्रूपं सर्वं प्राप्नोतीत्यर्थः किं कुर्वन्॥ सत्ये सत्यसंकल्पे मयि मनो युंजन्॥२६॥ मदिति स्प
ष्टत्वात् समेत्यर्थः ईशितुः सर्वनियंतुः वशितुः स्वतंत्रस्य॥ मद्भावं स्वभावं प्राप्तः एतौ गुणौ हेतवः॥२७॥
अतः परं तत्तद्धारणाविदः इति त्रिकालज्ञत्वधारणा सूचिता त्रैकालिकी त्रिकालवस्तुविषया स्वजन्मम
त्युभ्यामुपबृंहिता तत्सहिता अत एव परचित्ताद्यभिज्ञतापि व्याख्याता॥२८॥

147

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अग्न्यादिसर्वैरपि ज्वालतद्भ्यो भगवानिमेवंभूतयोगमयं तैर्नाभिभूयते । अत्र हेतुः मद्योगेति यादसामुदकं यथाभिद्या ।
तेन भवति तथा तस्य वपुषोग्न्यादय इत्यर्थः ॥ अनये वा इंड्रनापि आख्याता ॥२९॥ मद्विभूतीर्ममावतारान् अब्जा
दिभिस्सह ॥३०॥ उपासकस्येति एवं प्रथयधारणाभिः ॥३१॥ यद्वा किं नानाधारणाप्रयासेन एक ।
येव सर्वाः सिद्धयो भवंतीत्याह जितेंद्रियस्येति मद्धारणां नारायणो वीयाख्याइ मनोके या सुलभा स्यात्ताका
न काचिदित्यर्थः ॥३२॥ ययप्येतं तथापि न प्राप्याइत्याह अंतरायानिति ॥३३॥ तस्माद हैतुकीयमेव धारणाका

खि२ त२

अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः ॥ मद्योगशांतचित्तस्य यादसामुदकं यथा ॥२९॥ मद्विभूतीरभिध्या
यन् श्रीवत्सास्त्रविभूषिताः उपतिष्ठंत्यशेषतः ॥३१॥ जितेंद्रियस्य दांतस्य जितश्वासात्मनो मुनेः ॥ मद्धारणां धा
रयतः का सा सिद्धिः सुदुर्लभा ॥३२॥ अंतरायान्वदंत्येता युंजतो योगमुत्तमं ॥ मया संपद्यमानस्य काल
क्षपणहेतवः ॥३३॥ जन्मौषधितपोमंत्रैर्यावतीरिह सिद्धयः ॥ योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्र
जेत् ॥३४॥ सर्वासामपि सिद्धीनां हेतुः पतिरहं प्रभुः ॥ अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनां ॥३५

ध्वजातपत्रव्यजनैः स भवेदपराजितः ३० उपासकस्य मामेवं योगधारणया मुनेः सिद्धयः पूर्वकथिताः ॥ मूलत्रुटि २

र्यान्यैः काम्यादित्याह जन्मेति ॥ जन्मनैव काश्चित्सिद्धयो भवंति यथा च यादसामुदकस्तंभः पक्ष्यादीनां खेचर
त्वादि ॥ तदुक्तं ॥ पातंजले ॥ जन्मौषधितपोमंत्रयोगाः ॥ सिद्धय इति ॥ योगेन मद्धारणासिद्धकेन योगगतिं म
त्सालोक्यादिरूपां ॥३४॥ उक्तहेतुमाह सर्वासामिति मदर्पितासु भयोपपादने हेतुः कारणं पतिः पालयिता चेति
किंच न केवलं सिद्धीनामेव प्रभुः ॥ अपितु मोक्षादीनामपीत्याह ॥ अहमिति योगो मोक्षः सांख्यं तत्साधनज्ञानं ॥
धर्मस्तदुपदेष्टॄणां ब्रह्मवादिनां च ॥३५॥ ॥ राम ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न्यावनारम्भूतार्जुनप्रश्नसंवादितात्वयांप्रश्नः साधीयानितितावदनुमोदते॥ एवमिति त्रिभिः प्रश्नं प्रष्टव्यं संपन्नेयोजुमिक्ष
ताविनशनेनेकुरुतेत्वे॥१८॥ युयुत्सोर्विभूतिश्रवणेऽतः प्रसंगःतत्राहजानेति॥ लौकिकः प्राकृतमतिस्तत्र॥१९॥ सचयदीतते
तानिष्यक्षिपुन॥ तदासम्यक्प्रतिबोधितः सन्नुपयात्वमपिमामेवसर्वेसंग्राममुखेमामस्यसाधने॥ तद्देवत्तयासर्वा
विभूतयस्ताप्राप्यासनार्थकथ्यते॥ षष्ठीपंचमीविभक्तिःक्वचित्रिर्थावरोगामबोधनेनसंबन्धेचक्राविषयायांगदइष्ट
वाहे

श्रीभगवानुवाच॥ एवमेतदहंपृष्टः प्रश्नंप्रश्नविदांवर॥ युयुत्सुनाविनयानेसपत्नैरर्जुनेनवै॥१९॥ ज्ञात्वा
नातिवयंगर्हेमयमेराज्यहेतवे॥ नतोनिवृत्तोहंहतोयमितिलौकिकः॥ २॥ स्मृतदाप्रहृष्यव्यामृग्युतामे
प्रतिबोधितः॥ अध्यभा सृतमामेवयथात्वंवरणामृयंति॥ ३॥ अहमात्मागुडाकेश सर्वभूताशयस्थितः॥
अहंसर्वाणिभूतानितेषांस्थित्यन्तवाप्ययः॥ ४॥ अहंयातिर्मतिमतांकालःकलयतामहं॥ गुणानांचैव
हंसाम्यंगुणिनांचैवमनिकोगुणाः॥ ५॥ गुणिनांमप्यहंसूत्रंमहतांचमहानहं॥ सूक्ष्माणामप्यहंजीवोदुर्ज
यानामहंमनः॥ ६॥ हिरण्यगर्भोविदानामंत्राणांप्रणावस्त्रिवृत्॥ अक्षराणामकारोस्मिपदानित्रिछंदसाम
हं॥ ७॥ इंद्रोहंसर्वदेवानांवसूनामस्मिहव्यवाट्॥ आदित्यानामहंविष्णुरुद्राणांनीललोहितः॥ ८॥

या॥ ततश्चामी षांभूतानांआत्मेतिसव्रूह्णादितिईश्वरइतिचसामान्येनाहअयात्मेत्यर्थः॥ एवंसर्वत्रतेषांस्थित्युद्भ
वाप्ययः॥ ततदेवविदित्यर्थः॥२०॥ विशेषतो विभूतीराह॥ कलयतांवशीकुर्वतांमध्ये॥ गुणानांमध्येगुणिनायसिति
प्रौत्पत्तिकः॥ स्वाभाविकोयोगुणः सोहं॥२०॥ सूत्रंप्रथमकार्यमहान्महत्तत्वंसर्व्यात्मकत्वात्तदुर्जेयत्वाज्जीव
स्यसूक्ष्मत्वं॥ बुद्धेर्गुणेनात्मगुणेनचैववालाग्रमात्रोह्यवरोपिदृष्ट इतिश्रुतेः॥२१॥ वेदानांसर्वेषीतेषांत्र।
छायकः पदानित्रियदागायत्रीत्यर्थः॥२२॥ १२ ॥ राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आ- अयमादिसर्वोपि...
भाष्य- तेनभवतितथातस्यवगुणोग्न्यादयइत्यर्थः॥ ...

अत्र सदाचारं प्रमाणमाह ॥ याथातथ्येन यथार्थत्वेन सर्वभूतकारणत्वेन ब्राह्मणा वेदतात्पर्यविदः ॥ २ ॥ एवं कारणत्वेन सर्वात्मत्वमुक्त्वा विभूतीः पृच्छति ॥ येष्विति उपासीनाः सेवमानाः ॥ ३ ॥ दुर्ज्ञेयत्वमेवाह गूढः अस्फुटः भूतानां प्राणिनामात्मेति ॥ अत्र हेतुः भूतानामात्मा अंतर्यामी ॥ अत एव हे भूतभावनेति नेत्वया ॥ ४ ॥ तानेव साकल्येन पृच्छ-

८२ उच्चावचेषु भूतेषु दुर्ज्ञेयमकृतात्मभिः ॥ उपासते त्वां भगवन्याथातथ्येन ब्राह्मणाः ॥ २ ॥
येषु येषु च भावेषु भक्त्या त्वां परमर्षयः ॥ उपासीनाः प्रपद्यंते संसिद्धिं तद्वदस्व मे ॥ ३ ॥
गूढश्चरसि भूतात्मा भूतानां भूतभावन ॥ न त्वां पश्यंति भूतानि प
श्यंतं मोहितानि ते ॥ ४ ॥ याः काश्च भूमौ दिवि वै रसायां
विभूतयो दिक्षु महाविभूते ॥ ता मह्यमाख्याह्य
नुभाविताश्ते नमामि ते तीर्थपदां
घ्रिपद्मम् ॥ ५ ॥ राम

ति ॥ हे महाविभूते याः काश्चिद्भूम्यादिषु ते विभूतयः रसायां रसातले च अनुभाविताः त्वयैव ॥ केनचिच्छक्तिविशे
षेण संयोजिताः ॥ तीर्थानां पदं ॥ त्वदंघ्रिपद्ममेव ॥ ५ ॥ ॐ श्रीसीतारामाय रामचंद्राय नमो नमः ॥ ॥ रामजी ७५

150

ऊतस्तत्राहमहमिति सर्वदेहिनां जीवानामात्मा यतः अंतर्यामी ईश्वरः अंतरात्मा अंतर्यामिस्सतत इति श्रुतेः तर्हि किमंतर्वर्ति त्वात् परिच्छिन्नः बह्वः नवा स्वरूपेणैव पुकरत्सर्वः नत्वहेतः अनावृतः एतत् दृष्टांतमाह भूतेषु चतुर्विधेषु महाभूतानि यथा वहिः स्थितानि भवंति स्वयमपि तथेत्यर्थः ॥३६॥ इति श्री एकादशस्कंधे पंचदशः ॥१५॥ षोडशे तु हरे राविर्भावयुक्ता विभूतयः ज्ञानवीर्यप्रभावादि विशेषेणोपवर्णिता ॥ अंतस्थितेन यज्ञान मशक्यमकृतात्मनां ॥ अतस्तत्र धारणया तापनेन विभूत्यादि निरूपणं ॥ एवं तावद्बहुधा यासूक्ष्मप्रस्तानि रूपिताः अस्मन्नसंभवेनात्म प्रमादिचिंतन इत्यये ॥ वेयस्सुक्रोधस्तु निर्धार्य मदन्मोक्षतः परं ॥ द्वादशेनतर्दकर्मकृतिमायायां स्थितौ ॥ हे सेति हासनतोयानि ष्ठायानुत्रयोदशो ॥ श्रेयः साधन निर्धारियाने वैवचतर्दशे ॥ धारणासिद्धिबुद्धी च प्रसंगेन निरूपते ॥ इदं वश्यन्नो दन्नश्च ने रेह हरिणा चिंतं ॥ षोडशेऽप्य

अहमात्मांतरो बाह्योनावृतः सर्वदेहिनां ॥ यथा भूतानि भूतेषु बहिरंतः स्वयं तथा ॥३६॥ इति श्रीभागवते एकादशस्कंधे भगवदुद्धवसंवादे पंचदशोऽध्यायः ॥१५॥ श्रीउद्धव उवाच ॥ त्वं ब्रह्म परमं साक्षादनाद्यंतमपावृतं सर्वेषामपि भावानां त्राणस्थित्यप्ययोद्भवः ॥१॥

ति विस्तारेद्वयो वर्णाश्रमश्रुते ॥ ज्ञानादिनिर्णये चातो यमादीनां च निर्णये ॥ योगाद्यधिकारे च विशेषे च तदंतरे ॥ तत्व संख्या विवादे च पुंप्रकृत्योर्विवेचने ॥ जन्मसहस्रप्रकारे च द्वाविंशो तदनंतरं ॥ परापराधयो नैक्षस्ताधिस्तदनंतरेः सप्तविंशे क्रियायोगाश्रयेनंतद्वर्णने ॥ अष्टाविंशतितः प्रोक्तां ज्ञानयोगोपसंहृतिः ॥ अहमात्मांतरो बाह्यो ॥ एवं प्रश्नेनराण एक क्रमेणैतानि विंशतिः संसार संभव प्रश्ने तन्मध्ये दत्तमुत्तरं ॥ तद्धावत्या पुनः प्रश्ने भक्तियोगोपसंहृतिः अहमात्मांतरो बाह्योनावृतः सर्वदेहिनां ॥ यथा भूतानि भूतेषु बहिरंतः स्वयं तथेत्युक्तं ॥ तत्र च भूतानि यथा बहिस्थे न विश्लेषणविशेषेणा द्विजाः निवर्तंते क्वचित्स्वामाप्यरूपेणैव तथात्मापि क्वचित् धर्मसेइति विभूतीः ॥ इह प्रथमं तावदुक्तमेव सर्वात्मत्वमनुपपादयन्ननुवदति त्वं ब्रह्मेति अपावृतं निरावरणं स्वतंत्रं बाह्यांतरं च सर्वेषामपि त्राणस्थि

हविर्धानी कामधेनुः ॥१४॥ ॥१५॥ नक्षत्रौषधीनां मध्ये सोमं ॥ यक्षरक्षसां मध्ये वैश्रवणमस्मि स्पर्धः ॥१६॥ यादसां प्रभुं तपतां
प्रतापवतां द्युमतां दीप्तिमतां च मध्ये ॥१७॥ संयमतां दंडयतामस्मि यमः ॥१८॥ शृंगिणां दंष्ट्रिणां च मध्ये तुर्याश्रमवर्त्तितुर्यः
संन्यासः प्रथमो ब्राह्मणः ॥१९॥ स्रोतसां प्रवाहानां ॥ सरसां स्थिरोदकाशयानां ॥२०॥ धिष्ण्यानां निवासस्थानानां

ब्रह्मर्षीणां भृगुरहं राजर्षीणामहं मनुः ॥ देवर्षीणां नारदोऽहं हविर्धान्यस्मि धेनुषु ॥१४॥ सिद्धेश्वराणां कपि
लः सुपर्णोऽहं पतत्रिणां ॥ प्राजापतीनां दक्षोऽहं पितॄणामहमर्यमा ॥१५॥ मां विद्ध्युद्धव दैत्यानां प्रह्लादमसु
रेश्वरं ॥ सोमं नक्षत्रौषधीनां धनेशं यक्षरक्षसां ॥१६॥ ऐरावतं गजेंद्राणां यादसां वरुणं प्रभुं तपतां द्युमतां
५ सूर्यं मनुष्याणां च भूपतिं ॥१७॥ उच्चैःश्रवास्तुरंगाणां धातूनामस्मि कांचनं ॥ यमः संयमतां चाहं सर्पाणामस्
नराधिपं मि वासुकिः ॥१८॥ नागेंद्राणामनंतोऽहं मृगेंद्रः शृंगिदंष्ट्रिणां ॥ आश्रमाणामहं तुर्यो वर्णानां प्रथमोऽनघ ॥१९
तीर्थानां स्रोतसां गंगा समुद्रः सरसामहं ॥ आयुधानां धनुरहं त्रिपुरघ्नो धनुष्मतां ॥२०॥ धिष्ण्याना
मस्म्यहं मेरुर्गहनानां हिमालयः ॥ वनस्पतीनामश्वत्थ ओषधीनामहं यवः ॥२१॥ पु
रोधसां वसिष्ठोऽहं ब्रह्मिष्ठानां बृहस्पतिः ॥ स्कंदोऽहं सर्वसेनान्यामग्रण्यां भ
गवानजः ॥२२॥ यज्ञानां ब्रह्मयज्ञोऽहं व्रतानामविहिंसनं ॥ वाय्वग्न्यर्का
म्बुवागात्मा शुचीनामप्यहं शुचिः ॥२२॥ ॥ ॐ रामायनमः ॥

दुर्गमानां ॥२१॥ ब्रह्मिष्ठानां वेदार्थनिष्ठानां ॥ सेनान्यां च नृपतीनां अग्रण्यां सन्मार्गप्रवर्तकानां अजो ब्रह्मा शुची।
नां शोधकानामपि मार्जनलक्षणवर्षणादीनां वाय्वादिरूपः शोधकोऽहम् ॥२२॥ ॥ राम
ॐ रामायनमः ॥ ॥ ॥ राम ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योगानामष्टांगयोगानां मध्ये आत्मसंयोगः समाधिरहं ॥ नीतिकौशलानां विविधकौशल्येषु मध्ये आन्वीक्षिकी ॥ आत्म
नामात्मविवेकविचारख्यातिः अख्यातिरन्यथाख्यातिः असत्ख्यातिः ॥ असंख्यातिनिर्वचनीयख्यातिवादिनां ॥ एवमिदं मे
वं चेति योद्धुरन्तो विकल्पः सोऽहमिति मर्षः ॥ २४ ॥ कुमारः सनत्कुमारः ॥ २५ ॥ संन्यासो भूतानामभयदानं ते मम भयस्थानानां मध्ये
अवहिर्मतिः ॥ अनुनिष्ठा सूनृतं प्रियवदनं मौनं च ॥ नहि प्रियभाषणेन मौनेन च पुरुषस्यापि प्रायेण ज्ञायते ॥ जायते अजः
प्रजापतिः ॥ यस्य देहाद्यामिथुनं समभूत ॥ स एवं अस्त्वमिथुनेष्वर्थोहं वा एष आत्मनीय सन्तीति स्कन्दः ॥ २९ ॥ अना

योगानामात्मसंयोगो योऽसंयोगोऽस्मि विजिगीषतां ॥ आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनां ॥ २४ ॥ स्त्री
णां तु शतरूपाहं पुंसां स्वायंभुवो मनुः ॥ नारायणो मुनीनां च कुमारो ब्रह्मचारिणां ॥ २५ ॥ धर्माणामस्मि सं
न्यासः क्षेमाणामबहिर्मतिः ॥ गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहं ॥ २६ ॥ संवत्सरोऽस्म्यनिमिषामृतू स्य २
नां मधुमाधवौ ॥ मासानां मार्गशीर्षोऽहं नक्षत्राणां तथाभिजित ॥ २७ ॥ अहं युगानां च कृतं धीराणां देवलोऽसि
तः ॥ द्वैपायनोऽस्मि व्यासानां कवीनां काव्य आत्मवान ॥ २८ ॥ वासुदेवो भगवतां त्वं तु भागवतेष्वहं ॥ किंपुरु
षाणां हनुमान्विद्याध्राणां सुदर्शनः ॥ २९ ॥ रत्नानां पद्मरागोऽस्मि पद्मकोशः सुपेशसां ॥ कुशोऽस्मि दर्भजा
तीनां गव्यमाज्यं हविःष्वहं ॥ ३० ॥

मधौ माधवे मधुमाधवौ वसंतऋतुरूपौ ॥ अभिजित नक्षत्रं उत्तराषाढाचतुर्थः पादः तथा श्रवणप्रथमपादः तथा च श्रु
तिः अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानां अवस्तात् श्रवणस्येत्यादि ॥ २७ ॥ कृतं कृतयुगं देवलः असितः मुनीनां व्या
सानां वेदविभागकर्तॄणां कवीनां विदुषां काव्यः शुक्रः ॥ २८ ॥ भगवतां उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिं ॥ वे
त्ति विद्यामविद्यां च स वाच्यो भगवानिति एवं लक्षणानां ॥ २९ ॥ सुपेशसां सुंदराणां पेशलानां कोमलानां दर्भजातीनां
कामाहवेदीनां हविःषु पुरोडाशादिषु आज्यं तेषु वा ॥ ३० ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लक्ष्मीः यत्नादिसंयुत ॥ २१ ॥ बलवतां ओजश्च सहश्च सात्वतां भागवतानां भक्त्या कृतं कर्माहमित्यर्थः ॥ तेषामेव नवमूर्त्यर्चे
नेवासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहब्रह्माण इति याः नवमूर्तयः तासां मध्ये वासुदेवा-
ख्या ॥ २२ ॥ गंधर्वाणां विश्वावसुः अप्सरसां पूर्वचित्तिः गंधमात्रे प्रविकृत ॥ २३ ॥ परमः समुद्रः परा ख्याः शास्त्र ॥ २४ ॥ अर्जु-
नः पार्थः भूतानां प्राणिनां प्रभूतिसंक्रमः प्रलयः ॥ २५ ॥ गमनादयः पंचकर्मेंद्रियव्यापाराः स्पर्शादयो ज्ञानेंद्रियव्यापा-
राः तत्र लक्षणदर्शनं सर्वेंद्रियाणामिंद्रियं तत्तत्प्रवृत्तिहेतुः रूपं अहं ॥ २६ ॥ न देवं तत्र तत्र निर्धारणे न तत्र च ।

व्यवसायमहं लक्ष्मीः कितवानां छलग्रहः ॥ तितिक्षास्मि तितिक्षूणां सत्त्वं सत्ववतामहम् ॥ ३१ ॥ ओजः सहो
बलवतां कर्माहं विद्धि सात्वतां ॥ सात्वतां नवमूर्तीनां आदिमूर्तिरहं परा ॥ ३२ ॥ विश्वावसुः पूर्वचित्तिर्गंधर्वा-
प्सरसामहं ॥ भूधराणामहं स्थैर्यं गंधमात्रमहं भुवः ॥ ३३ ॥ अपां रसश्च परमस्तेजिष्ठानां विभावसुः ॥ प्र-
भा सूर्येंदुताराणां शब्दोहं नभसः परः ॥ ३४ ॥ ब्रह्मण्यानां बलिरहं वीराणामहमर्जुनः ॥ भूतानां स्थिति-
रुत्पत्तिरहं वै प्रतिसंक्रमः ॥ ३५ ॥ गत्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणं ॥ आस्वादश्रुत्यवघ्राणम
हं सर्वेंद्रियेंद्रियं ॥ ३६ ॥ पृथिवी वायुराकाश आपो ज्योतिरहं महान् ॥ विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः प-
रम् ॥ अहमेतत्प्रसंख्यानं ज्ञानं तत्त्वविनिश्चयः ॥ ३७ ॥

संबंधेन च विशेषचोदितमूर्तीनिरूप्येदानीमात्मनः सर्वात्मकत्वं निरूपयति पृथिवीति सार्धद्वयेन पृथिव्यादिपंचभू-
तानि महाभूतानि विवर्तितानि ॥ अहंकारः महदात्मकः तत्वं एताः सप्त प्रकृतिविकृतयः विकारः पंच महाभूतानि ए-
कादशेंद्रियाणि चेति वै षोडश संख्याकः पुरुषो जीवः अव्यक्तं प्रकृतिः एवं पंचविंशति तत्वानि तदुक्तं ॥ मूलप्रकृतिर-
विकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः सत्त्वरजस्तमसि प्रकृतेर्गु-
णाः अपरं ब्रह्म च तदेतत्सर्वमहमेव किंच एतत्प्रसंख्यानं तेषां परिगणनं एतेषां लक्षणतो ज्ञानं तत्फलं तत्त्वविनिश्चय

154

श्रीभा. टी. एका. ॥ ८८ ॥ ७५

एतदेवसंक्षिप्याह मयेति जीवेषु स्वरूपो द्विविधोयं भावः व्यष्टिगुणात्मरूपः यस्य देवात्मा तेत्ररूपः स सर्वोपि मया विनाम व्यतिरेकेण नास्ति अहमेव सर्वमित्यर्थः ॥ ३८ ॥ ननु सा माया ततः किमेवं संक्षिप्य कथ्यते समुद्देशवत् ॥ निर्धारणे सैव यावन्त्यो विशेषतः ॥ सर्वाः कथयेति चेत्तत्राह संख्यानं परमाण्वादिपरमाणूनां कालेन महता नन्दपि मया व्यक्रियते ह तावत्त्वं वक्तुं शक्यते तथा मे विभूतीनां संख्यानं कर्तुं न शक्यते ॥ कुत इत्यत आह सृजतोंडानि निरवद्यमया सृज्यमानानां ब्रह्माण्डानामेव तावत्संख्या नास्ति ॥ तदाश्रितानामनंतानां विभूतीनां संख्येत्यर्थः ॥ ३९ ॥ तथापि विशेषत एव सर्वाः संक्षेपतः

मयेश्वरेण जीवेन गुणेन गुणिना विना ॥ सर्वात्मनापि सर्वेण न भावो विद्यते क्वचित् ॥ ३८ ॥ संख्यानं परमाणूनां कालेन क्रियते मया ॥ न तथा मे विभूतीनां सृजतोंडानि कोटिशः ॥ ३९ ॥ तेजः श्रीः कीर्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः ॥ वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंशकः ॥ ४० ॥ एतास्ते कीर्तिताः सर्वाः संक्षेपेण विभूतयः ॥ मनोविकारा एवैते यथा वाचाभिधीयते ॥ ४१ ॥ वाचं यच्छ मनो यच्छ प्राणान् यच्छेंद्रियाणि च ॥ आत्मानमात्मना यच्छ न भूयः कल्पसेध्वने ॥ ४२ ॥

कथयामीत्याह तेजः प्रभावः श्रीः संपत् ॥ सौभाग्यं मनोनयनाह्लादकत्वं भगः भाग्यं वीर्यं बलं मंशकः विभूतिः ५०
एते च द्विभूतिभेदा मयि चिन्नावतारायकल्पिताः अतो न तासामभिनिवेशः कर्तव्यः इत्याह मनोविकारा एव न तत्परमार्थः ॥ यथा किंचित् स्वप्नदृष्टादि वाङ्मात्रेणाभिधीयते ॥ इति तुल्याः ॥ ४१ ॥ तस्माद्वागादीन्नियच्छ आत्मानं बुद्धिमात्मना सत्वसंपन्नया नियच्छ ॥ अध्वने संसारमार्गाय ॥ ४२ ॥ ॥ रामायनमः ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

असंयमने अप्रशांतचित्ते दोषमाह ॥ य इति असंयच्छन् न संयच्छति ॥ ४३ ॥ परिसमाप्यते कृतकृत्यो भवतीत्यर्थः ॥ ४४
इति श्रीभावार्थदीपिकायां एकादशस्कंधे षोडशोध्यायः ॥ १६ ॥ ततः सप्तदशे पृष्टे स्वधर्मे भक्तिलक्षणे । हंसोक्तं धर्म
मत्वाह ब्रह्मचारिगृहस्थयोः ॥ कर्तर्हि विहिंसा हतानिमित्तं भक्ताकृतं कर्म मोक्षसाधनं महिभूतिविस्तृतं भक्तिसाध
नत्वेन कर्मणां मर्यादितेष्ववदितः स्वधर्मेष्वित्यादिनानंतरोक्तं न च कर्माणुष्ठानं नृणां भक्तिरूपं तेन तत्र पृच्छति यस्त्वये

यो वै वाङ्मनसी सम्यगसंयच्छन्धिया यतिः ॥ न तस्य व्रतं तपो दानं स्रवत्यामघटांबुवत् ॥ ४३ ॥ तस्माद्वचो मनः
प्राणान्नियच्छेन्मत्परायणः ॥ मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते ॥ ४४ ॥ इति श्रीभागवते एकादश
स्कंधे महाविभूतिर्नाम षोडशोध्यायः ॥ १६ ॥ श्रीउद्धव उवाच ॥ यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः
वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि ॥ १ ॥ यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत् ॥ स्वधर्मेणार
विंदाक्ष तन्ममाख्यातुमर्हसि ॥ २ ॥ पुरा किल महाबाहो धर्मं परमकं प्रभो ॥ यत्तेन हंसरूपेण ब्रह्म
णेभ्यात्थ माधव ॥ ३ ॥ स इदानीं सुमहता कालेनामित्रकर्षण ॥ न प्रायो भविता मर्त्यलोके प्रागनुशासितः

स्थ्य १ ध

तिसप्तभिः पूर्वं कल्पादौ त्वद्भक्तिलक्षणः त्वत्प्रायुक्तस्तत्साधनमित्यर्थः ॥ वर्णाश्रमहीनानामपि द्विपदां नरा
णाम् ॥ १ ॥ यथा येन प्रकारेणानुष्ठीयमानेन स्वधर्मेण ॥ २ ॥ ननु संप्रदायादेव ज्ञास्यते किं पुनर्वर्णनेनेत्याह ॥ पु
रेति परमके परमश्रेष्ठं सुखरूपं च ननु ॥ यो हंसरूपेण धर्मस्त्वयोक्त एव न नतु यो वा मा च ॥ जानीत मागतं या
तं गुप्तधर्मं विवक्षयेत् ॥ उक्तात्वात ॥ ३ ॥ प्रायेण प्रागनुशासितोपि न भवेत् न भविष्यति ॥ ४ ॥

राम राम राम

156

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ हेतुमाह वक्तेति द्वाभ्यां त्वत्तोन्यः कला वेदाद्याः ।।५।। तत्तस्मात् नः अस्माकं मनुष्याणां मध्ये यस्य यथा विधीयते ७
धर्म्यः धर्मादनपेतः नैःश्रेयसकरः श्रेयोमूलः तं धर्मं निबोध ।।८।। तत्रादौ महदुपासनालक्षण एव मुख्यो धर्म आ
सीत् आचारलक्षणस्तु पश्चात् इत्याह तः सर्वे वर्णमनुष्या नामकिं हेतु विविधवर्णाधिनत्वमाह आदाविति कल्पादौ यत्कृ
तयुगं तस्मिन् ते च तदा मामुपासत एव केवलं नान्यत्कुर्वन्तीति कृतकृत्या कृतयुगनामनिरुक्तिमाह कृतकृत्या इ।

वक्ता कर्ताविता नान्यो धर्मस्याच्युत ते भुवि ।। सभायामपि वैरिञ्च्यां यत्र मूर्तिधराः कलाः ।।५।। कर्त्रावि
त्रा प्रवक्त्रा च भवता मधुसूदन ।। त्यक्ते महीतले देव विनष्टं कः प्रवक्ष्यति ।।६।। तत्त्वं नः सर्वधर्मज्ञ धर्मस्त्व
द्भक्तिलक्षणः ।। यथा यस्य विधीयेत तथा वर्णय मे प्रभो ।।७।। श्रीशुक उवाच ।। इत्थं स्वभृत्यमुख्येन प
ृष्टः स भगवान्हरिः ।। प्रीतः क्षेमाय मर्त्यानां धर्मानाह सनातनान् ।।८।। श्रीभगवानुवाच ।। धर्म्य एष
तव प्रश्नो नैःश्रेयसकरो नृणां ।। वर्णाश्रमाचारवतां तमुद्धव निबोध मे ।।९।। आदौ कृतयुगे वर्णो नृ
णां हंस इति स्मृतः ।। कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः ।।१०।। वेदः प्रणव एवाग्रे धर्मोऽहं
वृषरूपधृक् ।। उपासते तपोनिष्ठा हंसं मां मुक्तकिल्बिषाः ।।११।।।

ति जात्याजन्मनैव ।।९।। किंच विधेयकाभावादपि तदानीं नान्यत्कर्मास्तीत्याह वेद इति ।। धर्मस्त्वमनोविषयो ह
मेव वृषरूपधृक् चतुष्पात् न क्रियाविशेषो यज्ञादिः ।। अतस्तपोनिष्ठाः मनसश्चेन्द्रियाणां च ऐकाग्र्यं परमं तपः ।
इति वचनादेकाग्रतया हंसं शुद्धं ।। मां ध्यायन्तीत्यर्थः ।।१०।। ।। राम ८ ।।

157

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पश्चात्त्रेतायां प्रवेशे वैराजरूपस्य प्राणान्निर्भिन्नाद्धृदयात्सकाशात्ततस्तस्मात्त्रय्याः सकाशात्त होत्रमध्वर्यवौद्गात्रैः त्रिवृत् त्रिरूपः
यज्ञो ह वै विष्णुरिति श्रुतेः ॥ वर्णानामाश्रमाणां च धर्मांल्लक्षणतो मम त्रिसाहृदाभ्यां विविक्तेति ॥ आत्माचारः स्वधर्म एव लक्ष
णं ज्ञापकं येषां ॥१२॥ न मम वैराजरूपस्य हृदः वक्षसो यस्तात् ब्रह्मचर्यं नैष्ठिकाभिप्रायं ॥१३॥ तेषामभ्यधिकाविशेषणस्वभा
वानाह ॥ वर्णानामिति पंचभिः जन्मस्थानानुसारिणीः नीचैर्निमयाद्यं ॥ अतोयमर्थः मदाभिर्जन्मभूमिभिः मेदाः उत्त

मा३

त्रेतामुखे महाभाग प्राणान्मे हृदयात्त्रयी ॥ विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः ॥११॥ विप्रक्षत्रियविट्शू
द्रा मुखबाहूरुपादजाः ॥ वैराजात्पुरुषाज्जाता य आत्माचारलक्षणाः ॥१२॥ गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम ॥
वक्षःस्थलाद्वने वासः सोन्यासः शिरसि स्थितः ॥१३॥ वर्णानांश्रमाणां च जन्मभूम्यनुसारि
णीः ॥ आसन्प्रकृतयो नृणां नीचैर्नीचोत्तमोत्तमाः ॥१४॥ शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवं ॥ मद्भ
क्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमाः ॥१५॥ तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः ॥ स्थैर्यं ब्रह्म
ण्यमैश्वर्यं क्षत्रप्रकृतयस्त्विमाः ॥१६॥ आस्तिक्यं दाननिष्ठा च अदंभो ब्रह्मसेवनं ॥ अतुष्टिरर्थोपचयैर्वै
श्यप्रकृतयस्त्विमाः ॥१७॥ शुश्रूषणं द्विजगवां देवानां चाप्यमायया ॥ तत्र लब्धेन संतोषः शूद्रप्रकृतय
स्त्विमाः ॥१८॥ अशौचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः ॥ कामः क्रोधश्च तर्षश्च स भावोऽन्त्यावसायि
नां ॥१९॥ अहिंसा सत्यमस्तेयमकामक्रोधलोभता ॥ भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः २०

क्रोध सर्वभूत।

त्रमाभिरुत्तमाश्चेति ॥१४॥ तप आलोचनं ॥१५॥ तेजः प्रतापः एतैरेवाश्रमस्वभावा अपि ज्ञेयाः ॥१६॥ तत्रा
न्त्यानां स्वभावानाह ॥ अशौचमिति शुष्कविग्रहः निर्मूलकलहः तर्षः तृष्णा ॥१९॥ तत्र तावत्सर्वसाधारणं
धर्ममाह ॥ अहिंसेति वर्णगृहणमुपलक्षणार्थम् ॥२०॥ ॥ ॥ रामायनमः ॥ ॥ ॥ ७८

158

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्णधर्मान्गृहस्थप्रकरणे वक्ष्यति ॥ अथ संतावदाश्रमेषु ब्रह्मचारिणो धर्मान्वक्ष्यन्स च द्विविधः उपकुर्वाणो नैष्ठिकश्च
तत्राद्यस्य धर्मानाह द्वितीयमिति त्रिभिः द्विजः त्रैवर्णिकः आनुपूर्व्या गर्भाधानादिसंस्कारक्रमेण द्वितीयमुपनयना
ख्यं जन्म प्राप्य आचार्येणाहूतो ब्रह्म वेदमधीयीत तच्चकारादर्थं च विचारयेत् ॥२२॥ किं च मेखलादीन्कुशांश्च दधत् अ
न्यपाह्नान्तमालोकयन्स्तु जटिलः ॥ अनेनैवादिनाज्ञानजटः ॥ तथा अधौतदद्वासः अरक्तपीठः ॥ दंतश्च वासश्च दधा

२२

द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः ॥ वसन्गुरुकुले दांतो ब्रह्माधीयीत चाहूतः ॥२२॥ मेखलाजिनदंडा
क्षब्रह्मसूत्रकमंडलून् ॥ जटिलोऽधौतदद्वासोऽरक्तपीठः कुशान्दधत् ॥२३॥ स्नानभोजनहोमेषु जपोच्चारे च वाग्यतः ॥ नच्छिंद्यान्नखरोमाणि कक्षोपस्थगतान्यपि ॥२४॥ रेतो नावकिरेज्जातु ब्रह्मव्रतधरः स्वयं ॥ नमेत्
अवकीर्णेऽवगाह्याप्सु यतासुस्त्रिपदीं जपेत् ॥२५॥ अग्न्यर्काचार्यगोविप्रगुरुवृद्धसुरान्छुचिः ॥ समाहि
तमुपासीत संध्ये च यतवाग्जपन् ॥२६॥ आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् ॥ न मर्त्यबुद्ध्यासूयेत
सर्वदेवमयो गुरुः ॥२७॥ सायं प्रातरुपानीय भैक्षं तस्मै निवेदयेत् ॥ यच्चान्यदप्यनुज्ञातमुपयुंजीत संयतः

य२ २५

सां सिन्नयोनानियमः अधौतदद्वासाः स चासावरक्तपीठश्चेति कौतकादिनारक्तः पीठ आसनं यस्य सः ॥२३॥ ज
पश्च उच्चारो मूत्रपुरीषोत्सर्गश्च जपोच्चारे तस्मिन्वाग्यतः मौनी भवेत् ॥२४॥ रेतो बुद्धिपूर्वं नोत्सृजेत् ब्रह्मव्रतधरः
अगृहस्थः स्वयमेव कथंचिदवकीर्णे अवगाह्य स्नात्वा यतासुः कृतप्राणायामः त्रिपदीं गायत्रीं जपेत् ॥२५॥ संध्ये च
ईयतवाक् जपन्नुपासीत मध्याह्ने संध्या तिस्र इति मौनं नास्तीति द्विवचनं ॥२७॥ अमत्यदपि यत्तस्मा मंतव्यं निवेदयेत् तेना
नुज्ञातं तत्संयतः सन्नुपयुंजीत समर्थः ॥२८ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग
टी
७५

यानशय्यासनस्थानैर्यानं तदुपस्थानोयानेन विदितमनुसरनयासमीपशयनेन॥ विश्रान्ते तत्पादसंवाहनादिभिः समीपासनेन आसीनेन कृताञ्जलिः नियोगं प्रतीक्षमाणेन नातिदूरे च स्थानेन समर्थः॥२९॥ एवंभूतव्रतमाचारयन् समस्तः॥३०॥ एवमुपकुर्वाणकस्य धर्मानुक्त्वा नैष्ठिकस्य विशेषधर्मानाह॥ यदीति षड्भिः॥ यद्यसौ ब्रह्मचारी यदि छन्दसां लोकं महर्लोकं ततो ब्रह्मलोकं चारोक्ष्यन् आरोढुमिच्छन् तर्हि तथा॥ यद्वा छन्दसां लोकमिति ब्रह्मलोकविशेषणं॥ यत्र मूर्तिमं

शुश्रूषमाण आचार्यं सदोपासीत नीचवत्॥ यानशय्यासनस्थानैर्नातिदूरे कृताञ्जलिः॥२९॥ एवंवृत्तो गुरुकुले वसेद्भोगविवर्जितः॥ विद्या समाप्यते यावद्बिभ्रद्व्रतमखण्डितं॥३०॥ यद्यसौ छन्दसां लोकमारोक्ष्यन् ब्रह्मविष्टपं॥ गुरवे विन्यसेद्देहं स्वाध्यायार्थं बृहद्व्रतः॥३१॥ अग्नौ गुरावात्मनि च सर्वभूतेषु मां परं॥ अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः॥३२॥ स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकं॥ प्राणिनो मिथुनीभूतानगृहस्थोऽग्रतस्त्यजेत्॥३३॥ शौचमाचमनं स्नानं संध्योपासनमार्जवं॥ तीर्थसेवा जपोऽस्पृश्याभक्ष्यसंभाष्यवर्जनं॥३४॥ सर्वाश्रमप्रयुक्तोऽयं नियमः कुलनन्दन॥ मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः॥३५॥ एवं बृहद्व्रतधरो ब्राह्मणोऽग्निरिव ज्वलन्॥ मद्भक्तस्तीव्रतपसा दग्धकर्माशयोऽमलः॥३६॥ ॥ राम

राकलाद्युक्तत्वात्॥ नहि ब्रह्मचर्यतः सन् बृहत् नैष्ठिकं व्रतं यस्य सः विद्यासमाप्तौ समर्पयेत्॥ अथ किं स्वाध्यायार्थं च प्रतीत निष्ठ्यार्थं च॥३१॥ ब्रह्मवर्चः वेदाभ्यासजं तेजः महान्॥३२॥ न सेवन सर्वस्य गृहस्थसाधारणधर्मानाह॥ स्त्रीणा मिति॥ निरीक्षणं भावगर्भं क्ष्वेलनं परिहासः एवमादिकं त्यजेत् मिथुनीभूतानगृहस्थो ग्रस्तः त्यजेत्॥ समर्थः॥३३॥ न सेव सर्वाश्रमसाधारणधर्ममाह॥ शौचमिति द्वाभ्यां निष्कामस्य नैष्ठिकस्य मोक्षफलमाह एवमिति॥ अमलः निष्कामस्य
यतः कर्माशयो यतः करणीयस्तथाभूतः मद्भक्तो भवति॥३६॥ ॥

७५

१६०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उपकुर्वाणस्य समावर्तनप्रकारमाह ॥ अथेति अनंतरं द्वितीयमाश्रमं यावेदयन् इच्छन्सत्यथाययावत्तविवाहि
तवेत्यर्थः स्नायात् अग्न्यंगादिकं कृत्वा समावर्तेतेत्यर्थः ॥ ३७ ॥ तस्याधिकारानुरूपमाश्रमविकल्पमनुज्ञयाबाह गृह।
मिति सकामश्चेत् ॥ गृहं प्रविशेत ॥ यं तःकरणस्याद्यादिकामसंबंधेन प्रविशेत शुद्धांतःकरणः स च द्विजोत्तमः आश्रमं।
प्रव्रजेदित्यर्थः यद्वाश्रमादाश्रमांतरं वांछेत ॥ अन्यथाश्रमाश्रमी प्रतिलोमं च न चरेदित्यर्थः ॥ आश्रमपरंपरत्वात् वा।
छेदः समन स्याश्रमनियमाभावसंबंधमापालनात ॥ ३८ ॥ विवाहनियमपूर्वकं वर्णधर्मेः सह स्वधर्ममाह ॥ गृहार्थी

अथानंतरमावेक्ष्यन्यथाजिज्ञासितागमः ॥ गुरवे दक्षिणां दत्वा स्नायाद्गुर्वनुमोदितः ॥ ३७ ॥ गृहं वनं वोपवि
शेत्प्रव्रजेद्वा द्विजोत्तमः ॥ आश्रमादाश्रमं गच्छेन्नान्यथामत्परश्चरेत् ॥ ३८ ॥ गृहार्थी सदृशीं भार्यामुद्वहेद
जुगुप्सितां ॥ यवीयसीं तु वयसा यां सवर्णामनुक्रमात् ॥ ३९ ॥ इज्याध्ययनदानानि सर्वेषां च द्विजन्मनां
प्रतिग्रहोध्यापनं च ब्राह्मणस्यैव याजनं ॥ ४० ॥ प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदं ॥ अन्याभ्यामे
व जीवेत शिलैर्वा दोषदृक्तयोः ॥ ४१ ॥ ब्राह्मणस्यैव देहोयं क्षुद्रकामाय नेष्यते ॥ कृच्छ्राय तपसे चेह
प्रेत्यानंतसुखाय च ॥ ४२ ॥

सदृशीं सवर्णां अजुगुप्सितां कुललोलक्षणानिंदितां वाससंतत्या मन्यामुद्वहेत तां सवर्णां अनुतस्याश्चानं
तरं तत्रापि वर्णक्रमेणोद्वहेदित्यर्थः ॥ तिस्रो वर्णानुपूर्व्येण द्वे तथैकायथाक्रमं ब्राह्मणक्षत्रियविशां भार्याः स्वाः
शूद्रजन्मनः ॥ ३९ ॥ तत्रापि मुख्यामुख्यभूतेज्याध्ययनामिति स्मृतेः इत्यादयः त्रैवर्णिकानामावश्यका धर्माः प्रतिग्र
हादित्रयं तत्वृत्तिः सा च ब्राह्मणस्यैव ॥ ४० ॥ तत्रापि मुख्यामुख्यत्वं मां चान्यां वृत्तिमाह प्रतिगृहमिति तयोर्वर्जनाध्या
पनयोरपि याजनादिदोषं यस्तपस्विशिलैः स्वामिसंक्षेः देवपतितैः कणैशः ॥ ४१ ॥ एवं वृत्तिकार्पण्यं ब्राह्मणस्य नेत्साढ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
माय
टी
८० कवृत्तिर्नामविपणादिपतितकणोपादानं तं शिलवृत्तिमेकैककणनयानुष्ठानवतः समाव फलमाह ॥ शिलोंछेति मंदोन्न
मातिष्यादिलवणं ॥ विरजेतिः कामं सेवमानः गृह एव गृहस्थाश्रम एव नातिप्रसक्तः अतिप्रायेण विषयासक्तोऽवंन्न
पुनाति मुपैति सुखाधिकारी भवति ॥५१॥ एवमन्ननस्य प्रतिग्रहस्य महत्त्वं लब्ध्वा कार्यमथ न स्या प्याह त्रिभिः सम्पुरुद्धं वं तिदा
विप्रान्तञ्जारयंति विप्रमिति उपलक्षणं ॥ सत्यारायणां कमपि ॥५३॥ राजन्यस्तु आवश्यकमेतदित्याह सर्वाहिति ॥ सर्वे
षां आपद्युनीराह ॥ पणेपविक्रयार्हैः नवमवालवणाद्यैः तथापापदाकोलस्यैव ॥ स्वकेनदत्तियहस्माय यपि गोतमो

शिलोंछमप्याददीत विप्रो धर्मं महान्तं विरजं जुषाणाः ॥ मन्यपितान्यागृह एव तिष्ठन्नातिप्रसक्तः समुपै
ति पुनाति ॥५२॥ सम्पृद्धं वंतियेविप्रसीदं तं मनूपरायणां ॥ नानुद्धविद्येन विवादापद्यानो विवार्णवान ॥५३॥ स
५३ र्वः सम्पृच्छिद्याजापतिके व ह्यसंबाल्सजाः ॥ आत्मानं मात्मना शीरोय यागजयतिराजसु ॥५४॥ एवं विधो न रप
तिर्विमाने नार्कवर्चसा ॥ विभूयेद्धान्ग्रं ने हन्त्वासिंदेणा सहमोदते ॥५५॥ सीदन्विप्रो वणिग्वृत्त्या पापोपरे
वापदं तरेत् ॥ स्वकेनवापदाक्रान्तो न स्पृहयाका कथंचन ॥५६॥ वैश्यप्रवृत्त्यात्तु राजन्यो जीवेत्सर्वाययापदि
चरेद्वा विप्रवृपेण न स्पृहयाका कथंचन ॥५७॥ शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुः कदिः क्रियां ॥ कुर्वन्नु
क्तो न गर्हणीयवृत्तिं लिप्सेत कर्मणा ॥५८॥ ॥

तथापापीयसीं वृत्तिमातिष्ठेत ॥ इतिस्मरणात् ॥ स्वधर्मो धारणे पण्य विक्रयात्कृष्टं मन्यते ॥ तथापि हिंसातनोव
णिग्वृत्तिरेव श्रेष्ठेति भगवतो मतं ॥ तत्र स्पृहपत्यानीच सैव यानी चोनामावेस्तवः ॥५९॥ तत्राप्यापदि मरायेया वि
प्रवृपेणावाप्यायनादिना ॥६०॥ कारवः प्रतिलोमजा विशेषाः कुरुडादयः तेषां वृत्तिं कदाचित्क्रियां आपद्यन्ती
णस्तनतत्कलेननवर्तेत्याह ॥ कुर्वन्निति ॥५८॥ ॥ ८०

62

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न देवं बुद्धिर्यथावस्थाप्रकाश्य पुनर्गृहस्थस्यावश्यकार्यं वयसा नाहं वेदाध्ययनं ब्रह्मयज्ञः ॥ तेन ऋषीन्स्वाहाकारेण देवा
न् स्वधाकारेण पितॄन् बलिहरणेन भूतानि ॥ अन्नाद्यैरुदकादिभिर्मनुष्यानिति ज्ञातव्यं ॥ यथोदयं विभवानुसारतः
तेषु ईश्वररूपदृष्टिविधेमद्रूपाणीति ॥ भावनुपकेयर्मसुकाप्राक्रानुसारं स्वधर्ममाह ॥ ४९ ॥ यदृच्छयेति द्वयं स्वधर्मविनोपा
र्जितेन वा शुक्लेन स्ववृत्त्यालब्धेन यथैनवासूस्मात्पोषणात् ॥ ५० ॥ यदृच्छयेति द्वयं स्वधर्मविनोपार्जितेन वा शुक्ले
गृहस्थस्यापि निवृत्तिनिष्ठामेवाह कुटुंबेष्विति द्वाभ्यां नश्वरं पश्येत ॥ ईश्वरनिष्ठायां प्रवृत्तोऽनभवेत ॥ नत्वदृष्टमदृ।
पायनेवार

वेदाध्यायः स्वधास्वाहाबल्यन्नाद्यैर्यथोदयं ॥ देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत ॥ ४९ ॥ यदृच्छयो
पपन्नेन शुक्लेनोपार्जितेन वा ॥ धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ॥ ५० ॥ कुटुंबेषु न सज्जेत न प्रमा
द्येत्कुटुंब्यपि ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत ॥ ५१ ॥ पुत्रदाराप्तबंधूनां संगमः पांथसंगमः ॥ अ
नुदेहं वियंत्येते स्वप्नो निद्रानुगो यथा ॥ ५२ ॥ इत्थं परिमृशन्मुक्तो गृहेष्वतिथिवद्वसन् ॥ न गृहैरनुबध्ये
त निर्ममो निरहंकृतः ॥ ५३ ॥ कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान् ॥ तिष्ठेद्वनं वोपविशेत्प्रजावा
न्वा परिव्रजेत ॥ ५४ ॥ यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः ॥ स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्य
ते ॥ ५५ ॥ अहो मे पितरौ वृद्धौ भार्या बालात्मजात्मजाः ॥ अनाथा मामृते दीनाः कथं जीवंति दुःखिताः ॥ ५६ ॥

ष्टार्थं कर्मासक्तस्य कथं स प्रमादः विचारेणेत्याह विपश्चिदिति ॥ ५१ ॥ नन्वपि दृष्टेष्टासक्तेर्वधिकत्वात्तेषां तत्स
वं तो प्रपंचयति पुत्रदारादीनामेकत्र संगमः पांथानां प्रपायामिव समागमस्तद्वत् ॥ अत्र हेतुः ॥ अनुदेहं प्रतिदेहं ते वियंति नश्य
ति ॥ निद्रानुवर्ति स्वप्नो निद्रापायेऽपयातीति ॥ ५२ ॥ अतिथिवदुदासीनः ॥ ५३ ॥ अस्याश्रमविकल्पमाह कर्म
भिरिति ॥ गृहाद्यासक्तदोषमाह ॥ यस्त्विति द्वाभ्यामेवाभिनयेद्दर्शयति ॥ अहो इति बाला आत्मजाः यस्याः सा ।
आत्मजा यस्यां माविनानाथः संतः कथं जीविष्यंतीति ॥ ५६ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री० भा० ए० टी०

गृहे आशये वासनातेन आसर्वतः त्निमंस्फुरद्यंयस्य सः अयंतमः अतिनामस्तीयाति ॥५८॥ इतिश्रीभावार्थदीपिका
यां सप्तदशोध्यायः ॥१७॥ अष्टादशे वदन्धर्मवानप्रस्थयतिगोचरं ॥ अधिकारिविशेषेण विशेषं चापि तत्कृतं ॥ क्रमप्रा
मान् वनस्थधर्मानाह वनमिति ॥ आयुषस्तृतीयभागं पंचसप्ततिवर्षपर्यंतं ॥ ततः परं तीव्रेंद्रियस्येष द्विगमो ।
पि संन्यासाधिकारः स्यादिति भावः ॥१॥ वसीत परिदधीत ॥२॥ दतः दंतान् न धावेत न प्रक्षालयेत् त्रिकालमप्सु
मज्जेत स्नायात् स्थंडिलेशयः भूमिशायी ॥३॥ तपोनपंचाग्नीन् ॥ सूर्येण सह चतुर्दिक्षु समग्नीत्रियाय ।

एवंगृहाश्रयात्निःसृत्य दर्योस्फुरद्धीरयं ॥ अतः मस्तानतु अपायत्ततोयं विशातेनमः ॥५८॥ इतिश्रीभाग
वते एकादशस्कंधे सप्तदशोध्यायः ॥१७॥ श्रीभगवानुवाच ॥ वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा ॥
वन एव वसेच्छांतस्तृतीयं भागमायुषः ॥१॥ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत् ॥ वसीत वल्कलं
वासस्तृणपर्णाजिनानि च ॥२॥ केशरोमनखश्मश्रुमलानि बिभृयाद्दतः ॥ न धावेदप्सु मज्जेत त्रिका
लस्थंडिलेशयः ॥३॥ ग्रीष्मे तप्येत पंचाग्नीन्वर्षास्वासारषाड्जले ॥ आकंठमग्नः शिशिर एवं वृत्तस्त
पश्चरेत् ॥४॥ अग्निपक्वं समश्नीयात्कालपक्वमथापि वा ॥ उलूखलाश्मकुट्टो वा दंतोलूखल एव वा ५
स्वयं संचिनुयात्सर्वमात्मनो वृत्तिकारणं ॥ देशकालबलाभिज्ञो नाददीतान्यदाहृतं ॥६॥ वन्यैश्चरुपु
रोडाशैर्निर्वपेत्कालचोदितान् ॥ न तु श्रौतेन पशुना मां यजेत वनाश्रमी ॥७॥ अग्निहोत्रं च दर्शश्च पौ ।

शिरसि पंचमं अग्निं गृहीत्वा तत्वायोरुवरुमौदनं चतुर्षु अग्निषु मध्ये सूर्याभिमुखं एकपादेन दंडं हस्ते गृहीत्वा
तिष्ठेदित्यर्थः ॥ आसारषाट् ॥ आसारं धारासंपातं सहत इति तथा ॥ शिशिरे काले नाभिमग्नं तं चरेत् जले आकंठम
ग्नः उदकवासं तपः चरेत् ॥४॥ उलूखलेन वाश्मना वा कुट्टयति खंडयतीति वा दंता एव उलूखलं यस्य
स तथा ॥५॥ संचिनुयात् आहरेत् ॥ अन्यदा कालांतरे आहृतं कालांतरे नाददीत न अश्नीयात् अनर्घः लवेन वेन ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्य निष्कामस्य फलमाह एवमिति ॥ एभिर्निमित्तैः सिताभिः संमत्तोऽभ्यासः यावज्जीवंकृते नयस्या अप्रसंभावः अंतःकरण
शुद्धिभक्तिद्वारा वैव तत्त्वबुध्यते ॥ प्रतिबंधकवाहुल्येन नैकजन्मेनामुच्यन इति ॥१॥ सकामं निंदति ॥ यस्त्विति निःश्रे
यसंमोक्षफलं ॥ एतं यम ॥ अमलमेव ॥ अविद्याद्यमलमेतस्मै ॥१०॥ एवं यावज्जीवं वर्तमानस्य मोक्षः ॥ तत्री
यभागावस्था नैष्ठिकमदविरागापि संन्यासाधिकारः ॥ यदि तत्तो वा गोव स्वधर्माश्राकृतो भवेत् ॥ तदाभिमस्य गा विरक्तः
विरक्तो वानवाविरक्तस्य कृत्यमाह यदेति जानेविपश्यः केपादे हैयसमः ॥११॥ विरक्तं प्रमाह यदेति ॥१२॥ नत्राहाक

एवं चीर्णव्रतस्यास्य निर्ममस्य विसंततः ॥ मां तु यो स्मरमाणस्य अक्षत्रिलोकादुपैति मां ॥४॥ यस्त्वेतन्न कुरुत
श्रीलंतयो निःश्रेयसं महत् ॥ कामायास्त्रीयसे युक्त्याहालिप्सः कोपरक्ततः ॥७॥ यदासौ त्रियमेकलो
जवयाजातवेदसः ॥ आत्मन्यग्नीन्समारोप्य सद्वितांग्निसमाविशेत् ॥१०॥ यदाकर्मविपाके च लोकेषु निर
यात्मसु ॥ विरागो जायते सम्यग्ग्रस्ताग्निः प्रव्रजेत्ततः ॥११॥ इष्टायथोपदेशां मां दत्वा सर्वस्वमत्विजे
अग्नीन्स्वप्राणान्आवेशयन्निरपेक्षः परिव्रजेत् ॥१२॥ विप्रस्यैव संन्यासो नो देवां वा दिनृपिणः विप्राणं कुर्वम
ये ह्यस्मान्नाक्रम्य समियात्परं ॥१४॥ विभृयाच्चैव निर्वासः कौपीनाच्छादनपरं सकृन्नदंडपात्राभ्यामन
किंचिदनापदि ॥१५॥ दा१

क्रममाह यथोपदेशं श्रद्धापूर्वकं प्रज्ञाप्य तेष्वा स्वप्राणे आत्मनि ॥१३॥ संन्यासे विप्रा भवंतीति तान विप्राणाम् सं
न्यासे वैश्याद्यायेनास्त्वव्यसेनि केनाभिप्रायेणाकुर्वीति तामाह ॥ अयमिति परंपरं ब्रह्म ॥१४॥ एवं प्रव्रजितस्य य
मेमाह विभृयाच्चेदिति परं कौपीनाद्यन्नासो यदि धारयितुमिच्छति तर्हि कौपीनमाच्छादयेत् वा वस्त्रान्तानां वन्मा
वैधारयेदिमर्यः सक्तं प्रेषाच्चारान्सर्वमेव ॥ अन्यत् किंचिदपि न विभृयात् ॥ दंडपात्राभ्यामित्यात्र वत्पकजल
पात्रादेरुपलक्षणं ॥ ५ राम

165

मनःपूतं मनसा सम्यक् विचार्य यच्छुद्धं तदाचरेत् ||१६|| मौनं वाचो दण्डः अनीहा काम्यकर्मत्यागो देहस्य प्राणायामश्चे
तसः एते अत्र सर्वे दण्डाः यस्य न सन्ति स वेणुदण्डैर्मात्रेण यतिर्न भवति ||१७|| चतुर्ष्विति ब्राह्मणेषु वर्णेषु त्रिभेदेन चतुर्वि
धेषु पूर्वपूर्वासंभवे वा दिरादिशब्दान् निषिद्धान् त्यक्त्वा असंकल्पितान् ||१८|| अथायं तत्र ओमभिवीक्ष्यनीतिपूर्वमत्र दिष्टान् ||१९|| व
हिरग्रौ मा तत्पाविते प्रोक्षणादिभिः शोधितं विभज्य विष्णवे ब्रह्मणे सूर्याय भूतेभ्यः शेषं अशेषमपि यथा हरणं निरस्तेयाचित

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलं || सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ||१६|| मौनानीहानिला
यामा दण्डा वाग्देहचेतसां || न ह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः ||१७|| भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्व
र्जयंश्चरेत् || सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेन तावता ||१८|| बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः
विभज्य पावितं शेषं भुंजीताशेषमाहृतं ||१९|| एकश्चरेन्महीमेतां निःसंगः संयतेंद्रियः || आत्मक्रीड
आत्मरत आत्मवान्समदर्शनः ||२०|| विविक्तक्षेमशरणो मद्भावविमलाशयः || आत्मानं चिंतयेदेक
मभेदेन मया मुनिः ||२१|| अन्वीक्षेतात्मनो बंधं मोक्षं च ज्ञाननिष्ठया || बंध इंद्रियविक्षेपो मोक्ष एषां च
संयमः ||२२|| तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः || विरक्तः क्षुद्रकामेभ्यो लब्ध्वात्मनि सुखं महत् २३

मिति पाठे माधुकरेण याचितमन्नं चेत् || तर्हि विभज्य भुंजीत न नयाचितादि मैक्ष्य च तत्र इष्टयमिपि सर्थः माधुकरेत
न नैवेद्यमेदेनासे ष्यु विथ्यते ||नैवेद्दिकादि विपेदस्य चितये भौतिकं बहिर्विति स्मर्यते || यद्वा तदानीके नापि याचितं चे
त || तत्र पूर्व तस्मै किंचिद्दिभज्य दत्त्वा भुंजीतेत्यर्थः ||१९|| किंच आत्मन्येव क्रीडा कौतुकं यस्य सः आत्मन्येव रतः संतुष्टः |
आत्मवान् धीरः ||२०|| विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः || मयि भावेन विमलः आशयो यस्य सः
२१ || बंधं मोक्षं इति ताभ्यां बोधयति ||२२|| || राम ||

166

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुराणि द्वादि संतिग्रामा सप्त द्वहिताः ब्रह्माः योहानिताम ना सार्ध्यायाविकजने सम्पूहान ॥ २४ ॥ ततः शिलावृक्षा
सेन उद्दीये नाथसाजेन पुष्ट मनः ॥ सन्निकृत मोह संनिम्नतिमुच्येत ॥ २५ ॥ नवुमिष्टं ब्रवहायकाय शिलाचैनपवृ
त्तिः स्यादत आह ॥ पतद्दपमानं मिह्राशदिव स्तनयानपयपेत ॥ यतोविन पपति अतद्द्दामन्त्र चलोके असमक्त
वितः सनविक्रीषितादर्शकस्मादि रमेत ॥ २६ ॥ मनवनथापियावद्विनाशम्बत्वेद्दवनाश्चिताः वतः कृतोविद्याग
स्यानवाह ॥ पदेतदिति पतजयानमता स्पदमनोवाक्याणि ॥ महतेमहिनग्रहकायस्पदशायीयसवैतने मे
पुरग्रामसद्दवेच ॥ घातमनिमायामात्रमिति नर्कणासमादिहृष्टातेन सक्तासच्य ॥ आत्मनिष्ठः सनपुनस्तन

पुरग्राममवजानन्सा र्थ्याद्विताये प्रविशेत्स्वयेत ॥ पुण्यदेशमविक्षोलवनाश्रमवतीमही ॥ २७ ॥ वानप्र
स्थाश्रमपदेष्वभीक्ष्णमैक्ष्यमाचरेत ॥ संसिद्धस्या सवस्मोहः प्रपुष्टमनः शिलायत ॥ २४ ॥ ने तद्दस्त
नयाप्रपेपद्द द्दपमानविनपपति ॥ असक्तो वितोविदमेदिहामत्रचिकीर्षिता ॥ २८ ॥ यदेतदात्मनिजग
न्मनोवाक्प्राणसंहतं सर्वमायेनकेणास्वस्यस्यात्कानत्मरेत ॥ २९ ॥ ज्ञाननिष्ठोविरक्तोवा
मद्भक्तोवानपेक्षकः ॥ सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ॥ ३० ॥
तिः

स्मरेत ॥ नचिंतयेत ॥ २४ ॥ पवंवहदकादिधर्मानुक्त्वा परमहंसधर्मानाह ज्ञाननिष्ठ इति वहिर्विरक्तो मुमुक्षुः
सनयोज्ञाननिष्ठोवा मोक्षेप्यनपेक्षो मद्भक्तोवासलिंगानव चिह्नसहितानाश्रमांस्त्यक्त्वा ज्ञातदाश
मन्त्रं सक्तायणोवितंथर्मचरेदित्यर्थः ॥ पुनरर्भतमार्गपवविवक्तः पुनर्धर्मविधानात ॥ अक्रिन स्यात
याप्यायेवत्समाना ताच्च ॥ तर्हि पूर्वस्मा केवलम्ब्रीवत्समाह ॥ अविधिगोचरः विधिगोचरः विधिकिंकरो
नस्यादिपतदेवप्रकटयति ॥ "चमावमनेस्लानेव तशोयनयाचरेदित्यास ॥ ३० ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग
स्कं
७२

नहिं कथं चरेत इत्याह वृथोति वृथैव कृपानपि बालकवत् तेमानावमानविवेकस्य यः कुशलोपि उपायोपि जउवस्य
तानुसंधानाभावेन विद्वानपंडितोपि जनन लोके जनाभावेन गमः वेषर्थैनिह्यापि गोचर्यामनियताचा
रमेव चरेत ॥ १४ ॥ वेदवादरतः कर्मकांडव्याख्याननिष्ठः हेतुकः केवलतर्कनिष्ठः पाषंडवादीति प्रोषाज्जने
गोष्ठांयोविवादस्तस्मिन ॥ १५ ॥ प्रतिवादान्समत्कानि ॥ १६ ॥ आत्महष्यानावहेकारणनालीमात्मकं पवेति देह

वृथोवालकवत्क्रीडेत्कुशालोजडवच्चरेत ॥ विदद्वुन्मत्तवद्विद्वान्गोचर्यांनैगमश्चरेत ॥ १४ ॥ वेदवाद
रतो न स्यान्न पाषंडी न हैतुकः ॥ शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत ॥ १५ ॥ नोद्विजेत जनाद्धी
रो जनं चोद्वेजयेन्न तु ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ १६ ॥ देहमुद्दिश्य पशुवद्वैरं कुर्यान्न
केनचित ॥ एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ॥ १७ ॥ यथेंदुरुदपात्रेषु भूतान्येकात्मकानि च
१८ ॥ मूलभ्वानविषीदेत काले काले शुनं कुचित ॥ लब्ध्वा न हृष्येद्धृतिमानुभयं दैवतंत्रितं ॥ १९ ॥ आहारा
र्थं समीहेत युक्तं तत्प्राणधारणं ॥ तत्त्वं विमृश्यते येन तद्विज्ञाय विमुच्यते ॥ २० ॥ यदृच्छयोपपन्नान्नम
याच्छेद्यमुतापरं ॥ तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः ॥ २१ ॥ दैवतंत्रे

महानरे

दृष्ट्वापि नास्तीत्याह भूतानि च देहाश्च विकारणात्मा पेताकालकालिका ॥ १८ ॥ दैवतंत्रितं दैवाधीनं यतः यः अलं
तदपि भित्वा प्रपतेनापि तत्राह ॥ आहारमात्रार्थमेव समीहेत ॥ यतस्तस्य प्राणधारणं युक्तं कस्मात्तेन प्राणधार
णेन तत्त्वं विचार्यते किं तेनापि तत्राह तद्धि ज्ञायते ॥ २० ॥ नहि किमस्य ग्राह्यादिकमग्राह्यमेव केवलमुक्तमित्याह
यदृच्छयेति ॥ २१ ॥

८२

यथाहं ईश्वरलीलया चरामि तथा ज्ञानी ज्ञाननिष्ठः अन्याश्च नियमान् कुर्यात् न तु विधिकिंकरत्वेनेत्यनि
ष्ठा वियेथादित्यर्थः ||३६|| ज्ञातो विधिकिंकरत्वाभावे न ||न स्पत्राह नहीति तस्य विकल्पाख्या भेदप्रतीतिः ननु तर्हि
मत्तं यच्चासौ तथापि मद्वीक्षया ज्ञानेन हता न तु नहता पुनर्ह यथा म नवाततत्राह|| आदेहान्तात् क्वचित् कदाचिद्बाधि
तेव ख्यातिर्भवति ||३७|| ननु देवं विरक्तस्य परोक्षज्ञानवतः संन्यासे तद्धर्मांश्चोक्ताः केवलवैराग्यवतो विविदिषु संन्यासमाह
दुःखोदर्केष्विति अजिज्ञासितमद्धर्मो जिज्ञास्यादिसाधनं येन स ||३८|| मामेव मद्भावेनातः गुरुं परिचरेत ||ततः संकल्प

शौचमाचमनं स्नानं न तु चोदनया चरेत ||अन्यांश्च नियमाञ्ज्ञानी यथाहं लीलयेश्वरः||३६|| न हि तस्य विकल्पा
ख्या या च मद्वीक्षया हता ||आदेहान्तात् क्वचित् ख्यातिस्ततः संपद्यते मया||३७|| दुःखोदर्केषु कामेषु जात
निर्वेद आत्मवान ||अजिज्ञासितमद्धर्मो मुनिं गुरुमुपव्रजेत ||३८||तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः
यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः||३९|| यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः ज्ञानवैराग्यर
हितः त्रिदंडमुपजीवति||४०||सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा ||अविपक्वकषायोस्माद
मुष्माच्च विहीयते ||४१||भिक्षोर्धर्मः शमोहिंसा तप ईक्षा वनौकसः ||गृहिणो भूतरक्षेज्या द्विजस्याचार्यसे
वनं||४२||ब्रह्मचर्यं तपः शौचं संतोषो भूतसौहृदं ||गृहस्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनं ||इति मां यः
स्वधर्मेण भजन्नित्यमनन्यभाक || सर्वभूतेषु मद्भावो मद्भक्तिं विंदतेचिरात || ४४||

देहिनां धर्मो वर्तत इति भावः अनधिकारिणः संन्यासमेतिदतिप्रचंडः अत्याममहः इंद्रियसारथिर्बुद्धिर्यस्य सः||४०||अ
वा मनुष्यान् देवान् आत्मानं चात्मस्थं मां च निह्नुते प्रच्यावयति||निह्नवफलमाह||अस्मादिति||४१|| वर्णाश्रमा
न धर्मानाह||४२||अस्य धर्माः कोपि तत्त्व गृहस्थेपि तितिक्षिति ब्रह्मचर्यमिति शौचं योगादिवा हिंसा ब्रह्मचर्यप्रकार
माह ऋतौ गंतुरिति||४३||एवंभूतवर्णाश्रमधर्मफलमाह||इति मामिति दृढां मद्भक्तिं विंदति ||४४||

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ततः किमत आह ॥ भक्त्येति महत्त्वरतदेहेनतः सर्वात्मत्वप्य सर्वस्योत्पत्त्यप्ययौ यस्मात्तमत एव तत्कारणं मामं
ब्रह्मरूपं वै अपि निर्वासितं ब्रह्मणो वेदस्य कारणमुपयाति साम्यं न प्राप्नोति ॥ ॥ सर्वेषां चासौ मुक्तस्य एवेत्याह
इति एवंभूतेन स्वधर्मेण निर्णिक्तं शुद्धं सत्त्वं यस्य सः ॥ अन्तकाले मम गतिं वै सर्वयेन ॥ ४४ ॥ उक्तमर्थं सफलमाह एवमेव
आचारलक्षणः पितृलोकप्राप्तिफलः मद्भक्तियुतः मदर्पणेन कृतः यत्र कापि श्रीकृष्णार्पणेन कृष्णान्तं ॥ ४ ॥ प्रका
रणार्थमुपसंहरति एतत्त इति त्वयाभक्तो भूत्वा मां परं संप्राप्स्यसि इति ॥ ४ ॥ इति श्रीभावार्थदीपिकायामेका
दशे अष्टादशः ॥ ॥ ज्ञानादि निर्णयः सर्वं कृतो यस्माद्धर्मतः ॥ एकोनविंशतितमे स्मिन्नादशपात्रउच्यते ॥ ॥ तदेवं त

भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरं ॥ सर्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः ॥ ४५ ॥ इति स्वध
र्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः ॥ ज्ञानविज्ञानसंपन्नो नचिरात्समुपैति मां ॥ ४६ ॥ वर्णाश्रमवतां धर्म
एष आचारलक्षणः ॥ स एव मद्भक्तियुतो निःश्रेयसकरः परः ॥ ४७ ॥ एतत्तेभिहितं साधो भवान्पृच्छति य
च्च मां ॥ यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परं ॥ ४८ ॥ ४८ इति श्रीभागवते महापुराणे एकादशस्कं
धे अष्टादशोध्यायः ॥ १८ ॥ श्रीभगवानुवाच ॥ यो विद्याश्रुतसंपन्न आत्मवान्नानुमानिकः ॥ मायामात्रमि
दं ज्ञात्वा ज्ञानं च मयि संन्यसेत् ॥ १ ॥

किं तोपि बोधितोपि देहादिप्रपंचो यावदपरोक्षानुभवेन हि देहादिर्न विलीयते तावज्ज्ञानाभ्यासः ततो मुक्ति
रिति मुक्तेर्याविदेहान्तावदानुवर्तितव्यातिस्ततः संपद्यते सुयेसां हि नाय स्यानपरोक्षानुभवेन प्रपंचो विलीन प्रायः ॥ तस्य
न किंचित्कृत्यमस्तीत्याह य इति विद्याश्रुतं अनुभवः तत्संबंधेन श्रुतेन संपन्नः अत एवात्मवान् प्राप्तात्मतत्त्वः ॥ नानुमा
निकः केवलपरोक्षतत्त्वानुभववर्तिः अनुकारस्पाठे प्राकृतसमनुकूलतर्केतानिर्णीतस्वार्थः ॥ स एवंदेहे नतत्रिवृति
साधनं च मयि मायामात्रमपि ज्ञात्वा ज्ञानं च तत्साधनं संन्यसेत् अथ मेयविदं तं स्यात्सोनाम प्रपञ्चहेतमाहज्ञानि ॥

170

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यस्मादहमेव तत्त्वतः [illegible] अपेक्षितं ॥ स्वार्थः [illegible] काले देहः [illegible] सम्यक् ॥ [illegible] अभ्युदयस्य अपवर्गः संसारनि
वृत्तिः [illegible] तस्य [illegible] कृतं वा किंचिदस्तीत्यर्थः ॥ अत्र विद्वदनुभवं प्रमाणयति ॥ ज्ञानेति ॥ २ ॥ यथोक्तं ज्ञानिन
मभिप्रेतं दक्षो [illegible] जानीति ॥ यतो [illegible] ज्ञानेन [illegible] साधयति ॥ ३ ॥ [illegible] ज्ञानं [illegible] तितपइति अल्प [illegible] ज्ञानस्य कल
यालेशेन ॥ ४ ॥ [illegible] हरति ज्ञानेन [illegible] भवति [illegible] ज्ञानात् [illegible] सन्नुक्ता [illegible] अन्य [illegible]
नेत्यर्थः ॥ ५ ॥ तस्य [illegible] पूर्वं [illegible] माह ज्ञानेति मामेव [illegible] सिद्धिं प्रापुः ॥ ६ ॥ तदेव ज्ञानं [illegible] शति नयी

ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च सम्मतः ॥ स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः ॥ ज्ञानविज्ञानसं
सिद्धाः पदं श्रेष्ठं विदुर्मम ॥ ज्ञानी प्रियतमोतो मे ज्ञानेनासौ बिभर्ति मां ॥ ३ ॥ तपस्तीर्थं जपो दानं पवित्राणीत
राणि च ॥ नालं कुर्वन्ति तां सिद्धिं या ज्ञानकलया कृता ॥ ४ ॥ तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ॥ ज्ञान
विज्ञानसंपन्नो भज मां भक्तिभावितः ॥ ५ ॥ ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि ॥ सर्वयज्ञपतिं मां वै सं
सिद्धिं मुनयोगमन् ॥ ६ ॥ त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायान्तरापतति नाद्यपवर्गयोर्यत् ॥
जन्मादयोस्य यदमी तव तस्य किं स्युराद्यन्तयोर्यदसतोस्ति तदेव मध्ये ॥ ७ ॥

ति त्रिविधा आध्यात्मिकादिः समायान्तरापतति ॥ यद्यस्मात् ॥ अन्तरा मध्य एवापतति रज्जौ सर्पादिमाला
न्ताद्यपवर्गयोः ॥ न तावदेवं ते चास्ति अतः यद्यदा [illegible] विकारस्यामी जन्मादयः ॥ तदा तस्य तवाधिष्ठानभूतस्य किं
न किंचिदित्यर्थः ॥ तस्यापि वस्तुतो नास्तित्वं [illegible] आद्यन्तयोरिति ॥ आद्यन्तयोः [illegible] सर्पादेः आद्यन्तयोपस्ति व
[illegible] तदेव मध्येन तु सर्पादि [illegible] विकारो [illegible] ॥ यद्वा आद्यन्तयोर्यदस्ति तन्मध्ये [illegible] तस्य [illegible]
यः [illegible] विकार [illegible] ॥ ज्ञानादिविशेषजिज्ञासुः पृच्छति ज्ञानमिति ॥ ७ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग
टी
८५

विष्णुक्रमेन त्वां तं विपुलविस्मितं यथा भवति तथा कथयति महद्भिः ब्रह्मादिभिरपि विमृग्यमाणं ॥ ४ ॥ महद्भिः
ग्यन मम भिन्नयेनाहृतापत्रयेनाभिहृतो हृतस्य ग्रतः सततप्यमानस्य कस्यचित नर्दोष्यि हेह मेवा तपत्रे ग्रातपात्से
तानन्यायतीति तस्मात न केवलमातपत्रातो किं च प्रसूतमप्यभिहितो वर्षति पलत्तस्मात ॥ ५ ॥ प्रतिकूपाम
सादयन्नाहृदष्टमिति अस्मा बिले संसारकूपे पतितं ॥ तत्र च कामहितादष्ट ॥ एवमपि त्वदृष्टा विषे वकुकन्त
षंत्वत्स्मापि पापस्य पुत्रं तं दहति मानः कंपकस्तदूरणी यहति वेत्ता चाह ॥ आपवर्गी रपवर्गबोधकैः वाणभ
तेरासिं चेति ८ नाहं पात्रात्यं विरुत्स्मा भा या विलीतमहेव त्वामि राम्राह ॥ ६ ॥ ज्ञानादिभिरूपबृंहितान्नम

अवधः ॥ त्वां विष्णुं विपुलं यथैव तद्वैयस्य वितानं पुत्रं पुराणं ॥ आत्मा त्वं हि विश्वेश्वर विश्वमूर्ते त्वं इन्द्र।
त्रियोगं महद्भिर्मृग्यं ॥ ७ ॥ आपत्रयेणाभिहृतस्य घोरे संतप्यमानस्य भवाध्वनीश ॥ पश्यामि नान्यच्छर
णं तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात ॥ ८ ॥ दष्टं जनं संपतितं बिलेस्मिन् कालाहिना क्षुद्रसुखोरुतर्
षम् समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिंच महानुभाव ॥ ९ ॥ श्रीभगवानुवाच ॥ इत्थमेतत्पुरा रा
जा भीष्मं धर्मभृतां वरं ॥ अजातशत्रुः पप्रच्छ सर्वेषां नोनुशृण्वतां ॥ १० ॥ निवृत्ते भारते युद्धे सुहृन्निध
नविह्वलः ॥ श्रुत्वा धर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत ॥ ११ ॥ तानहं तेभिधास्यामि देवव्रतमुखाच्छ्रु
तं ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युपबृंहितान् ॥ १२ ॥ नवैकादश पंच त्रीन्भावान्भूतेषु येन वै ॥ ईक्षे
नाथैकमपि तेषु तज्ज्ञानं मम निश्चितं ॥ १३ ॥

हितान निसर्ग ॥ ५ ॥ तत्र ज्ञानं कथयति नवेति प्रकृतिमहदहंकारपंचतन्मात्राणि एकादशेन्द्रियाणि
पंचमहाभूतानि त्रयो गुणाः एतान्भावान्भूतादि यानि तत्त्वानि भूतेषु ब्रह्मादिस्थावरांतेषु कार्येषु अनुग
तानि येन ज्ञानेन ईक्षेत अपि च एतेषु अपि भावेषु एकं परमात्मानं नं तत्त्वं येन ईक्षेत कार्यकारणात्मकं जगत् प्रप
त्॥ परमकारणात्मकं पश्येत तत् ज्ञानं ॥ सम्यग् ज्ञानं मम निश्चितं तदेव ज्ञानमिति निसर्गः ॥ ५ ॥ ॥

८५

172

173

विज्ञानुमाह॥ एतदेवेति॥ श्लोकार्द्धेन यद्यदा येनैकेनानुगतानानेकानामकारणभावानामर्द्धमितत्तत्तथा पूर्ववत् नेदे त
किंतु तदेकं परमाकारणांतःस्वयं तदा एतदेव विज्ञानमुच्यते एतदुक्तं भवति॥ यदीतज्ज्ञानेनापरोतत्प्रसमस्तदिक्रोहा॥
दिष्टिव निष्टस्वाभाववत्॥ तदात्मकं जगदयमपृथङ्ख्यात्मनः पृथक्तादिति नमयाते अपरोतज्ज्ञानेन बाधितमेव जीव
स्तुकः संसारशेषं पश्यति ततः परं पश्यति न अतः परोतात्ज्ञाने ज्ञानं विज्ञानशब्दाभ्यामुच्यते इति॥ १५॥ एकेसमर्थ
कार्याणामनुगतिकार्याणां कारणात्पृथग्रासत्तोपपादयति मार्द्धेन तच यादेन कदाचिदनोदृष्टो जगदिन्या

एतदेव हि विज्ञानं न तथैकेन येन यत्॥ स्थित्यनुसमरूपयामस्योपद्रावाणां विशु
णात्मनां॥ १५॥ आदावंते च मध्ये च सर्वज्ञानान्तर्ज्ञेयदन्वियात्॥ पुनरस्तमेति
संक्रामे यत्स्थितं तदेव सत्॥ १६॥ रामायनमः॥॥

दिमते नैतेषां भावानामस्मादयोनस्तुः नहि कारणासैकस्याभावादेकात्मनामिथ्यात्वं चतस्मात्॥ अतस्तेषामु
त्पन्नादीन्साधयति॥ स्थितीति त्रिगुणात्मनां भावयवानामित्यर्थः॥ विमतानाभावाउमस्मादिमंतः भावयवत्वात्
घटादिवदिति पृथक्पे तु अत आदौ उत्पन्नो अंते परिणामेन नाशपन्नो च कारणत्वेन मध्ये व्याप्यत्वेन सर्वज्ञात्सर्वज्ञ
कार्यतिरकार्यातं प्रतिपदत्वियातं अनुगच्छेत्॥ तत्स्थितिसंक्रामे तेषां प्रलये च यदवशिष्येत तदेव सदिति
पञ्चपदिस्वर्गः १६ राम॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैराग्यमाह ॥ श्रुतिर्नेहनानास्ति किंचनेत्यादि प्रत्यक्षं घटादिकार्यं तेनत्वादिष्टतिरेकेणान दृश्यते चैतस्य व्यतिरेकेणाचन
किंचिद्दृश्यते इति ॥ ऐतिह्यं महाजनप्रसिद्धिः अनुमानं मिथ्यात्वं दृश्यत्वात् ॥ शुक्तिरजतवदित्यादि । एवं प्रमाणचतुष्ट
येनैतेष्वनवस्थानात् ॥ एतेनैवोथितत्वानुसृ एवं सर्वानुगतस्य मम आत्मनत्वे पृथग्विकल्पस्य मिथ्यात्वात्ततो विरज्यते वि
रक्तो भवतीत्यर्थः ॥ १७ ॥ न चैवैदो कस्य गोपादिः सुखलाभान्न विरज्यते माह ॥ कर्मणामिति ॥ आविरिंचात् ब्रह्मलोकपर्यन्तम
दृष्टमपि सुखं अमंगलं दुःखदं एवं नश्वरं च पश्येत् ॥ १८ ॥ भक्तियोगं सकारणमाह ॥ भक्तियोगः पूर्वमुक्त एव ॥ तथापि

श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयं ॥ प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते ॥ १७ ॥ कर्मणां परिणामित्वादा
विरिंचादमंगलं ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥ १८ ॥ भक्तियोगः पुरैवोक्तः प्रीयमाणाय
तेऽनघ ॥ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं ॥ १९ ॥ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनं ॥ परिनि
ष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥ २० ॥ आदरः परिचर्यायां सर्वांगैरभिवंदनं ॥ मद्भक्तपूजाभ्यधिका
सर्वभूतेषु मन्मतिः ॥ २१ ॥ मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं ॥ मय्यर्पणं च मनसः सर्वकामविवर्जनं
॥ २२ ॥ मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ॥ इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः ॥ २३ ॥ ॥ रामायनमः

तस्मिन् प्रीतिं प्राप्तवते तुभ्यं पुनश्च कथयिष्यामि ॥ १९ ॥ श्रद्धा श्रवणादरः शश्वदिति सर्वत्रानुषज्यते मदनुकीर्त
नं श्रवणानंतरं मत्कथाव्याख्यानमित्यर्थः ॥ २० ॥ अंगचेष्टा लौकिकक्रिया वचसा लौकिकेनापि मद्गुणानामी
रणं कथनं ॥ २१ ॥ मदर्थे मद्भजनार्थं तद्विरोधिनोऽर्थस्य परित्यागः भोगस्य तन्मात्रसाधनस्य चंदनादेः सुखस्य ।
पुत्रोपलालनादेः इष्टादिवैदिकं यत्कर्म तदपि मदर्थं कृतं भक्तेः कारणमित्यर्थः ॥ २२ ॥ ॥ ॥ राम ॥
ॐ रामायरामभद्रायनमः ॥ ॥ ॥ रामजयी ॥ ॥

174

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भक्तिः प्रेमलक्षणा संजायते अस्य भक्तस्यान्यः कोऽर्थः ॥ साधनरूपः साध्यरूपो वावशिष्यते ॥ सर्वोपि स्वतए
व भवतीत्यर्थः ॥ २४ ॥ तदेवाह यदेति किंच कृतार्थं चित्तमेवात्मनि वर्द्धितं नित्यमर्थं तर्थ्ययोः कारणमित्याह यदात्म
नीतिद्वाभ्यां यदात्मनि मयर्पितं सत्त्वैर्विवर्द्धितं तदा पुमान् ॥ धर्मादीन्प्राप्नोत्येव ॥ २५ ॥ एतदेव व्यतिरेकेणा
ह यदीति ॥ यद्यदा चित्तं कल्पे देहगृहादावर्पितं सत् परिधावति तदा विकं रजस्वलमसन्निष्ठं च भवति

एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनं ॥ मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते ॥ २४ ॥ यदा
त्मन्यर्पितं चित्तं शान्तं सत्त्वोपबृंहितं ॥ धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते ॥ २५ ॥ यदर्पितं तद्विकल्पे
इन्द्रियैः परिधावति ॥ रजस्वलं चासन्निष्ठं चित्तं विद्धि विपर्ययं ॥ २६ ॥ धर्मो मद्भक्तिकृत्प्रोक्तो ज्ञानं चैका
त्म्यदर्शनं ॥ गुणेष्वसंगो वैराग्यमैश्वर्यं चाणिमादयः ॥ २७ ॥ उद्धव उवाच ॥ यमः कतिविधः प्रोक्तो
नियमो वारिकर्षण ॥ कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो ॥ २८ ॥ किं दानं किं तपः शौ
र्यं किं सत्यमृतमुच्यते ॥ कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा ॥ २९ ॥ पुंसः किंस्विद्बलं
श्रीमन्भगो लाभश्च केशव ॥ का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव च ॥ ३० ॥ कः पण्डितः क
श्च मूर्खः कः पन्था उत्पथश्च कः ॥ कः स्वर्गो नरकः कः स्वित्को बन्धुरुत किं गृहं ॥ ३१ ॥

ततश्च विपर्ययमधर्मादिकं विद्धि ॥ २६ ॥ प्राप्ततान्धर्मादीन्याचेष्टे धर्मो मद्भक्तिकृत् यतः स एव प्रोक्तः प्रकृ
ष्ट उक्तः ॥ साम्येषु ॥ २७ ॥ धर्मादीनां महाजनप्रसिद्धानाम् अन्यथाख्यानं तत्र यमादिषु विशेषाख्यानतः स्वरूपतो वा
किंचिद्विलक्षणं स्यादिति संभावनया तद्विशेषजिज्ञासुः ॥ पृच्छति यम इति पंचभिः ॥ २८ ॥ इष्टमभ्यर्हितं य
ने च किं ॥ २९ ॥ परेति विद्यादीनां विशेषणं ॥ ३० ॥ ३१ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग
टी
८७

प्रश्नानुक्त्वानर्थान्विपरीतान्प्रश्नादीन् ॥ २२ ॥ यमनियमानाह । अहिंसेति त्रिभिः । असङ्गः ममतापरित्या
ग्रहणं आस्तिक्यं धर्मे विश्वासः ॥ ३३ ॥ शौचं बाह्यमाभ्यन्तरं चेति द्वयं तत्राद्यान्यमाः नियमाः ॥ अन्यानि यमाः ॥ ३४ ॥ उ
भयोः श्लोकयोः ये स्मृताः ये यमा नियमाश्च पञ्चाशद्यो प्रवृत्तिनिवृत्तये मुमुक्षोर्यमा मुमुक्षोः सकामस्य नि
यमास्तुष्ट्यः स्मृताः सर्वथा ॥ प्रश्नद्वेतमाह द्वियम्मात ॥ उपासिताः सेविताः स्वतः पुंसां निवृत्तानां प्रवृत्तानां
च यथाकामं कामानुसारेण मोक्षमभ्युदयं च दुहन्तीति ॥ ३५ ॥ मुमुक्षोरुपायदेशान्न शमादीन्नाह द्वाभ्यां बुद्धेरा
दीन महाजनप्रसिद्धार्थाविलक्षणाना हृतलक्षणानां शमादीनामर्थोपाव्यत्साभि ॥ एतेनैव तद्विपरीता अश

को भाग्यः कोदरिद्रो वा कृपणः कः क ईश्वर ॥ एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते ॥ ३२ ॥ श्री
भगवानुवाच ॥ अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसञ्चयः ॥ आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभय
शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं ॥ तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं ॥ ३४ ॥ एते यमाः
सनियमा उभयोर्द्वादश स्मृताः ॥ पुंसामुपासितास्तात यथाकामं दुहंति हि ॥ ३५ ॥ शमो मन्निष्ठता
बुद्धेर्दम इंद्रियसंयमः ॥ तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ॥ ३६ ॥ दंडन्यासः परं दानं काम
त्यागस्तपः स्मृतं ॥ स्वभावविजयः शौर्यं सत्यं च समदर्शनं ॥ ३७ ॥

मादयोपयुक्तेयाः शमो मन्निष्ठता बुद्धेः ॥ न तु शांतिमात्रं दम इंद्रियसंयमः ॥ न चौर्यादिदमनेतितितिक्षावि
हितं दुःखसंमर्षः सहनेन भाराद्देः तितिक्षोपस्थजयो वा धारणा धृतिः ॥ न तु देहं गमात्रे ॥ ३६ ॥ दंडो भू
तद्रोहः तस्य न्यासो दानं ॥ न तु नार्थ्यणां ॥ कामत्यागः भोगेष्वेच्छात्यागः ॥ न तु कृच्छ्रादि स्वभावो वासनास्तस्य ज
यः ॥ प्रतिबंधः शौर्यं न विक्रांति ॥ समं ब्रह्म तस्य दर्शनं आलोचनं सत्यं न तु यथार्थभाषणमात्रं ॥ ३७ ॥

176

८२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथ सत्यं ऋतं सूनृतं समत्वाप्रियाच्चवाक् ॥ एवं सत्यसमत्वयोः स्फुट एव विवेकः अन्यथा अग्रं मायां व्याख्यातमादौ ॥ ततो भेदे
न शौचमाचष्टे ॥ तस्यापि मलत्यागरूपत्वेन मायाभेदप्रतीतेः कर्मस्वसङ्गमः अनासक्तिः शौचं मायास्तु सत्याम
इति तयोर्भेद इत्यर्थः ॥ ३८ ॥ नृणामिष्टं धनं धर्मः न पश्वादि मायाचरणः भगवत्तमः परमेश्वरो हमेव यज्ञः मनुष्याय
ज्ञः मनुष्याय स्तोत्रुहेयः न क्रियाब्रह्मोमत्यर्थः ॥ यज्ञार्थं दानेन दक्षिणा सा च ज्ञानोपदेशः न हिरण्यादिदानं तेन हि य

ऋतं च सूनृता वाणी कविभिः परिकीर्तिता ॥ कर्मस्वसंगमः शौचं त्या
गः संन्यास उच्यते ॥ ३८ ॥ धर्म इष्टं धनं नृणां यज्ञोहं भगवत्तमः
दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलं ॥ ३९ ॥ भगो मे ऐ
श्वरो भावो लाभो मद्भक्तिरुत्तमा ॥ विद्यात्मनि भि
दाबाधो जुगुप्सा ह्रीरकर्मसु ॥ ४० ॥

ज्ञरूपो विप्राप्यते ॥ उदमितं बलत्वमनोदमनहेतुत्वात् प्राणायामः इति ॥ ३९ ॥ दया लोकप्रसिद्धैवाभिमता ॥ अयु
नालाभं व्याचिख्यासुः ॥ प्रथमं भगं ततो भेदेन व्याचष्टे ॥ लोके तयोरभेदप्रसिद्धिः ॥ भगो भाग्यं ॥ तच्च मे ऐश्वरो
भावो मदीयमैश्वर्यं दिव्यात्रैगुण्यमित्यर्थः ॥ उत्तमो लाभस्तु मद्भक्तिः न पुत्रादिः विद्या चात्मनि प्रतीतस्य भेदस्य
बाधः न ज्ञानमात्रं ॥ अकर्मसु जुगुप्सा ह्रीः न तु दर्शनं ह्रीः न लज्जामात्रं ॥ ४० ॥ ॥ ॥ राम ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गुणा एव श्रीर्न मंडलं वा किरीटादिः दुःखसुखयोरत्ययः अतिक्रमः अनतु असंख्यानं सुखं न भोगाः विषयभोगापेक्षैव दुः-
खं न त्वग्निदाहादि बंधमोक्षौ वेत्ति स पंडितः न विद्वन्मात्रः ॥४१॥ अहं बुद्धिरित्युपलक्षणार्थं देहगेहादिष्वहं
ममेत्यभिमानवान्मूर्खः इत्यर्थः ॥ मन्निगमः मां नितरां गमयति प्रापयतीति यो निवृत्तिमार्गः स तु पंथाः सन्मार्गः न कंट-
कादिशून्यः चित्तविक्षेपः प्रवृत्तिमार्गः स उत्पथः कुमार्गः न तु चौराद्याकुलः सत्वगुणस्योदयः उद्रेकः स्वर्गः नेंद्रा-
दिलोकः ॥४२॥ तमस उन्नाहः उद्रेकः नरकः न तामिस्रादिः गुरुरेव बंधुः न भ्रात्रादिः स चाहमेव यथाहं जगद्गुरुः

श्रीर्गुणा नैरपेक्ष्याद्याः सुखं दुःखसुखात्ययः ॥ दुःखं कामसुखापेक्षा पंडितो बंधमोक्षवित् ॥४१॥ मूर्खो
देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः ॥ उत्पथश्चित्तविक्षेपः स्वर्गः सत्वगुणोदयः ॥४२॥ नरकस्तमउ-
न्नाहो बंधुर्गुरुरहं सखे ॥ गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ॥४३॥ दरिद्रो यस्त्वसंतुष्टः कृप-
णो योऽजितेंद्रियः ॥ गुणेष्वसक्तधीरीशो गुणसंगो विपर्ययः ॥ ४४

एक एव परो बंधुर्विषमे समुपस्थिते ॥ गुरुः सकलधर्मान्नाय यच्चाकिंचन गोहरिः ॥ इति समाधनभोगायतनं।
गृहं न तु मानुष्यं मानुष्यरूपं शरीरमेव ॥ न हर्म्यादि गुणैः संपन्नः आढ्य उच्यते न धनी ॥४३॥ असंतुष्टो यः सद-
रिद्रः योऽजितेंद्रियः स कृपणः शोच्यः न दीनः विषयेष्वनासक्तधीयः विषयेष्वनासक्तदीयः स ईशः स्वतंत्रः नरा-
जादिः गुणसंगः गुणेषु संगो यस्य सः विपर्ययः अनीशः एतच्च शमादिविपर्ययोपलक्षणार्थम् ॥४४॥ ॥ ८८

178

179

उपसंहरति एता इति मोक्षोपयोगितया एतावत्सर्वं गुणदोषयोर्विवेकायोद्धवेनापृष्टमिति तयोः संक्षेपतो लक्षणमाह किं वहुना वर्णितेन गुणदोषयोर्लक्षणमेतावदेव तत्राह गुणदोषयोर्दृशिर्दर्शनं दोषः गुणस्तु तद्दर्शनवर्जितः स्वभावस्थितिः ॥४५॥ इति श्रीभावार्थदीपिकायामेकादशे एकोनविंशः ॥ ॥ विश्वयोगत्रयं प्रोक्तं भक्तिज्ञानक्रियात्मकं ॥ गुणदोषव्यवस्थार्थमधिकारविभागतः ॥ गुणदोषदृशिर्दोषो गुणस्तूभयवर्जित इत्युक्तं तदाक्षिपति विधिश्चेति पंचभिः विधिश्च प्रतिषेधश्चेति स्वरूपतः वेदनिगमश्रुता त्वद्रूपो वेदः स च विधेयानां

एता उद्धव ते प्रश्नाः सर्वे साधु निरूपिताः ॥ किं वर्णितेन बहुना लक्षणं गुणदोषयोः
गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ॥४५॥ इति श्रीभागवते महापुराणे एकाद
शस्कंधे एकोनविंशोऽध्यायः ॥१९॥ उद्धव उवाच ॥ विधिश्च प्रतिषेधश्च निगमो ह्यीश्व
रस्य ते ॥ अवेक्षतेऽरविंदाक्ष गुणं दोषं च कर्मणां ॥१॥ वर्णाश्रमविकल्पं च प्रतिलो
मानुलोमजं ॥ द्रव्यदेशवयःकालान्स्वर्गं नरकमेव च ॥२॥ गोविंदाय नमः ।

प्रतिषेधानां च कर्मणां दोषं च पुण्यपापरूपमवेक्षते ॥१॥ उत्तमाधमभावेन तदधिकारिणां वर्णानामाश्रमाणां विकल्पं भेदं च गुणदोषरूपमवविवक्षते प्रतिलोमानुलोमजं गुणं दोषं पुण्यपापरूपमवेक्षते प्रतिलोमजाः उत्तमवर्णास्त्रीष्ववर्णेभ्यः पुरुषेभ्यो जाताः सूतवैदेहकादयः ॥ अनुलोमजा उत्तमवर्णेभ्यः ॥ पुरुषेभ्यो हीनवर्णास्त्रीषु जाताः मूर्धावसिक्ताम्बष्ठादयः ॥ प्रसिद्धतत्त्वविज्ञेयाः प्रतिलोमानुलोमजा इति ॥ गुणदोषौ द्रव्यादीनां कर्मार्हत्वानर्हत्वाभ्यां स्वर्गनरके च तत्फलतया गुणदोषरूपमेवावेक्षते एतच्चोत्तराध्याये प्रपंचयि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तथापि प्रस्तुते किम् आयातं अत आह गुणदोषेति गुणदोषदृशिर्दोष इति निराकृतत्वात् ॥ गुणदोषभिदादृ-
ष्टिम् अन्तरेण तावद् विना निषेधविधिलक्षणं कर्मकाण्डं तव वचः कथं तच्च वचो नृणां निःश्रेयसकरं स्या-
त् न चापि श्रोतव्यं स्यात् क्लिष्टार्थविधिप्रत्ययैः नानुष्ठानाय बहुन शक्नुवानो वा विप्रलापनं हि तदित्यादि इति विषयस्यावश्य-
कत्वात् हि इति भावः यद्वा गुणदोषभिदादृष्टिमन्तरेण निषेधविधिलक्षणं तव वचो विनेति समानाधिकार्ये
वास्ति यद्वा गुणदोषभिदादृष्टिम् अन्तरेण निषेधलक्षणम् अपि वचः कथं नु तन्न समस्यात् किंवा कृतं निःश्रेयसं परं
स्यात् तस्य वेदस्य तत्त्वं नाङ्गीकारादित्यर्थः ॥३॥ न च पितरो देवाश्च सर्वज्ञाः अतस्तेभ्यो मनुष्येभ्यः

गुणदोषभिदादृष्टिम् अन्तरेण वचस्तव ॥ निःश्रेयसं कथं नृणां निषेधविधिल-
क्षणं ॥३॥ पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर ॥ श्रेयस्त्वनुपलब्धेऽर्थे साध्य-
साधनयोरपि ॥४॥ गुणदोषभिदादृष्टिर्निगमात्ते न हि स्वतः ॥ निगमेनापवादश्च
भिदाया इति ह भ्रमः ॥५॥

कथं पश्यन्ति नेत्याह पित्रादीनां सर्वेषां तव लक्षणरूपो वेद एव चक्षुः श्रेयः श्रेयं च ततः ॥ समापकं अनुपल-
ब्धेऽर्थे मोक्षे स्वर्गे च तत्साध्यसाधनयोः इदमस्य साध्यं इदमस्य साधनम् इति सत्यापित तदेव गुणदोषदृष्टिभाव-
निः ॥ श्रेयःसंपद्यते ॥४॥ किंच यथा द्रव्येणैव विहितानाम् अदृष्टहितं तस्मिन्नेव विषये प्राप्तं कथं प्रतिवर्तत इत्याह ने
निगमात् त्वाज्ञारूपा हेतो देव न हि स्वतः ॥ तस्माद् दर्शनमात्रेण न निवर्तते ॥ हत्येवं भ्रमो भवति तं निवर्तये

निशामः ५

180

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विषयाभेदेप्यधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमाह योगा इति योगाः शिलानेउपायाः ब्रह्मकर्मदेवुनाकोडेः
प्रोक्ताः कर्म च निःकामं श्रेयोविधित्सया मोक्षसाधनेच्छया अन्यउपायो नास्तीति काम्यकर्मादिकं चाव नैव इति तत्प्र
योजनत्वाभावेस्तुटीकारिष्यतियएतानित्यादिना ॥ ६ ॥ तेष्वधिकारभेदमाह निर्विण्णानामिति द्वाभ्यां ॥ इह एषां मध्ये
कर्मसु निर्विण्णानां दुःखबुद्ध्या तत्फलेषु विरक्तानां सतत एव तत्साधनकर्मन्यासिनां ज्ञानयोगः सिद्धिद इत्यन्वये। (18)

श्रीभगवानुवाच ॥ योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ॥ ज्ञानं कर्म च भ
क्तिश्च नोपायोन्योस्ति कुत्रचित् ॥ ६ ॥ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु
तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनां ॥ ७ ॥ यदृच्छया मत्कथादौ जातश्रद्ध
स्तु यः पुमान् ॥ न निर्विण्णो नातिसक्तो भक्तियोगोस्य सिद्धिदः ॥ ८ ॥ तावत्कर्मा
णि कुर्वीत न निर्विद्येत यावता ॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥ ९

ण्यन्वयः अनिर्विण्णचित्तानां दुःखबुद्धिशून्यानां ॥ अतः कामिनां तत्फलेष्वविरक्तानामित्यर्थः ॥ ७ ॥ यदृच्छ
याकेनापि भाग्योदयेन तत्र काम्यकर्मसु प्रवर्तमानस्य सर्वात्मना विधिप्रतिषेधाधिकारः स्यात्तन्नाधीनैवदा
ति ॥ निष्कामकर्माधिकारिणः स्वयथाशक्ति सर्वज्ञानभक्तियोगाधिकारः प्रागेव तदर्थिकृतवस्तुस्वस्याः ना
भ्यां सिद्धान्तात्त किंचिदिति ॥ ८ ॥ सावधिकं कर्मयोगमाह ॥ तावदिति नित्यनैमित्तिकानि ॥

भागवतटीका ॥ ५ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कर्मयोगिनां ज्ञानोक्तिभूमिकारोहप्रकारमाह स्वधर्मस्थ इति अनाशीःकामः अफलाकामः अन्यन्निषिद्धं ॥ नरक-
यान् हि देहे येव विहिताक्रियमाणान्निषिद्धाचरणाद्वा ॥ अतः स्वधर्मस्थत्वान्निषिद्धवर्जनाच्च नरकं न याति ॥ अफलकाम-
त्वात्स्वर्गमपि नेत्यर्थः ॥१०॥ किंच ॥ अस्मिन् लोके अस्मिन्नेव शरीरे स्थितः अनघः निषिद्धत्यागात् ॥ अतः शुचिः निर्दग्धरागादि-
रेव मलं यस्य यदृच्छयेति केवलज्ञानादपि भक्तिं वा लभते यदृच्छयेति ॥११॥ अनेन प्रकारेण ज्ञानभक्तिसाधनत्वान्नरदेहं स्तौ-
ति स्वर्गिणोऽपीति निरयिणश्चेति इष्टो नरलोकः ज्ञानभक्त्योः तदुभयं स्वर्गिनारकिशरीरं ॥१२॥ अतो न नरः स्वर्गतिं

स्वधर्मस्थो यजन्यज्ञैरनाशीःकाम उद्धव ॥ न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ॥१०॥ अस्मिंल्लोके व-
र्तमानः स्वधर्मस्थोऽनघः शुचिः ॥ ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया ॥११॥ स्वर्गिणोऽप्येतमिच्छन्ति
लोकं निरयिणस्तथा ॥ साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकं ॥१२॥ न नरः स्वर्गतिं कांक्षेन्नारकीं वा वि-
क्षं च चक्षणः ॥ नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यति ॥१३॥ एतद्विद्वान्पुरा मृत्योरभवाय घटेत सः ॥ अप्रम-
त्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदं ॥१४॥ छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिं ॥ खगः स्वकेतमुत्सृज्य
क्षेमं याति ह्यलंपटः ॥१५॥ अहोरात्रैश्छिद्यमानं बुद्ध्वायुर्भयवेपथुः ॥ मुक्तसंगः परं बुद्ध्वा निरीह उपशा-

न कांक्षेत नारकीमिति दृष्टान्तः ॥ यद्वा स्वयं यद्वा स्वर्गनिरकर्माणि न कुर्यादित्यर्थः ॥ अस्मातिश्रेष्ठत्वान्नरपि मत्त-
श्यो भवेयमिममपि न कांक्षेत ॥ यतो देहावेशात्तद्देहभङ्गात्स्वार्थे प्रमाद्यति ॥ एवं यावन्मृत्युर्न भवति ॥१३॥ अपि च ए-
तद्देहसाधकमिति विद्वान् ॥ मत्वार्थसिद्धिदमपि मर्त्यं ज्ञात्वा अप्रमत्तः ॥ अनासक्तः ॥ पूर्वं ॥ स मृत्योः ॥ मोक्षाय घटे-
त यतेत यत्नं कुर्यात् ॥१४॥ अप्रमत्तो मुक्तसंगः स्वस्वं प्राप्नोतीत्यत्र खगदृष्टान्तः ॥ छिद्यमानमिति यमैः यमवद्भिदेयैः
पुरुषैः कृतनीडं यस्मिन्तं स्वकेतं स्वस्थानमुत्सृज्य ॥ अलंपटः अनासक्तः ॥१५॥ दृष्टान्तिकमाह ॥ अहोरात्रैश्छिद्यमानमा-
युर्बुद्ध्वा ॥ भयेन वेपथुः कंपो यस्य सः ॥१६॥ ॥

182

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवंअप्रवृत्तमानं प्रत्यूहं निंदति नृदेहमिति सुलभं स्वभावं प्राप्तमाद्यं आहार॥ यो भवाब्धिं न तरेत्स आत्महा तत्र हेतवः
आद्यं सर्वफलानां मूलं प्रत्युपार्जितकर्मभिः सर्वं प्राप्तं॥ किंच सुदुर्लभं यमकोटिभिरपि प्राप्तमशक्यं
तथापि तत्सुदुर्लभं यदृच्छया लब्धमात्रं तं च सुकल्पं दृढं किंच गुरुमेव कर्णधारं संश्रितमात्रमेव कर्णधा
रो येन तादृशं मया च स्वतमारुतेण श्रीकृष्णस्मरणमात्रेण प्रत्यनुकूलमारुतेन प्रेरितं॥ ॥ एवं दत्वा वदेवं विरक्त
स्य वैराग्यपद्धतिज्ञानभक्तिसाधनैः कर्मयोगमुक्त्वा दानी सम्यग्विरक्तस्य ज्ञानयोगं तस्य च ज्ञानप्राप्तेः पूर्वं चि

नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं॥ मयानुकूलेन नभस्वतेरितं पुमान्भ
वाब्धिं न तरेत्स आत्महा॥ १७॥ यदारंभेषु निर्विण्णो विरक्तः संयतेंद्रियः॥ अभ्यासेनात्मनो योगी धा
रयेदचलं मनः॥ १८॥ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितं॥ अतंद्रितोऽनुरोधेन मार्गेणात्म
वशं नयेत॥ १९॥ मनोगतिं न विसृजेज्जितप्राणो जितेंद्रियः॥ सत्वसंपन्नया बुद्ध्या मन आत्मवशं न
येत २०

चित्तस्य वशीकरणोपायमाह॥ सार्धैः यदा तु आरंभेषु कर्मसु निर्विण्णः दुःखदर्शनेनोद्विग्नः॥ तत्फलेषु विर
क्तः अतएव संयतेंद्रियः सन् आत्मनोऽभ्यासेन आत्मविषयबुद्धिसंततिरूपेण विचार्य प्रचलं यथा भवति तथा मनो
धारयेत॥ १८॥ तत्र प्रथममेवासौ तथा धारणासंभवात् तत्स्वभावानुसारेण वशीकरणमाह॥ यर्हि भ्राम्यद्भ्र
म्यमाणं भ्रमत् अनवस्थितं भवति तदनुरोधेन किंचिदपेक्षाप्रदानेन॥ १९॥ ननु तर्हि यथाप्रवृत्तमेव स्यात्तत्रा
ह॥ मनोगतिं न विसृजेत् न तूपेक्षेत किंतु प्रमत्तः सन् आत्मवशं नयेत॥ आत्मानं लब्ध्वा यदि तस्य॥ २०॥

183

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मनुरोधमार्गमहृदयो ते आह ॥ एष इति ॥ अनुवृत्तिमार्गेण मनसः संग्रहः परमो योगः तत्साधनत्वात उपचारेण
स्तुतिर्यथा प्रवृत्तस्य मनसो यस्य सर्वतः प्रणयहृदयज्ञत्वं स्वाधिप्रायेणागतिमविच्छन्नप्रपेदामानाः प्रणयथा
रकः प्रश्यमं किंचिद्धारकैः कृतिर्मनुवर्तितेन ॥ तदाचरत्निमनात पूर्वैर्वगच्छन्तितेनतपेदानेनहृत दिपर्श ॥ २१ ॥ प
वमीपहस्तीकृतस्य मनसः ॥ एवं नी स्वलोपायानाह ॥ सांख्येनेति त्रिभिः सांख्येन तत्त्वविवेकेन सर्वभावानाम
हदादिदेहांतानां अनुलोमतः प्रकृत्यादिक्रमेण भवं पृथिव्यादिक्रमेणाप्ययं च अनुध्यायेत प्रसीदति स्थिर
स्थलं भवति ॥ २२ ॥ ननूपायसहस्रेणापि मनो विषयाकारतां न त्यजति किं भूयो भूय उपदेशेनेति चित्त यत्नाहत्रि यथा

एष वै परमो योगो मनसः संग्रहः स्मृतः ॥ हृदयज्ञत्वमन्विच्छन्दम्यस्येवार्वतो मुहुः ॥ २१ ॥ सांख्येन स
र्वभावानां प्रतिलोमानुलोमतः ॥ भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति ॥ २२ ॥ निर्विण्णस्य विर
क्तस्य पुरुषस्योक्तवेदिनः ॥ मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया ॥ २३ ॥ यमादिभिर्योगपथैरान्वी
क्षिक्या च विद्यया ॥ ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः ॥ २४ ॥ यदि कुर्यात्प्रमादेन योगी कर्म वि
गर्हितं ॥ योगेनैव दहेदंहो नान्यत्तत्र कदाचन ॥ २५ ॥

विरक्तस्येति ततश्च प्राणामापायिषु तेषु अवधिभूतानामदर्शनात तद्विकापन्नसंसारवक्तो निर्विण्णस्य अतो विर
क्तस्य उक्तवेदितः ॥ गुरूपदिष्टार्थो लोकस्यातत्नो गुरूपदिष्टस्य वचितितस्य पुनः पुनरनुचिंतया दौरात्म्यं देह
द्यभिमानं त्यजति ॥ २३ ॥ यमादिभिर्योगमार्गैः ॥ आन्वीक्षिक्या पदार्थहृदयशोधनेन मयार्चनध्यानादिभिर्वा वार
वृत्तस्य यत्नस्य स्मात्मतत्त्वं दर्शयति ॥ एतेनकपथे ॥ योग्यं परमात्मानं मनः ॥ स्मरेत नान्येः ॥ अतोत्मनऊर्यादिमर्णः २४
ननु तान्येविति कथं योगिभिः ॥ प्रमादात विकल्पप्राप्ते पापापनुत्तये प्रायश्चित्तं कार्यमेव तत्राह यदीमिति योगे
न ज्ञानाभ्यासेनैव पतत्त्वं भक्तस्यापि नामकीर्तनाद्युपलक्षणार्थं नाम्नात कुच्छादि ॥ २५ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु नियमैर्विहितं कर्म सत्र प्रोथकत्वाद्गुणः हिंसादिकं तु अशुद्धिहेतुत्वाद्दोषः न च तन्निवर्तकत्वात् कृच्छ्रादिप्राय
श्चित्तं गुण इति प्रतिषिध्याभ्यासकृत्वा प्रायश्चित्तं विनायोगो नैव कर्तुं पार्यते इत्यत आह॥ स्वे स्वे इति सार्धेन स एव
गुणः नेतरः तद्यपाद्दव नियम्यात् विधिनिषेधाभ्यामनेन गुणदोषविधानेन कर्मणां नियमः संकोचः कृतः
कृतः इत्यत आह॥ नाम्नाद्रव्यमेवाशुद्धानां ज्ञानां संगानां मा ज्ञत्वेच्छया अयं भावः शुद्धस्याशुद्धिर्वा मनःप्रवृत्तेन्नैव
यास्ति स्वभाविकप्रवृत्तेरेव तस्य मलिनत्वात्॥ न च सहसा सर्वतो निवृत्तिः कर्तुं शक्यते॥ अत इदं न न कर्तव्यमिदं इद॥

स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः॥ कर्मणां जात्यशुद्धानामनेन
नियमः कृतः॥ गुणदोषविधानेन संगानां त्याजनेच्छया॥२६॥ जातश्रद्धो म
त्कथासु निर्विण्णः सर्वकर्मसु॥ वेद दुःखात्मकान्कामान्परित्यागेऽप्यनीश्व
रः॥२७॥

मेव कर्तव्यमिति एवं स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते यथा च न प्रवृत्तिपरो वेदः॥ तयोस्त्वा
प्यायेत्वभ्यासः॥ उपमैव हिकामेहिंसादिना॥ अतो योगिनः स्वाभाविकप्रवृत्त्यभावान्न प्रायश्चित्तादिविधिगोचर
तेति॥२६॥ भक्त्यधिकारिणो भक्तियोगमाह जातश्रद्ध इति नवभिः॥ मत्कथासु जातश्रद्धः अत एवात्मकर्म
सु उद्विग्नः न च न तत्फलेषु विरक्तः॥ तदाह वेद इति॥ यद्यपि वेद तदपि तत्परित्यागेऽप्यनीश्वरः अशक्तः॥२७॥ ॥

185

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवंभूतोयः सश्रद्धालुः भक्त्यैव सर्वं भविष्यतीति ॥ दृढनिश्चयः सन् ततस्तदनंतरं मां प्रीत्या भजेत ॥ विषयांस्तु सेवमा-
नोपि तेषु प्रीतिं न कुर्यादित्याह ॥ गर्हयन्निति ॥ २८ ॥ कथं भजेत् किंवा ततो भवति तदाह प्रोक्तेनेति द्वाभ्यां ॥ श्रद्धामृतक-
थायां मे शश्वन्मदनुकीर्तनमित्यादिनात्र प्रोक्तेन ॥ मामसकृत् नित्यं भजतः हृदय्याः हृद्गताः कामा नश्यंति २९
हृदयमेव ग्रंथिः ॥ अहं करोमीत्यहंकारः तत्सर्वकार्यसंशयाः असंभावनादयः कर्माण्यनारब्धफलानि सं।

ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः ॥ जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन् ॥ २८ ॥ प्रोक्तेन भक्ति-
योगेन भजतो मासकृन्मुनेः ॥ कामा हृदय्या नश्यंति सर्वे मयि हृदि स्थिते ॥ २९ ॥ भिद्यते हृदयग्रंथिश्छि-
द्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि ॥ ३० ॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदा-
त्मनः ॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ ३१ ॥ यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ॥ योगे-
न दानधर्मेण श्रेयोभिरितरैरपि ॥ ३२ ॥ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा ॥ स्वर्गापवर्गं मद्धाम क-
थंचिद्यदि वांछति ॥ ३३ ॥

सारहेतुभूतानि ॥ ३० ॥ तदेवं अध्यायाधिकारत्रयमुक्तं स्वनिरपेक्षत्वात् सस्य च तत्साधनत्वाद्भक्तियोग एव
श्रेष्ठ इत्युपसंहरति तस्मादिति त्रिभिः मदात्मनः मयि आत्मा चित्तं यस्य तस्य श्रेयःसाधनं ॥ ३१ ॥ तत्र हेतुः यत्क-
र्मभिरित्यादि इतरैरपि तीर्थयात्राव्रतादिभिः श्रेयःसाधनैः यद्भाव्यं सत्त्वशुद्ध्यादि तत्सर्वं ॥ ३२ ॥ अंजसा अनायासे-
नैव ॥ स्वर्गापवर्गं मद्धाम वैकुंठं च लभत एव ॥ ३३ ॥ ५

186

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वांछा त्वनास्तीत्युक्तं यदि वांछंतीति ॥ ३४॥ न मय्येकान्तभक्तानां न किंचिदिति धीरा ॥ धीमंतः यतो मम एकांतिनः मय्येव 187
प्रीतियुक्ताः अतो मया दत्तमपि कैवल्यं ॥ तद्यद्यपि ददामि तथापि नैव नैरपेक्ष्यमेव परं श्रेष्ठं प्राहुः अनल्पकं महत्तं निःश्रेयसं तस्मा

न किंचित्साधवो धीरा भक्ता ह्येकान्तिनो मम ॥ वांछंत्य
पि मया दत्तं कैवल्यमपुनर्भवं ॥ ३४॥ नैरपेक्ष्यं
परं प्राहुः निःश्रेयसमनल्पकं ॥ तस्मा
न्निराशिषो भक्तिर्निरपेक्षस्य
मे भवेत् ॥ ३५ ॥

त्वं तत्साधनं च प्राहुः मे भक्तिर्निराशिषः ॥ प्रार्थनाशून्यस्य प्रार्थनाकारणाभूतायेन्नारहितस्य पुंसो भवेत्
यद्वा ॥ मे निरपेक्षस्य या भक्तिः सा निराशिषो भवेदित्यर्थः ॥ ३५ ॥ ॥ ॥ ओं रामाय तुभ्यं नमः ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री· भाग· टी· ५२

अनेन च प्रकारेणासिद्धानां न गुणदोषा इति विरोधपरिहारमुपसंहरति ॥ न मय्येति गुणदोषैर्विहितप्रतिषिद्धैर्ये
उद्भवो येषां ते गुणाः पुण्यपापादयः ॥ साधूनां निरस्तरागादीनां अतः समचित्तानां अत एव बुद्धेः परं सर्वेश्वरं प्राप्ता-
नां ॥३६॥ काम्यकर्मनिष्ठानां निर्दिष्टत्वेन तान्मुक्तिमार्गानुपसंहरति ॥ एवमेतानिति ॥ मे पथः मत्प्राप्त्युपायान् ॥ ये अनु-

न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः ॥ साधूनां समचित्तानां बुद्धेः पर-
मुपेयुषां ॥३६॥ एवमेतान्मयादिष्टाननुतिष्ठंति मे पथः ॥ क्षेमं
विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ॥ ३७ ॥ इति श्रीभा-
गवते महापुराणे एकादशस्कंधे विंशोध्या-
यः ॥ २० ॥ ॥ राम जी

तिष्ठंति ते क्षेमं कालमायादिरहितं मल्लोकं विंदंति ॥ यत्परमं ब्रह्म तत्त्वविदः ॥ ३७ ॥ इति श्री भावार्थ-
दीपिकायां एकादशस्कंधे यपकै विंशोध्यायः ॥ २० ॥ ॥ ॐ श्रीरामाय नमो नमः ॥ ॥ ॐ श्रीकृष्णाय नमः ५२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जयति स्वपरानंदः परानंदः स्वके सवे॥ यत्कृपालवलेशेन ... सन्ततिः हृन्ती॥ इंतातामिद्धया संतः त्वमंतं ममसाह
सं॥ मया हि स्वीयबोधाय कृतं मतं नत सर्वतः॥ एकविंशे क्रियाज्ञानभक्तिस्वाधिकारिणां॥ कामिनां द्वयदेशादिगुणादो
षाः प्रपंचिताः॥ तदेवं गुणदोषव्यवस्थार्थयो ... ज्ञानभक्तिसिद्धानां न किंचिद्गुणदोषौ तत्साधकानां त
प्रथमतो निवृत्तककर्मनिष्ठानां यथाशक्ति नित्यनैमित्तिककर्मसत्त्वशोधकत्वाद्गुणः तदकरणं निषिद्धकरणं च।
तन्मलीमसकरणत्वाद्दोषः॥ तन्निवर्तकाश्च प्रायश्चित्तं गुणाः विशुद्धसत्त्वानां तत्त्वज्ञाननिष्ठानां ज्ञानाभ्यास एव सिद्धि

श्रीभगवानुवाच॥ ॐ य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान्॥ क्षुद्रान्कामांश्चलैः प्राणैर्जुषं
तः संसरंति ते॥१॥ स्वे स्वेधिकारे या निष्ठा स गुणः परिकीर्तितः॥ विपर्ययस्तु दोषः स्यादुभयोरेष नि
श्चयः॥२॥

ए:

हे तत्वाद्गुणः भक्तिनिष्ठानां पुनः श्रवणकीर्तनादिभक्तिरेव गुणस्तद्विरुद्धं सर्वं मुभयेषां दोष इत्युक्तं इदानींये॥
तमसिद्धाः न साधकाः किंतु केवलं काम्यकर्मप्रधानाः तेषां सकलगुणदोषाः प्रपंचयिष्यन्नादौ तानति बहि
र्मुखान्निंदति यएतानिति॥ मत्पथः मत्प्राप्तिमार्गान्॥ क्षुद्रान्॥ तुच्छान्चलैः रस्थिरैः प्राणैर्देहवागिंद्रियैर्वा॥
जुषंतः सेवमाना भवंति॥ ते संसरंति॥ निखिलगुणदोषभाक्केनानायोपानीयाः सर्वं तीमय॥१॥ तत्रैतेवकर्मिभिः
केचिद्गुणदोषभानः केचित्तिन्नतोव ष स्यं नत्वाग्निना केचिद्दस्य तेकेचिद्दोति संभवति तत्राह स्वे स्वे इति॥ प्रथि।

कारभेदे ना कलितौ गुणदोषो न च मनिष्ठाविनिभाव॥२

189

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तदाह शुच्यशुचीति विचिकित्सार्हयोग्यमयोग्यं चेति संदेहहेतवस्तस्माभाविकप्रवृत्तिप्रतिबंधार्थमित्यर्थः तत्र शुच्यशु
चीयोग्यत्वायोग्यत्वे गुणदोषौ तत्र निमित्ते उपादेयत्वानुपादेयत्वे शुभाशुभे तन्निमित्ता वर्ण्यावर्ण्यौ ॥६॥ तत्र शुचीधर्मा
र्थं शुचीन धर्मः अशुचेर्नाधर्म इति ॥ गुणदोषावव्यवहारार्थं मशुचेरपि रागादीनां व्यवहारदर्शनात् तदुपादेयतास्या दि
ति ॥ शुभाशुभौ यत्वार्थक्रमाण तृणार्धदोषेत्यायस्त्रीविवाहमात्रोपादनेन पापंच अर्थको पादाने तपा पमिति
मया मन्वादिरूपेण धर्मरूपं ॥ पुंसां कर्मजडानामित्यर्थः ॥५॥ शुद्ध्यशुद्धी अपंचविषयत्वेनोक्तत्वेन तदपि वि

शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु ॥ द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ ॥ २ ॥ धर्मार्थं व्यव
हारार्थं यात्रार्थमिति चानघ ॥ दर्शितोयं मयाचारो धर्ममुद्वहतां धुरं ॥ ४ ॥ भूम्यंब्वग्न्यनिलाकाशा भूता
नां पंचधातवः ॥ आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः ॥ ५ ॥ वेदेन नामरूपाणि विषमाणि समेष्व
पि ॥ धातुषूद्धव कल्प्यंते एतेषां स्वार्थसिद्धये ॥ ६ ॥

वेशोभाभूदित्यत आह समानेष्वपि वस्तुष्विति यदुक्तं तत्प्रपंचयति भूमीति त्रिभिः ॥ भूतानां प्राणिनां धारयतीति धातवः ॥
कारणानि शरीराः शरीरारंभकाः देहतः सामस्तं जीवतोप्याह ॥ आत्मसंयुता इति ॥ ५ ॥ धातुदेहेषु ॥ नामरूपा
णि वर्णाश्रमादीनि कल्पनायाः प्रयोजनमप्याह ॥ एतेषां प्राणिनां स्वार्थसिद्धये ॥ प्रवृत्तिनियमद्वारा धर्मादि
पुरुषार्थसिद्धये ॥ ६ ॥ ॐ ॥ ॐ नमो भगवते वासुदेवाय ॥
ॐ श्रीकृष्णचरितायनमो नमः ॥ ॥ ॐ रामजी

१९० २५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न केवलं देहेष्वेव॥ अपितु देशकालादिभावानामपि॥ आदिशब्देनात्र पादेयानां फललिप्सितायिकाविणां ग्रहणं वस्तूनां 191
उपादेयानां स्त्रीस्नादीनामपि समसमयानियमार्थं संकोचार्थमित्यर्थः॥ ७॥ एवं तावद्दोषविषयं परिशोध्यानंतयोऽशुद्धि
शुद्धिमूलत्वात्॥ शुद्धी प्रपंचयति॥ अकृष्णशारमृगहीनः देशानां मध्ये कृष्णहरिणावहितो शुचिः तत्रापि अब्रह्म
ण्यब्राह्मणभक्तिशून्यो यत्तमशुचिः॥ कृष्णसारोपि कृष्णनष्टगोनसारः अशुचिः सोपि असौवीरः कीकटः सौवीरः
कीकटोप्यशुचिः॥ तदुक्तं॥ सर्वे शुभा तस्माद्देशास्तस्माच्च यत्र लभ्यते हरिणस्तद्वर्जितो यः कीकटः अंगवंगकलिंगादिः

देशकालादिभावानां वस्तूनां मम सत्तम॥ गुणदोषौ विधीयेते नियमार्थं हि कर्मणां॥ ७॥ अकृष्णसा
रो देशानामब्रह्मण्योऽशुचिर्भवेत्॥ कृष्णसारोऽप्यसौवीरकीकटासंस्कृतेरिणं॥ ८॥ कर्मण्यो गुण
वान्कालो द्रव्यतः स्वत एव वा॥ यतो निवर्तते कर्म स दोषोऽकर्मकः स्मृतः॥ ९॥ ॥ ॥ ॥

असंस्कृतः संमार्जनादिशून्यः म्लेच्छबहुलो वा इरिणमूषरं एकवद्भावः तदशुचि तदन्यः शुचिः तदन्यः शुचि
रित्यर्थात् उक्तं भवति॥ ८॥ कालस्य शुद्ध्यशुद्धी दर्शयति कर्मण्य इति द्रव्यतः द्रव्यसंपत्त्या स्वतो वा अशौचाभावादिर्यः
कर्माहः स कालः स्वस्मिन्कर्तरि गुणवान् यतः यस्मिन्नद्रव्याल्लाभेन वा राष्ट्रविप्लवादिना वा कर्म निवर्तते यस्य
स्वतः सूतकादौ दशाहादिलक्षणोऽकर्मकः कर्मानर्हः॥ स कालो दोषः अशुद्ध इत्यर्थः॥ ९॥ ॥ ॥ रामाय नमः

राम ॥ राम राम राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वस्त्रपात्रोपानत्प्रभृतीनां शुद्ध्यशुद्धी दर्शयति द्रव्यस्येति वस्तुनः । द्रव्यत्वेनोपायादिना शुद्धिः वचनेन शुद्धमशुद्धं च तन्न
देहे शुद्धमित्येवं रूपेण वचनेन शुद्धिः विपरीतेनाशुद्धिः संस्कारेण प्रोक्षणादिना पुष्पादेः शुद्धिः अवघ्राणादिना
नशुद्धिः कालेन दशाहादिना नवोदकादेः शुद्धिः ॥ कालेमेध्योदयं ग्राह्यं वर्ज्यं तत्प्रहमेव हि ॥ अकाले दशरात्रं स्या
त्ततः शुद्धिर्विधीयते ॥ पर्युषितान्नादेरशुद्धिः श्लेष्मजास्तु दनानाडहानाशुद्दकानोमहत्वालत्वान्याशुद्ध्यशु
द्धी ॥ १० ॥ शक्याशक्यास्यापरया सूतकान्नादेः शक्त्याशक्त्यशुद्धिः ॥ अशक्त्यातिशुद्धिः बुद्ध्या पुत्रजन्माहादौ

द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येणोवचनेन च ॥ संस्कारेणाथ कालेन महत्त्वाल्पतया यथा ॥ १० ॥ शक्त्याशक्त्या
यथा बुद्ध्या समस्याच यदात्मने ॥ अयं शुद्धं कुर्वंति हि यथादेशावस्थानुसारतः ॥ ११ ॥ ॥
कुर्वंति

दशाहाद्बहिस्तान्नेनशुद्धिः जातेनाशुद्धिः समस्तशाजीर्णविद्धस्यादेः समस्तद्रव्यमशुद्धिः दर्विद्रंप्रतिशुद्धिः तत्रापि
विशेषमाहयदिति ॥ एते च द्रव्यवचनादयो द्रव्यशुद्धिद्वारा यदयं कुर्वंति तद्देशावस्थानुसारतः ॥ एव ॥ य
थायथावदयं कुर्वंति ॥ सर्वतः तथाहि निर्भय एव देशे स्नानादिना शुद्धिं कुर्वंति न तु चौरायाकुलतया न था
रोगादिमति विकलपुवायवस्थायामेव कुर्वंति ॥ न बालसरोगाणावस्थायामिति ॥ तथा च स्मृतिः ॥ देशं कालं
तथात्मानं द्रव्यं द्रव्यप्रयोजनं ॥ उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति ॥ १२ ॥ ॥ ॐ रामाय नमो नमः १५५

192

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इत्यादिभिर्द्रव्यशुद्धिरुक्ता ॥ तत्र चतुर्वर्णादिशुद्धिरेकादशैव द्रव्य तत्र शुद्धिर्बहुरूपं विताम्रं च यतिदासल्लो। किंकं गृह
च मृण्मयादिकं च ॥ अस्थिराजदंतादिरसातैलद्रव्यादयः ॥ तैजसास्त्रवर्णादयः तेषां पार्थिवानां च रथ्याकर्दमयुटेष्टु
कादीनां यथायथं कालादिभिः शुद्धिः तत्रैषिकाकांस्यताम्रपत्रादिकानां तेषां ते देशकालावस्थायत्तासावेगाचैत
रस्येष्ठ शुतास्तैः मिलितैः केवलैस्त्र कालस्यपुनर्ग्रहणात्पुनस्तत्प्रदर्शनार्थं ॥ १ ॥ अवस्थापरस्य शेषशुद्धिमुक्तोलेप

याम्सर्वश्रियंतं तुनां रसतैजसचर्मणां ॥ कालवाय्वग्निमृत्तोयैः पार्थिवानां पुनस्तैः ॥ २ ॥ अमेध्यलिप्त
यद्येन गंधलेपव्यपोहति ॥ भजते प्रकृतिं तस्य तच्छौचं तावदिष्यते ॥ ३ ॥ स्नानस्नानतपो
वस्था वीर्यसंस्कारकर्तृभिः ॥ मन्त्रत्यागात्मनः शौचं शुद्धः कर्मचरे
द्विजः ॥ ४ ॥ रामजयी ॥ ॥

द्रव्यव्यपोहविषये त्वाह ॥ २ ॥ यत् पीत पात्रवस्त्रादियेन तद्द्रव्याणालाभोमोदकादिना गंधं च लेपं च व्यपोहति यज
ति ॥ स्वगतं च मलं तस्मात् प्रकृतिस्वमेव रूपं भजते तस्य तच्छौचं शोधकं ॥ यावता च तद्द्रव्याणादिना व्यपोहति यज
ति ॥ तावत्प्रमाणो स्वरूपत एव हस्तिनो वा तत्तत्कर्तव्यमिष्यते ॥ ३ ॥ एवं तावत्द्रव्यशुद्धिः कर्तृशुद्धिमाह स्ना
नेति ॥ अवस्था कौमारादिवीर्यशक्तिः संस्कारः उपनयनादिः कर्मसंध्यायासनादिदोतालस्तं ॥ ४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री. भाग. टी. ५९ ज्ञानेन स्या हंकारस्य कर्तुः एतैः स्नानादिभिः यथायथं तत्तत्कार्यानुसारिणी शुद्धिः इयं च शुद्धिर्न व्यवहारार्थाः किं तु
विहितकर्मार्थेत्याह ॥ शुद्ध इति द्विजः तद्रूपलक्षणं शूद्रादिरपि ॥ ४ ॥ मंत्रशुद्धिमाह ॥ ५ ॥ सद्गुरुमुखाद्यथावद्वि
ज्ञानेनैव मंत्रस्य शुद्धिः कर्मशुद्धिमाह ईश्वरार्पणात् कर्मणः शुद्धिः धर्मादिभिः षड्भिः शुद्धैः धौ ऽपि संहरति य म इति दे
शकालद्रव्यकर्तृमंत्रकर्मभिः षड्भिः शुद्धैर्धर्मः संपद्यते एतेषां विपर्ययः सोऽधर्मस्तद्धेतुत्वादित्यर्थः ॥ ५ ॥ अयं च गु
णदोषविभागो न वास्तव इत्याह क्वचिदिति ॥ ६ ॥ आपदि गृहस्थस्य गुणोऽपि नात्यापदि निषिद्धत्वाद्दोषः एवं धर्मस्य पर
स्य गुणोऽपि स्वस्य दोषः दोषोऽपि ऊढ्वना यायादि विरक्तस्य नैव दोषाः अपितु विधिबलेन गुणाः गुणदोषार्थनियमः

मंत्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणम् ॥ धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः ॥ १५ ॥ क्वचिद्गुणोऽपि दोषः
स्याद्दोषोऽपि विधिना गुणः ॥ गुणदोषार्थनियमस्तद्भिदामेव बाधते ॥ १६ ॥ समानकर्माचरणं पतिता-
नां न पातकं ॥ औत्पत्तिको गुणः संगो न शयानः पतत्यधः ॥ १७ ॥ ऽ ॥

र्थः एवं योऽयं गुणदोषयोरेकस्मिन्नेवार्थे नियमात् गुणदोषार्थो नियमः नियामकं शास्त्रं न तयोर्भेदमेव बाधते ॥ १६
दोषस्यैक्यविशेषत्वाभावे गुणत्वे वोदाहरणं दर्शयति समानस्य तस्यैव कर्मणः स्नानादेराचरणं पतिता-
नां पतनहेतुर्नापि जात्याकर्मणा वा पतितानां पुनः पातकमधिकात् नाशकं न भवति पूर्वमेव पतितत्वात् अत्र दो
षस्यापि दोषत्वं नास्तीत्यर्थः ॥ तथा संगोऽपि यतेर्दोषः स गृहस्थस्यौत्पत्तिकः पूर्वस्वीकृतो न दोषः अपि तु गु
णः अत्र भार्यादिसंगादिविधानात् अयनं चाह दृष्टांतः पूर्वमेवाधःशयानो यथा न पतत्यधोऽपि ॥ १७ ॥ प
वं गुणदोषनियमविधीनां प्रवृत्तिसंकोचहानिर्नाचपितामर्थमिममभिप्रेत्याह यतो यत इति ॥ ८ ॥ ५९

194

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यथाक्रान्तप्रवृत्तिपरतां वेदस्मानिनाकर्तृत्वप्रवृत्तिमार्गस्यानर्थहेतुत्वं तं दर्शयति॥ विषयेष्विति द्वाभ्यां॥
संगआसक्तिः तज्जेतेषु विषयेषु प्रवृत्तिहेतुस्तेनैव कामः तेन तस्य॥ कामादेव विवेकः कलहो विवादः॥॥ दुर्विषा
हत्तीव्रः तस्य संमोहः तेन क्रोधं चेतना॥ कार्याकार्यस्मृतिः दूनयोनिन्द्य॥॥ मृत्युप्रायकल्पते प्रसन्नत्वो भवति
रपर्थः स्वार्थविभ्रमः पुरुषार्थहानिः मूर्छेत्यमृततलोस्य॥६२॥ ननु त्वंतं प्रपंचयति विषयेति व्यर्थं वृत्तजी

स्प४

यतो यतो निवर्तते विमुच्येत ततः ततः॥ पुरुषयोनिनृपां द्वेसः किं मोहभयापह॥॥ विषयेषु गु
णध्यानात्संगः संगसूतो भवेत॥ संगात्तत्र भवेत्कामः॥ कामादेव कलिर्नृणां॥॥ कलेर्दुर्विषह
क्रोधः तस्य स्तुमनुवर्तते॥ तस्मात्सुस्पतेपुंसः चेतना आपि नैष्टु तस्य॥६॥ तयाच रहितः सायो
नातुः मृत्युप्रायकल्पते॥ ततो स्वार्थविभ्रंशो मूर्छितं मृतस्य च॥६॥ विषयाभिनिवेशेन नात्मानं वे
दत्यपरं॥ मृतजीविकयाजीवत्स्वार्थभ्रंशवयः स्मृतः॥७॥ फलश्रुतिरियं नृणां नश्रेयोरोचनं
परं॥ श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनं॥७॥

विकयो वजीवन्नर्तते॥ समूर्छितं तत्स्य॥ एतत्तद्योऽभवेत्तत्त्वमनुवर्तते॥ समृततत्स्य॥ अतः स्वार्थनाशा
रत्यर्थः॥६३॥ ननु प्रवृत्तस्य स्वर्गादिफलश्रवणात् कृतः स्वार्थविभ्रंश इत्याह॥ इयं फलश्रुतिः न श्रेयः प
रमपुरुषार्थपराभवतीत्यर्थः॥ किंतु बहिर्मुखाणां एषां मोक्षविवक्षया॥ अवांतरफलैः कर्मस्वच्युत्पाद
नमात्रं तथा भैषज्योऽपि पथ्ये रोचनं कृत्युक्त॥ पाटनेन तथा हि पिब निंबं प्रदास्यामि खलु ते खंडलड्डुकान्॥ पिते

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग
एका
८०

ननु कर्मकांडे मोक्षस्य नामापि न श्रूयते कुत एवं व्याख्यायते यतो यथाश्रुतस्य च घटनादित्याह उत्पत्त्यैव हि तद्भावयति
सन्न्यासभावनया एव कामेषु पश्वादिषु प्राणेषु आयुरिंद्रियबलवीर्यादिषु स्वजनेषु पुत्रादिषु अनर्थहेतुषु
परिणामतः कोदुःखदेहेतुषु ॥२४॥ अतस्तान्स्वार्थं परमपुरुषार्थमविदुषः ॥ अतो न तान् मुक्तीभूतान् वेदो यज्ञेषु योजय
ति ॥ तदेव श्रेयः इति विस्रंभितान् निरर्थं ॥ तानेव भूतान् वृजिनाध्वनि काममार्गेणि देवादियोनिषु भ्राम्यतः
ततः पुनः तमः वृक्षादियोनिं विशतः ॥ पश्वादि कामस्तु तिच पुत्रादि कामस्तु तिच पुत्राकं पुन स्तेषु एव कामेषु
स्वयं बुधो वेदो युञ्ज्यात प्रवर्तयेत नतथा मत्वा नामेः स्यादिति भावः ॥ कथं तर्हि मीमांसकाः फलमार्गतो व

हि
उत्पत्त्यैव कामेषु प्राणेषु स्वजनेषु च ॥ आसक्तमनसो मर्त्या आत्मनोन
र्थहेतुषु ॥२४॥ न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि ॥ कथं युञ्ज्यात्पुनस्ते
अ
षु तांस्तमो विशतो बुधः ॥२५॥ एवं व्यवसितं केचिदविज्ञाय कुबुद्ध
यः ॥ फलश्रुतिं कुसुमितां न वेदज्ञा वदंति हि ॥२६॥ कामिनः कृपणा
लुब्धाः ॥ पुष्पेषु फलबुद्धयः ॥ अग्निमुग्धा धूमतांताः स्वलोकं न विदंति
ते ॥२७॥

इति तत्राह एवमिति ॥२५॥ एवं व्यवसितं वेदस्याभिप्रायं कुबुद्धयो मिलितांस्तांस्तत्र फलं श्रेयो रोचनयापरमनीयांपरमफ
लश्रुतिं कुसुमितां कुबुद्धयः तदाह हि यस्मात् वेदज्ञा वादरायणादयः ॥ तथा न वदंतीति ॥२६॥ कुबुद्धित्वं प्रपंच
यति कामिन इत्यादिभिः कामिनाः तृष्णा ॥ ततो लुब्धाः ॥ तृष्णाकुलाः ॥ अतः पुष्पेषुवांतरमफलबुद्धयः ॥
तएवाग्निमुग्धाः ॥ अग्निसाध्यकर्मणि मनिवेशोनलब्धविवेकाः ततश्च धूमतांताः धूममार्गोन्नियेयांतेस्वलो

196

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कोसौ स्वलोकः तमाह नेति हृदिस्थमात्मानं स्वलोकं न तु फलं दिस्यतु महका [illegible] तान जानं तमेव सर्वमेव सर्वं स्वप
मात्मानं तत्त्वज्ञाननीत्याह य इदं यद्यतिति [illegible] ज्ञाता [illegible] तः यत इदं जगज्जातं तत्कुतो न जानाति हृदिस्थमा [illegible]
मैव यस्य स्व [illegible] कथनीयं पशुहिंसामात्र [illegible] तेउक्तास्त्रामः कर्मवेदिप्रवित्ताः अतः केवलमसुतृपः ॥
प्राणतर्पणपराः नीहारं तमः तेन व्याप्तानि चक्षूंषि येषु ते यथा संनिहितमपि न जानन्ति तद्वत् ॥ तथा च श्रुतिः
न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्तीति ॥२८॥ वे

क्व

न ते मामंग जानन्ति हृदिस्थं य इदं यतः ॥ उक्थशस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः ॥ २८ ॥

ते मे मतमविज्ञाय परोक्षं विषयात्मकाः ॥ वृथा पशून् हि हिंसन्ति हिंसैव श्रेति नेच्छवान ॥ २९ ॥

हिंसायां यदि रागः स्याद्यज्ञ एव न चोदना ॥ इति वेदस्य निष्ठा त्वं न वेद तत्त्ववेदेति हि ॥ ३० ॥

हिंसाविहारा ह्यालब्धैः पशुभिः स्वसुखेच्छया ॥ यजन्ते देवता यज्ञैः पितृभूतपतीन् खलाः ।

॥ ३१ ॥

नाः

नेतात्पर्यज्ञानाश्च परस्परं तेनीमाह ॥ ते परोक्षमस्फुटं मे मम विज्ञाय देवादीन् जनं प्रत्युत्तरेण लयः स्वमहात्तमेवा
ह ॥ २९ ॥ हिंसामिति ॥ हिंसायां यासौ मम हरणार्थं तत्फलार्थं च यदि रागः स्यात्तर्हि यत्तु एव इस अनुज्ञातं तद्वारा ।
परिसंख्येयं तत्त्वाव्ययपक [illegible] तेन [illegible] यत्नमिति मनेमिति कयोः कामविशेषानुबंधो नास्ति तथापि कर्मणा
पितृलोकमितिस्फुरते ॥ सामान्यतः पितृलोककामनायाम् ॥ अतः कारणं [illegible] कामनायेति भावः तदुक्तं तत्र ।
कामस्य क्रिया काचिदिह दृश्यते नेह कर्हिचित् यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितमिति ॥ अप्रस्तुतादेव हिं
सायां विहितायां जीवाये पाते ॥ ३० ॥

197

श्री
भाग
पत्री
५८

किंच तेति संवृत्य यदाह स्वर्गादयस्मिन्निति अमुं परं लोकं आशिष आस्मिंल्लोके संकल्पे नन्वनिश्चित्य विविन्न
बाहुल्यात् तत्तज्जनिकर्मविनियोगं जयंति यथा कश्चिद्वणिक् कुतरसमुद्रादिलंघनेन वहु ॥ धनार्जने कृपा
सिद्धं स्वजन्तुभयप्राप्तो भवति तद्वदिति भावः ॥ ३१ ॥ अतो रजः सत्त्वतमोनिष्ठाः ते रजस्सत्त्वतमो जुषस्तानुपासतेन्द्र
दीन्देवानुपासते तन्मायया यी डाडी नाम पि महेश्वरा न्नंगुपासते न मां वत तत्तत्प्रियप्राप्तवा पासते ये च दक्षिणां तस्मादि
भावः ॥ ३२ ॥ इह दिवं कालोत्तमं तमेव सकलं दर्शयति इष्ट्वेति तस्य भोगस्यान्ते महाशाला महागृहस्थाः ॥ ३३
ततः किमित्यत आह एवमिति पुष्पितया वाचा व्याक्षिप्तमनसां मद्वार्तापि न रोचते इति भावः ॥ ३४ ॥ तदेवं प्रवृत्तिपर

स्वप्नोपममसुं लोकमसन्तं श्रवणप्रियं ॥ आशिषो हृदि संकल्प्य त्यजन्त्यर्था यथा वणिक् ॥ ३१ ॥ रजः
सत्त्वतमोनिष्ठा रजःसत्त्वतमोजुषः ॥ उपासत इन्द्रमुख्यान्देवादीन्न तथैव मां ॥ ३२ ॥ इष्ट्वेह देवता यज्ञैर्ग
त्वा रंस्यामहे दिवि ॥ तस्यान्त इह भूयास्म महाशाला महाकुलाः ॥ ३३ ॥ एवं पुष्पितया वाचा व्याक्षि
प्तमनसां नृणां ॥ मानिनां चातिलुब्धानां मद्वार्तापि न रोचते ॥ ३४ ॥ वेदा ब्रह्मात्मविषयास्त्रिकांडवि
षया इमे ॥ परोक्षवादा ऋषयः ॥ परोक्षं मम च प्रियं ॥ ३५ ॥

तेनिरा कृतस्य प्रकृतं निर्वृत्तिपरमेवोपसंहरति वेदा इति कर्मब्रह्मदेवताकांडविषया इमे वेदाः ॥ ब्रह्मात्मवि
षयाः ब्रह्मैवात्मा संसारी नित्यनत्परा ॥ तत्र यत्प्रतीतो च फलश्रुतिरियं तन्नानायो विवक्षितार्था मायया मे
यज्ञरोचनमित्युक्तं पवकारणमनुस्मारयति परोक्षेति ऋषयो मंत्रा ॥ तद्वृष्टारो वा तत्किमित्यत परोक्षमेव
मम प्रियं यं भावः ॥ प्रत्यक्षं तः कारणेरेव तद्बोद्धुमनां नैव नधिकारिभिः कृथाकर्मता
पत्ते श्रुत्वा प्रसंगादिति ॥ ३५ ॥ ११८८

नत्रवेदस्तात्रपि जैमिन्यादयः किमिति तत्पावर्णयंति तां विना तत्वतो वेदेन दर्थं वान्को पि वेदेत्याशयेनाह शब्दब्र
ह्मेति यावत्समाप्ति ॥ स्वरूपतः अर्थतश्च दुर्विज्ञेयं तच्चकथंभूतं स्थूलं चेति द्विविधं तत्र सूक्ष्मं तावत्स्वरूपतो दुर्विज्ञे
यमित्याह ॥ प्राणेंद्रियमनोमयं प्राणसंप्रयाणामयं परारूपं मनोमयं पश्यंतीरूपं इंद्रियमयं मध्यमारूपं तस्य
वाग्व्यंजकत्वेन वागिंद्रियप्रधानत्वात् ॥ किंच ॥ अनंतपारं सम्यक्प्राणादिमयत्वेन स्वतो निर्विशेषस्य कालतो देश
तश्चापरिच्छेदात् अर्थतोपि दुर्विज्ञेयत्वमाह ॥ गंभीरं निगूढार्थं अतो दुर्विगाह्यं मतिप्रवेशानर्हं ॥ तथा च श्रुतिः च

शब्दब्रह्म सुदुर्बोधं प्राणेंद्रियमनोमयं
अनंतपारं गंभीरं दुर्विगाह्यं समुद्रवत् ॥
॥ ४९ ॥

त्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥ गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या
वदंति ॥ अयमर्थः वाचः शब्दब्रह्मणः परिमितानि निगदितानि पद्यते ज्ञायते एभिरिति पदानि रूपाणि च ॥
त्वार्यपि ये मनीषिणां तरहृदये ॥ ते विदुर्नान्ये अतो गुहायां देहमध्ये त्रीणि निहितानि नेंगयंति ॥ स्वरूपेण प्रका
शयंति ॥ अतः केवलं वाचः तुरीयं चतुर्थं भागं वैखरीरूपं मनुष्याः प्राणिनो वदंति ॥ तमपि वेदं देवत् न तत्त्वतो जा
॥ नंति ॥ तच्च मनीषिभिरेव ज्ञेयं स्वरूपेदर्शयति मंयेति ॥ ४९ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री-
भा.ए.
टी.
९९

मयानंतशक्तिनोपबृंहितं अधिष्ठितं || अतः स्वत एव परिच्छेदमाह || भूम्नेति || अधिष्ठातृत्वेपि अविकारित्वमाह ब्रह्म
णेति अविकृतस्यानियंतृत्वं घटयति || अनेन शक्तिनेति भूतेषु सर्वप्राणिषु घोषरूपेण नादरूपेण लक्ष्यते || मनी
षिभिः अतः सूक्ष्मत्वेन दर्शने दृष्टांतः विसेषूर्णेव तंतुरिति || ततो वैखर्याख्यायाह हृदयाद्वाचः तत्त्रिप्रकारस्य दृ
ष्टांतमाह || यथेति त्रिभिः || ३७ || हृदयात्मकोऽप्रवृत्तावस्थातः ऊर्णनाभिवत् प्रकटनेन दार्ष्टांतिके दर्शयति || आका
शादिति त्रिभिः तदुपाधिर्हिरण्यगर्भरूपः || ३८ || प्रभुर्भगवान्वाचं तनुते रूपेण || ३८ || छंदोमयो वेदमूर्तिः स्वतंत्रः स्व।

मयोपबृंहितं भूम्ना ब्रह्मणानंतशक्तिना || भूतेषु घोषरूपेण विसेषूर्णेव
लक्ष्यते || ३७ || यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् || आकाशाद्घो
षवान्प्राणो मनसा स्पर्शरूपिणा || ३८ || छंदोमयोऽमृतमयः सहस्रपदवीं
प्रभुः || ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषितां || ३९ || || राम ||

घे

तथा घोषवान् || नादोपादानवान् || मनसा निमित्तभूतेन || विभिन्नतामेव दर्शयति || स्पर्शादीन्वर्णान्निरूपयति
सकलयति || इति स्पर्शरूपिणेन स्पर्शग्रहणमुपलक्षणं हृदयाकाशात् बृहतीं सृजतीति तृतीयश्लोके
नान्वयः बृहती शब्दार्थमाख्यानाय विशेषणानि सहस्रपदवीं बहुमार्गां तदेवाह || ओंकाराद्व्यंजितः केवलादिसंयो
गव्यंजितैः स्पर्शादिभिर्भूषितां ओंकारस्वायं स्वरूपतः सूक्ष्मोऽभिन्नः ततः कार्यादिवर्णरूपः तत्स्वयं स्पर्शकोटित्वा
न तत्र स्पर्शाः कादिपंचवर्गाः स्वरा अकारादयः षोडश ऊष्माणः शषसहाः अंतःस्थाः यरलवाः || ३९ || राम ९९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विविधाभिर्वैदिकलौकिकभाषाभिः विततां यथोत्तरं चत्वार्यक्षराणि अधिकानि येषां तैः छंदोभिरुपलक्षितां एव
मनंतपारां सृजति स्वयमेवाक्षिपते उपसंहरति ॥ ५० ॥ ते छंदांसि निर्दर्शयति ॥ गायत्रीति तत्र चतुर्विं-
शत्यक्षरा गायत्री ततश्चतुरक्षरवृद्ध्या उष्णिगादिछंदांसि ग्रंथस्थैः अतिजगती अतिछंदो विराट् चेत्यर्थः एतैश्छंदो-
भिरुपलक्षितामिति ॥ पूर्वेणैवान्वयः ॥ ५१ ॥ अतो ब्रह्मरूपिमाकल्पेन स्ववाङ्मयेनात्र तैः यत्नतः ॥ अर्थं तामि पिडयंत्य।

विविधभाषाविततां छंदोभिश्चतुरोत्तरैः ॥ अनंतपारां बृहतीं सृजत्याक्षिपते
स्वयं ॥ ५० ॥ गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च ॥ त्रिष्टुब्जगत्यतिछंदो ह्यति
छंदतिजगद्विराट् ॥ ५१ ॥ किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ॥ इत्यस्या
हृदयं लोके नान्यो मद्वेद कश्चन ॥ ५२ ॥ ॥

त्वामाह ॥ किमिति कर्मकांडे विधिवाक्यैः ॥ किं विधत्ते देवताकांडे ॥ मंत्रवाक्यैः ॥ किमाचष्टे प्रकाशयति
ज्ञानकांडे च ॥ किमनूद्य विकल्पयेत् ॥ निषेधार्थमित्येवमस्या हृदयं तात्पर्यं मर्मज्ञो न्यः ॥ कश्चिदपि न वेद
न तु तर्हि त्वं मत्कृपया कथय ॥ उमिति कथयति ॥ ५२ ॥ ॥
॥ रामायनमः ॥ ॥ ॥ रामजी ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री. भाग. टी. १०० मामेव यज्ञरूपं विधत्ते ॥ तत्तद्देवतारूपमभिधत्ते मन्त्रः ॥ अप्रमः पृथक्कृत्य आकाशादिप्रपंचजातं तस्माद्वा एतस्मा
दात्मन आकाशः ॥ संभूत इत्यादिना विकल्प्यापोह्यते तदप्यहमेव न मत्तः पृथगस्ति कृतं इत्यपोह्यते यो ॥ सर्ववे
दार्थसंक्षेपतः ॥ कथयति ॥ ४२ ॥ मूलं ॥ एतावानेव सर्ववेदानामर्थः तमेवाह ॥ शब्दो वेदः मां परमार्थरूपमाश्रि
त्य भिदां मायामात्रमित्यनूद्य अन्ते नास्ति ॥ किं च वेति प्रतिषिध्य प्रसीदति निवृत्तव्यापारो भवति ॥ अयं भावः यथा

मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहं ॥ ४२ ॥ एतावान्सर्व
वेदार्थः शब्द आस्थाय मां भिदां ॥ मायामात्रमनूद्यान्ते प्रतिषि
ध्य प्रसीदति ॥ ४३ ॥ इति श्रीभागवते एकादशस्कंधे भगव
दुद्धवसंवादे एकविंशोऽध्यायः ॥ २१ ॥

202

स्रोकुरयेरसः ॥ स एव तद्विस्तारभूतानां नानाकांडप्रपाखानामपि तत्तदेव प्रणवस्यायोऽर्थः ॥ परमेश्वरः स एव तद्वि
स्तारभूतानां सर्ववेदकांडप्रपाखानामपि सेवाकृतेनाम्य इति ॥ निरस्तकः स्वतः सर्ववेदकृत ॥ सर्ववेदविन्
स्वपरज्ञानदाता यस्तं वंदे गुरुमीश्वरं ॥ ४३ ॥ इति श्रीभावार्थदीपिकायां एकादशस्कंधे एकविंशोऽध्यायः
॥ २१ ॥ ॐ रामाय तस्मै नमः ॥ ॥ रामजी ॥ ॥ ॐ श्रीकृष्णाय नमः ॥ १००

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्वाविंशे तत्त्वसंख्यानां अविरोधविधोच्यते ॥ पुंप्रकृत्योर्विवेकश्च जन्मसंसृतयस्तथेति च ॥ ॥ एवं वेदानां प्रवृत्तिनिराकरणमोक्ष
परत्वे निर्णीते संतितत्र मोक्षपरत्वेपि तदवांतरविवादाः तथा हि केचित्तत्त्वसंख्यासु विवदंते तेन तत्रापि च वाक्यार्थसंदेहसत्वे
श्रान्तरं तत्त्वैक्यकत्वनानात्वादिषु तत्र किं सत्यमिति जिज्ञासयापृच्छति कतीति ॥ ऋषिभिरागमेषु बहुधा संख्यातानि
तेषु कति युक्तानीमर्थः ॥ अयाव ननातप्रवादपूर्वकं बहुधा संख्यानं प्रपंचयति नवेति त्रिभिः त्वं तावदष्टाविंशति त

श्रीउद्धवउवाच ॥ कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो ॥ नवैकादश पंच त्रीण्यात्थ त्वमिति शुश्रुम १
केचित्षड्विंशतिं प्राहुरपरे पंचविंशतिं ॥ सप्तैके नव षट् केचिच्चत्वार्येकादशापरे ॥ २ ॥ केचित्सप्तदश प्रा
हुः षोडशैके त्रयोदश ॥ ३ ॥ एतावत्त्वं हि संख्यानामृषयो यद्विवक्षया ॥ गायंति पृथगायुष्मन्निद
नो वक्तुमर्हसि ॥ ४ ॥ श्रीभगवानुवाच ॥ युक्तं च संति सर्वत्र भाषंते ब्राह्मणा यथा ॥ मायां मदीयामुद्गृह्य
वदतां किं नु दुर्घटं ॥ ५ ॥ ॥

त्वान्यपतानि च वयं शुश्रुम तदत्तः ॥ २ ॥ एतावती नां भावः एतावत्त्वं नानात्वमित्यर्थः नद्विवक्षयाय ऋषयो जनम
मित्रेषु च गायंति श्रायुष्मन्निति संबुद्धौ ॥ ३ ॥ विवक्षाभेदेन सर्वं युक्तमेव मायया च किं नाम न युक्तमित्याह युक्तमिति
यथा ब्राह्मणा भाषंते तत् युक्तं यतः न वस्तुतः यस्मात्संति च सर्वत्रांतर्भूतानि तत्त्वानि किं च मायामिति मत्संवेपि मा
याश्रयत्वात् दुर्घटनमेवेत्यर्थः ॥ उद्गृह्य स्वीकृत्य वदतां विमरीचिजल्पेतिमायया विवादे ॥ किं किंचिद्दुर्घटं ननु भवतत्र

११ श्री

२०३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु यदि सर्वमपि युक्तं कुतो विवादः यदि च मायैवात्र मूलं तर्हि कुतो हेतुं प्रति विवादस्तत्राह नैतदिति हेतुं प्रति च विवद
मानानां मदीयाः दुरतिक्रमाः शक्तयः सत्त्वाद्याः अतः कारणं वृत्तिविशेषरूपेण परिणता एव हेतुरित्यर्थः ५ ता
सां विवादहेतुत्वमुपपादयति यासामिति व्यतिकरात् क्षोभात् तद्वदतां विषयः विकल्पो भेद आसीत् अतः कुत्र वृत्ति
विकल्पो वा नन्वमूलभूतः ॥ एतदेव व्यतिरेकेण द्रढयति ॥ शमदमयोर्हि हेतौ तस्मिन्प्राप्ते विकल्पः अपैति लीयते
नच विकल्पमनु वादः शाम्यतीति ॥ ६ ॥ सन्ति सर्वत्रेति यदुक्तं तदुपपादयति परस्परेति द्वाभ्यां ॥ अणोः न्यूने तत्र प्र

नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा ॥ एवं विवदतां हेतुं शक्तयो मे दुरत्ययाः ॥ ५ ॥ यासां
व्यतिकरादासीद्विकल्पो वदतां पदं ॥ प्राप्ते शमदमेऽप्येति वादस्तमनु शाम्यति ॥ ६ ॥ परस्प
रानुप्रवेशात्तत्त्वानां पुरुषर्षभ ॥ पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितं ॥ ७ ॥ एकस्मिन्नपि
दृश्यंते प्रविष्टानीतराणि च ॥ पूर्वस्मिन्वा परस्मिन्वा तत्त्वे तत्त्वानि सर्वशः ॥ ८ ॥ ॥ राम

वेशात् उक्तं यथा विवक्षितं तत्तथा पूर्वं कारणं अपरं कार्यं कार्यकारणभावेन प्रसंख्यानं गणनं भवति ॥ यद्वा पूर्वीलसं।
ख्यापरा अधिकसंख्यानयोर्भिदः ॥ पौर्वापर्यं तेन प्रसंख्यानं गणनं ॥ यद्वा पूर्वस्मिन्संख्यानं गणनं इति ॥ ७ ॥ अनुप्रवे
शं दर्शयति एकस्मिन्नपीति पूर्वस्मिन् कारणभूते तत्त्वे कार्यतत्त्वानि सूक्ष्मरूपेण प्रविष्टानि दृश्यंत एव तत् ॥ अपर
स्मिन्कार्यतत्त्वे कारणतत्त्वान्यनुगतत्वेन प्रविष्टानि दृश्यंत इत्यर्थः ॥ ८ ॥ ॥ ॐ नारायणाय नमः ॥ ९ ॥ ॐ राम ॥ १०१

204

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अविरोधमुपसंहरति अत अमीषां तत्वानां पौर्वापर्यक्रमाभावात्प्रसंख्यानं चतुर्नाधिकसमभीप्सितं वादिनां मध्ये यथा यथा
विवक्षया यदुक्तं यस्य सुखं प्रवर्तते तत्त्वं विविक्तं निश्चितं वक्ष्यति गुरुणा मोक्षक्रमाद्येन सर्वसंग्रहे: संभवात् ॥ ९ ॥ ननु कार्य
कारणात्तत्वानां पृथक्त्वात्पृथक्त्वविवक्षया भवतु नाम समस्ताभेदः जीवेश्वरयोः स्वरूपभेदात्समेदविवक्षया षड्विंशति
पंचविंशती एतौ प्रवृत्तौ अत आह ॥ अनादीति स्वतो न संभवति ॥ अत एव तत्सम्भवात्स्वतः सर्वज्ञः परमेश्वरो ऽन्यो भवि
तव्य इति षड्विंशति पक्षाभिप्राय इत्यर्थः ॥ १० ॥ कथं तर्हि पंचविंशतिपक्षः तत्राह पुरुषेश्वरयोरिति वैलक्षण्यं विसम्वादस्त्वंना।

पौर्वापर्यमतो मीषां प्रसंख्यानमभीप्सितं ॥ यथा विविक्तं यदुक्तं गुरुणा मोक्षसिद्धिसंभवात् ॥ ९ ॥ अनाद्यवि
द्योपाधिकस्येश्वरस्यात्मवेदनं ॥ स्वतो न संभवादन्यः तत्त्वज्ञो ज्ञानदो भवेत् ॥ १० ॥ पुरुषेश्वरयोरत्र न वैल
क्षण्यमणवपि ॥ तदन्यत्कल्पनापार्था ज्ञानं च प्रकृतेर्गुणाः ॥ ११ ॥ प्रकृतिर्गुणसाम्यं वै प्रकृतेर्नात्मनो
गुणाः ॥ सत्वं रजस्तमश्चेति स्थितिसर्गान्तहेतवः ॥ १२ ॥

नास्ति द्वयोरपि चिद्रूपत्वात् अत एतयोर्भेदं तत्समन्वकल्पनापार्था एवं पंचविंशतिपक्षप्रवृत्तिरित्यर्थः ॥ ननु
वेदश्रुत्या ईश्वरप्रसादलभ्यं ज्ञानं तस्य प्रकृतेर्ज्ञानमप्यत्र द्वयमपि न घटते अत आह ज्ञानं चेति सत्वगुणोद्भूतित्वात्तत्।
देतत्संभूतमित्यर्थः ॥ ११ ॥ ननु ज्ञानं जीवधर्मः कथं प्रकृतेर्गुणाः स्यात् अत आह प्रकृतिरिति गुणसाम्यं हि प्रकृतिः
अतः तद्विशेषभूता गुणाः तस्या एव न त्वात्मनो जीवस्य कर्तृत्वात् ॥ न त्वस्य स्थित्यादिहेतुं भूतगुणा अयत्वाउप
पत्रे: ॥ २ ॥ ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अतः सत्वं सत्वमये ज्ञानं प्रकृतेर्गुणा इति ॥ पूर्वेणैवान्वयः न त्वत्र हि तत् निवर्त्यु कर्म चाज्ञानं च तत्त्वान्तरे स्यात् तत्र रजः क
र्मै रजसो वृत्तिः अज्ञानं च तमस इति अतः कर्माज्ञानयो रजस्तमोद्वारा प्रकृतावेवान्तर्भाव इति भावः तथापि काल स्व
भावयोः तत्त्वान्तरता स्यात् न गुणानां व्यतिकरो यस्मात् स एवेश्वरः ॥ कालो नाम स्वभावो नाम सूत्रं महत्तत्वमेव न ।
स सर्वशक्तिमत्वात् तदेवं ज्ञानादीनां यथायथमन्तर्भावान्नयतनहेषितं तत्त्वं हि एतत्सर्वं पदार्थतेरेषु पृथिव्येयस्य मते ।
न गुणानां साम्यमात्मा पायितव्यास कृते भेदो विवदितः अतो गुणा स्वीणि तत्त्वानि ॥ ३ ॥ अथ परापि पंचविंशति तत्त्वानि

सत्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते ॥ गुणव्यतिकरः कालः स्वभावः सूत्रमेव च ॥ ३ ॥ पुरुषः प्रकृ
तिर्व्यक्तमहंकारो नभोऽनिलः ॥ ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव ॥ ४ ॥ श्रोत्रं त्वग्दर्शनं घ्राणो जि
ह्वेति ज्ञानशक्तयः ॥ वाक्पाण्युपस्थपाय्वंघ्रिः कर्माण्यंगोभयं मनः ॥ ५ ॥ शब्दः स्पर्शो रसो गंधो रूपं
चेत्यर्थजातयः ॥ गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥ ६ ॥ ॥

पूर्वोक्तं पक्षद्वय साधारणं निदर्शयति पुरुष इति सार्द्धद्वाभ्यां व्यक्तं महत्तत्वं नभआदीनि तन्मात्राणि मे मया ॥ ४ ॥
एकादशकं दर्शयति श्रोत्रमिति दर्शनं चक्षुः ज्ञानशक्तयः ॥ ज्ञानेंद्रियाणि पंच वागादि पायुनानि द्वंद्वैकवेनोक्तानि च
त्वारि अंघ्रिस्त्वेति कर्माणि कर्मेंद्रियाणि पंच उभयं उभयात्मकं मनः ॥ अंगेति संबोधनं एवमेतान्येकादश ॥ ५ ॥ पंच द
र्शयति शब्द इति शब्दादीनि विषयतया परिणतानि पंच महाभूतानि न तु गुणादिभिः तत्त्वाधिक्यं पक्षद्वयोपि स्यात्
येनाह ॥ गतीति गतिः उक्तिरुत्सर्गो विशिल्पं चेतानि कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फलानि न तत्त्वान्तराणि

तदेवं मतत्रयतत्त्वसंख्याभेदं निरूप्य द्विविधत्वपक्षं तत्त्वानीति यदुक्तं तन्मतमर्थं दर्शयति सर्गादाविति कार्याणि षोडश विकाराः कारणानि महदादीनि सप्त तद्रूपिणी सती प्रकृतिः अस्य विश्वस्य सर्गादौ गुणाः सृज्यावस्थां धत्ते उपादानकारणरूपत्वात् ॥ पुरुषस्तु अव्यक्तः अपरिणामी निमित्तभूतः केवलमीक्षते अतः परिणामित्वात्प्रकृतेः पुरुषो भिन्न इति ॥ १७ ॥ तत्त्वेषु वस्तुसप्तकार्यस्य तदंतर्भावमभिप्रेत्याह व्यक्तादय इति व्यक्तादयो महदादयः प्रकृतेरुत्पन्ना धातवः ते विकुर्वाणाः पुरुषेक्षणाल्लब्धवीर्याः संहताः अंडं कार्यं सृजंति न स्वयं प्रकृतेः बलान्न साक्षिते सर्ग्य ॥ १८ ॥

सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी ॥ सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते ॥ १७ ॥ व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया ॥ लब्धवीर्याः सृजंत्यंडं संहताः प्रकृतेर्बलात् ॥ १८ ॥ सप्तैव धातव इति तत्रार्थाः पंच खादयः ॥ ज्ञानमात्मोभयाधारः ततो देहेंद्रियासवः ॥ १९ ॥ षडित्यत्रापि भूतानि पंच षष्ठः परः पुमान् ॥ तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत् ॥ २० ॥ चत्वार्येवेति तत्रापि तेज आपोऽन्नमात्मनः ॥ जातानि तैरिदं जातं जन्मावयविनः खलु ॥ २१ ॥

एवं स्वमतमुपसंहृत्य मतांतरेष्वपि सामान्यतो निरूपितानां त्रयाणां विशेषतः मतानाम् दर्शयति सप्तैवेति ज्ञानं जानातीति ज्ञः क्षेत्रज्ञो जीवः उभयोः ईक्षितृद्रष्टव्ययोराधार आत्मा चेति सप्त तत्र प्रकृत्यादीनां कारणत्वेन खादिष्वंतर्भावः उक्तशेषाणामंतर्भावार्थमाह ततस्तेभ्यः सप्तभ्यः देहेंद्रियासवः कार्याणि जायंते ॥ १९ ॥ षडिति मतेऽपि भौतिकस्य भूतेष्वंतर्भाव जीवकस्य च परमात्मन्यंतर्भावमाह तैर्युक्त इति ॥ २० ॥ अन्नं पृथ्वी आत्मनो जातानि आत्मनामहः ॥ चत्वारीति तत्त्वानि अंतर्भावार्थमाह ॥ तैरिति ॥ अवयविनः कार्यस्य ॥ २१ ॥ राम ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भूतानि च मात्राणि इंद्रियाणि च पंच पंच एकेन मनसा सह आत्मा सप्तदशः ॥ २४ ॥ आत्मैव संकल्पयन्मन उच्यते त्रयोदशपक्षे
भूतानि तन्मात्रैरेवोपकृतानि पंचैव इंद्रियाणि च तदुपकारकाणि पंचैव मनस्त्वेकमिंद्रियाधिष्ठातृ ॥ आत्मा च द्विविधः ।
एवं त्रयोदश एकादशपक्षे जीवमनसोरात्मान्तर्भावेन नामैकादश नवपक्षे अष्टप्रकृतयः पुरुषस्तु विकाराणां
तर्भावः ॥ २३ ॥ उपसंहरति इति एभिः प्रकारैः प्रकृतिः पुरुषभेदज्ञापनायेत्यर्थः ॥ २६ ॥ तत्र पृच्छति प्रकृतिरिति

एकादशत्वमात्मासौ महाभूतेंद्रियाणि चाष्टौ प्रकृतयश्चैव पुरुषश्च नवे त्यथ
त्यथ २ मतांतरे

संख्याने सप्तदशके भूतमात्रेंद्रियाणि च ॥ पंच पंचैकमनसा आत्मा सप्तदशः स्मृतः ॥ २४ ॥ तद्वत्षोडशसं
ख्याने आत्मैव मन उच्यते ॥ भूतेंद्रियाणि पंचैव मन आत्मा त्रयोदश ॥ २५ ॥ इति नानाप्रसंख्यानं तत्त्वाना
मृषिभिः कृतं ॥ सर्वं न्याय्यं युक्तिमत्त्वाद्विदुषां किमशोभनं ॥ २६ ॥ उद्धव उवाच ॥ प्रकृतिः पुरुषश्चोभौ
यद्यप्यात्मविलक्षणौ ॥ अन्योन्यापाश्रयात्कृष्ण दृश्यते न भिदा तयोः ॥ २७ ॥ प्रकृतौ लक्ष्यते ह्यात्मा प्रकृ
तिश्च तथात्मनि ॥ २८ ॥ ॥

आत्मना जडाजडस्वभावेन विलक्षणौ अन्योन्यापाश्रयात् परस्परपरिहारेण प्रतीतेरित्यर्थः ॥ तदेव व्यनक्ति
प्रकृतौ लक्ष्यते इति प्रकृतिरात्मनि तेन विना न स्यात्प्रतीतेः ॥ अहं स्थितिभेदप्रतीतेश्च देहात्म
नो भेदो लक्ष्यते ॥ इत्यर्थः ॥ २८ ॥ इदं विवर्तमाने संशयं नेत्रयुक्तो नैपुण्यं प्रा
वीण्यं प्रावीण्यं येषां तैः एवमं ॥ २९ ॥ ॥ राम १०३

208

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्हसीत्युक्तं तच्चेहेतुमाह ॥ हियस्मात्वत्तः तस्मात्सादेव त्वत्तो ज्ञाने प्रमोषः अंशानां तेशक्तितः मायातः न तु स्वप्रका
शात्मनः कथं ज्ञानं प्रमोषः ज्ञानदाने तत्प्रमोषेवा मम किं प्रयोजनं न ताहत्वमेवेति ॥ २७ ॥ विकाराविकाभ्यां
नानात्वेकत्वाभ्यां प्रकाशाप्रकाशाभ्यां वा यं तमभेदं वक्तुमाह प्रकृतिः पुरुषश्चेति विकल्पालं तमेदएव कतद्स्य
पेक्षायां प्रकृतिशब्दोक्तदेहादिसंघातस्य विकारित्वं तावद्दर्शयति ॥ एषइति द्वाभ्यां एषसर्गः सृज्यतेइति सर्ग

ह्यात्ममायायाः

एवमेतं पुण्डरीकाक्ष महान्तं संशयं हृदि ॥ छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः ॥ २७ ॥
नतो ज्ञानं हि जीवानां प्रमोषस्तेत्र शक्तितः ॥ त्वमेव साक्षाद्योमायागतिं वेत्थ न चापरः २१
श्रीभगवानुवाच ॥ प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ ॥ एष
वैकारिकः सर्गो गुणव्यतिकरात्मकः ॥ २८ ॥ ममांग माया गुणमय्यनेकधा ।
विकल्पबुद्धीश्च गुणैर्विधत्ते ॥ वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिदैवमधिभू
तमन्यत ॥ २९ ॥ ॥

देहादिसंघातः वैकारिकः विकारवान् ॥ अत्रहेतुः गुणव्यतिकरात्मकः गुणक्षोभजन्य ॥ २८ ॥ नानात्वमाह ॥
ममेति विकल्पं भेदं तद्बुद्धीश्च ॥ अनेकधात्वं प्रपंचयति ॥ वैकारिकः ॥ अनेकविकारवानपि स्थूलेनाम
गेणातावत् त्रिविधः त्रैविध्यमेवाह ॥ अध्यात्ममित्येवंरूपं ॥ २९ ॥ ॥ राम ॥
श्रीरामाय तस्मै नमः ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भा॰ टी॰ १०५

नाभिहृद्याकाशादर्शयति तत्कुसुमप्यात्मरूपं अधिभूतं सूत्ररूपेणेव त्वगोलिकप्रविष्टः आर्केवपुः। अंशोधिदैवमिति सोपलप्र
काशतामाह परस्परमिति एवं चक्षुरूपं स्नायतेन तदन्यथानुपपन्नाचक्षुस्तत्सहमस्यथानदधिष्ठानं देवता त
न्नस्त्वचः प्रवृत्तिः ततोनुपलानमिसेवमेतत्रयं परस्परं सिद्धितिश्रुत्वेध्येइति विशेषणान्याचर्मसाहइ ह्यंतोपयोगि
तयाथवस्तु खेआकाशेअर्कोवितते मंडलात्मासन्स्वतःसिध्यति च तद्विषयानेपिप्रतियोगपपेल्लाभावमात्रेणास्व
तरसमुक्तं ॥ इदानीमात्मानामाधुःकारणमतएकरूपः अभितस्तस्मादेतेभ्योपिपरोभिन्नःस्वप्रकाशत्वादपीत्या
हस्वयानुभूत्यास्वतःसिद्धप्रकाशेनाखिलानांपरस्परंप्रकाशकानामपिप्रकाशकःसर्वेषामपिसामान्यतःचि

इद्रूपमार्केवपुरत्ररंध्रेपरस्परंसिध्यतियःस्वतःखे॥ आत्मायदेषामपरोयआद्यःस्व
यानुभूत्याखिलसिद्धिसिद्धः॥२९॥ एवंत्वगादिश्रवणादिचक्षुर्जिह्वादिनासादिचचि
त्तयुक्तम्॥३०॥॥

त्प्रकाशविषयत्वात॥ अतएवतत्स्वप्रकाशत्वंसिद्धं चक्षुषिदर्शनमस्यैविषयमिंद्रियांतरेभ्रुतिदितिएवमि
ति यथाचक्षुःएवंत्वगाद्यपीत्यर्थः त्वक्स्पर्शोवायुरितिश्रवणंशब्दोदिशइतिजिह्वारसोवरुणइतिनासा
गंधोश्विनाविति त्विनेनयुक्तंमंतःकरणांतरमतितत्रचित्तंचेतयितव्यंवासुदेवइतिमनोमंतव्यंचंद्रइतिबुद्धिः
बोधव्यंब्रह्मेति॥ अहंकारोहंकर्तव्यंरुद्रइत्येवंत्रिविधमित्यर्थः॥ ननुचयुक्तरपिचेलत्तएपमात्रमेवोक्तंत्रिविध
प्रपंचव्याप्तिविकल्पप्राप्तिस्तत्रजतःस्यादहंकारनिवृत्यानन्तरातःत्रिविधविकल्पनिवृत्तमेवाध्यायेनाहद्योमावित्ति १०५

योसावहंकारस्तमेवाह ॥ गुणाक्षोभं करोतीति ततः य एको प्रधानमूलात्माख्या निर्मितो भूत्वा प्रधानं मूलं उपादानं यस्य तस्मा न्महतो हि प्रसूतो विकारः स चित्तू त्रिविधः यस्य विकल्पस्य हेतुस्त्रिविधत्वमेवाह वैकारिक इति ॥ ३२ ॥ तत्कृतो निवर्तते ॥ आत्मस्तान विलसितत्वान्न तान्नेवं न्याया येनाह आत्मापरिज्ञानमय इति ॥ तत्र कथं मोहमयत्वं विकल्प स्याहंकारस्य वा कैश्चित्स्यसत्वागीकारान्न त्याह ॥ विवाद इति प्रथमस्मिदार्थनिष्ठो विवादो ह्यात्मापरिज्ञानमयः इमत्व

योसौ गुणाक्षोभकृतो विकारः प्रधानमूलान्महतः प्रसूतः ॥ अहं विमूढो ह विकल्पहेतुर्वैकारिकस्तामस ऐन्द्रियश्च ॥ ३२ ॥ आत्मापरिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः ॥ व्यर्थोपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात् ॥ देवाहिताया तितया च नीचदेहेषु निस्पवर्तमानाः ॥ ३३ ॥

यः युद्धा विवादः सर्वोभिथार्थनिष्ठ एवं न त्वसत्तमात्रनिष्ठः अतः परस्परयुक्तिभिरेव भेदस्यानिराकृतत्वात्मोह मयत्वं सिद्धमिति तत्र यद्यहंकारो विकल्पस्य नास्ति चलते हि निवृत्तिश्च यामेतन्नाह व्यर्थोपि निष्प्रयोजनः अर्थं वहितोपि वास्वरूपभूतात्मनो बहिर्मुखानां हृदी भूतानां पुरुषाणां नैवोपरमेत्तत्र अहंकारो विकल्पस्य प्रसूत ॥ तत्कृतैः कर्मभिरुच्चनीचदेहेषु ते संसरंतीति यतः ॥ परिवर्तमाने अनिस्थितधियः पुनः पुनरुच्चनीचेषु देहे षु संसरंतीति ॥ ३३ ॥ राम

॥ २११

तत्र सुखं तिल्वत्तरं इति न्यायकस्यात्मनो देहाद्देहान्तरगमनं अकर्तुः कर्माणि तस्य च जन्ममरणादीनि कथमिति भा
वः ॥३४॥ एतद्विद्वांसोऽनेन संह्रियमाणा मायया वंचिताः मोहिताः ॥३५॥ लिंगशरीराध्यासेन सर्वं घटत इत्युत्तरमाह म
न इति प्रधानत्वेन पंचभिरिति निर्देशोऽन्येषामप्युपलक्षणार्थः देहाद्देहान्तरं प्रतियाति ततोऽन्य एवात्मा तन्मनोऽनुव
र्तते अहंकारेणानुगच्छति नन्वमनस्सोऽपि पूर्वदेहवियोगो देहान्तरसंयोगश्च कथं भवतीति चेत् ॥३६॥ स्मृतिविय
ोगयोगाभ्यामिति वक्तुं तयोः कारणमाह ॥ ध्यायन्निति कर्मतन्त्रात् कर्मोपस्थापितान् दृष्टाननुश्रुतान्वा देहान्।

॥ ॥

श्रीउद्धव उवाच ॥ त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो ॥ उच्चावचान्यथा देहान् गृह्णन्ति विसृजन्ति च ॥ ३४
तन्ममाख्याहि गोविन्द दुर्विभाव्यमनात्मभिः ॥ न ह्येतत्प्रायशो लोके विद्वांसः सन्ति वंचिताः ॥३५॥ श्रीभग
वानुवाच ॥ मनः कर्ममयं नृणामिन्द्रियैः पंचभिर्युतम् ॥ लोकाल्लोकं प्रयात्यन्य आत्मा तदनुवर्तते ॥३६॥ ध्या
यन्मनोऽनुविषयान्दृष्टान्वानुश्रुतानथ ॥ उद्यत्सीदत्कर्मतन्त्रं स्मृतिस्तदनुशाम्यति ॥३७॥ विषयाभि
निवेशेन नात्मानं यत्स्मरेत्पुनः ॥ जन्तोर्वै कस्यचिद्धेतोर्मृत्युरत्यन्तविस्मृतिः ॥३८॥ ॥ ॥ ॥

न्वा विषयान्स्मरत्यथ अर्थान्तरं ध्यायमाने उद्यत् आविर्भवत् पूर्वविषये प्रसीदत् लीयमानं भवति तदनन्तरं
तस्य स्मृतिः पूर्वापरानुसंधानेन शाम्यति ॥३७॥ ततः किमत आह विषयेति कर्मोपस्थापितदेवादिदेहाभिनिवे
शेनात्मानं पूर्वदेहं ॥ पुनर्नानुस्मरेदिति यन्नोपयानत्रदेहाभिनिवेशेन भयशोकादेः देवादिदेहाभिनिवेशेन ।
वा हर्षतर्षादिहेतोः पूर्वदेहे अत्यन्तविस्मृतिः ॥ अहंकारनिवृत्तिः तदभिमाननिवृत्तिर्जन्तोर्जीवस्य मृत्युरुच्यते तत्तदेह

212

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जन्मतु विषयस्य देहस्य आत्मतया स्वीकृतं अभिमानं प्राहुः नतु देहद्रुमस्मिन् चक्षुरादिदेहवत्स्त्रीमतिशायमात्रेण किं
तु सर्वभावेन अभेदेन अभिमानमात्रेणात्मस्मृतिः स्वप्नयोर्दृष्टांतद्वयं यथा स्वप्नस्य मनोरथस्य चेत्यर्थः ॥३९॥ दृष्टान्तो विवृ
णोति स्वप्नमिति नत्ववर्तमाने स्वप्नादौ पूर्वं चेति अपूर्वमिति वान्वयः पूर्वसिद्धमेवात्मानमपूर्वमिवायं जातमिवप
श्यतीत्यर्थः ॥४०॥ उपसंहरन्निन्द्रियाणामयनं मनः तस्य देहात्मनाभिनिवेशेन या सृष्टिः उत्पत्तिः तया वस्तुनि आ
त्मनि तदभिमानेनेदं त्रैविध्यं अध्यात्म मस्यन्नतया अन्तःस्थित दैवमालीयत एवं स्थूलात्मा वासनाभ्यंतर भेदहेतुश्च भव 213

जन्म त्वात्मतया पुंसः सर्वभावेन भूरिद ॥ विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः ॥३९॥ स्वप्नं मनोरथं
चेत्थं प्राक्तनं न स्मरत्यसौ ॥ तत्र पूर्वमिवात्मानमपूर्वं चानुपश्यति ॥४०॥ इन्द्रियायनसृष्ट्येदं त्रैविध्यं भाति व
स्तुनि ॥ बहिरन्तर्भिदाहेतुर्जनोऽसज्जनकृद्यथा ॥४१॥ नित्यदा ह्यङ्ग भूतानि भवन्ति न भवन्ति च कालेनाल
क्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते ॥४२॥

तीत्याह विषयान्स्वांतरान् खादीन् अनुपश्यतीत्यर्थः ॥ यथा जनो जीवः स्वमेव दृष्टवान् असत् जनानां देहान् कुर्वन् पा
पुत्रत्वकृद्रूपो भाति तद्वदेहाद्यहंदं त्रिविधं अयमात्मा त्रिरूपं भाति असत् न तु कृतं उत्पत्तिरीत्यादकः जनः पिता स्वयं स
न्नोपि पुत्राभिमानेन तस्मादभिमानादि त्रय यथा भयभेदहेतुर्भवति ॥ तद्वदिति ॥ अयमात्मामानेन ॥४१॥ नदेव लोकप्रसि
द्धोजन्ममृत्यु निरूपयन् सूक्ष्माव स्थावपि नो वैराग्याय निरूपयति नित्यदा प्रतिक्षणं भूतानि शरीराणि उत्पद्यन्ते न
श्यन्ति च कालस्यातिसूक्ष्मत्वात्प्रकृते भाव नमभावने वाविवेकिभिर्न दृश्यते ॥ सर्वैषां जीवानुसारेण ज्ञातमिति ॥ ४२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग.
टी.
१०५

सतो जन्ममरणयोरज्ञानेकारणमेततभवेत् सत्वेमेवतयोः ऋतस्याशंक्यानुमानेन साधयति॥ अर्चिषां परिणा
मादिभिः स्रोतसां गमनादिभिः फलानां रूपादिभिर्यथा विशेषाः कृताः कालेनेति स्यानुषंगः॥ आदिशब्देन वृद्धो बलक
मकौशलादीनामुपादाने विमतं प्रतिक्षणमपि विनाशवदवस्थाभेदवत्त्वात् दीपज्वालादिवदित्यनुमाने कथं
तर्हि प्रत्यभिज्ञा तत्राह देवसादृश्यावलंबिनीत्याह॥ सोयमिति सादृश्यादर्चिषामेव यथा सोयं दीप इति प्रत्यभिज्ञा
यथा च स्रोतसां प्रवाहजलानामेव तदिदं जलमिति तथा सोयं पुमानिति धीर्गीश्च मृषा नृणां वृहन्नां शरीरे॥

यथार्चिषां स्रोतसां च फलानां वा वनस्पतेः॥ तथैव सर्वभूतानां वयोवस्थादयः कृताः॥ ४३॥ सोयं दीपो
र्चिषां यद्वत्स्रोतसां तदिदं जलं॥ सोयं पुमानिति नृणां मृषा गीर्धीर्मृषायुषां॥ ४४॥ मास्वस्य कर्म
बीजेन जायते सोप्ययं पुमान्॥ म्रियते वामरो भ्रांत्या यथाग्निर्दारुसंयुतः॥ ४५॥
सो

णां मृषायुर्मृषायुर्येषामविवेकिनां तेषां भवति॥ ४४॥ नन्वेकस्यैव देहस्यावस्थावतः पुंसः कर्मजन्ममरणा
विसंतिनायस्येति व्यवस्था न हि त्रुट्यते त्रुटस्य पुरुषभेदेन सत्वं मम सत्वं चेति न यत्तास्याविवस्तुतः तदभा
वादित्याह नायं पुमान् आत्मस्य स्वात्मनः कर्मणा बीजभूतेन सोपि पुमान् जायते म्रियते मेवा॥ किंत्व
थाभ्रांत्या अजन्मापि जायत इव॥ अमरोपि म्रियत इव यथा महाभूतते जोरूपोग्निः काकल्पांतमवस्थितोपि
दारुयोगवियोगाभ्यां जन्मनाशौ प्राप्नोतीति न इत्॥ ४५॥ ॥ राम॥ ~ ॥ ~॥ १०५

214

सिद्धवत्कृत्योक्ता वयोवस्थाः प्रपंचयति निषेकोऽभिषेकः गर्भः तत्रस्थो वृद्धिः बाल्यमापंचमाब्दात् कौमारं आषो
डशाब्दं ततो यौवनमापंचचत्वारिंशतः ततो वयोमध्यमाषष्टिवर्षात् देहसंबंधाज्जन्ममरणादीनुपपादितमर्थ
मुपसंहरति एता इति ॥ ४६ ॥ द्विस्थूलदेहस्य सूक्ष्मस्यात्मनो वा देहस्य संबंधिनीर्यां एतामनोरथमयीः तनूरवस्थागुणासंगा
त्स्वकृतमविवेकात्कश्चित्तु मनसैवस्वानुगृह्णातिः कथंचिज्जहाति च अवस्थावतो देहस्य द्रष्टा नावस्थावानिति विवेकज्ञा
नेन न तु तदानीं तनमूर्छितं ते नेत्र जन्ममरणावस्थे जन्ममरणावान् देहो न स्पृशतेति तत्राह ॥ आत्मन इति ॥ ४७ ॥ पि

निषेकगर्भजन्मानि बाल्यकौमारयौवनं ॥ वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ॥ ४६ ॥ एता मनोर
थमयीर्हान्यस्योच्चावचास्तनूः ॥ गुणसंगादुपादत्ते क्वचित्कश्चिज्जहाति च ॥ ४७ ॥ आत्मनः पितृपुत्रा
भ्यामनुमेयौ भवाप्ययौ ॥ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः ॥ ४८ ॥ तरोर्बीजविपाकाभ्यां यो वि
द्वान्जन्मसंयमौ ॥ तरोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ॥ ४९ ॥

त्देहस्यो यदि हि कं उर्वतात्ययदर्शनात् तु चदेहस्य च जातकर्मणि जन्मदर्शनात आत्मनः स्वदेहस्यापि भवा
प्ययावनुमेयौ एवं च द्रष्टृत्वे सति भवाप्ययवतां वस्तूनां देहानामभिज्ञो द्रष्टा द्वयलक्षणः भवाप्ययधर्मको
न भवति ॥ ४८ ॥ एतद्देवदृष्टांतेन स्पष्टयति ॥ ४९ ॥ तरुर्यथा हि नो द्विजन्मा ज्ञो फलन्दानां फलपाकांतस्पष्टीस्तदेविन्या
यीः यद्वान्तरोर्वीजस्य परिणामो विपाकः बीजाज्जन्म विपाकान्संयमं नाशं च विद्वान्प्रद्रष्टा न तोर्द्दृष्टांतः प्रपयक्
अन स्तत्र वर्तमानो पियो भवाप्ययाभ्यां स एव प्यते ॥ अविवेकेनासंसारं प्रपंचयति प्रकृतेविति पंचभिः ॥ ४९ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भाए. टी. १०८

तत्त्वेन तत्त्वतो विविच्य तत्त्वेन स्पर्शस्य विषयस्य संमूढः इति वा ॥५०॥ तत्र सत्त्वादिगुणभेदेन त्रिविधं तच्चापि तत्रावत
मेनैकैक त्रिविधं संसारमाह सत्त्वेति ॥५१॥ ननु कर्तुरात्मनः कुतः कर्मभिः भ्रमणं तत्राह ॥ नृत्यतो गायत इति जनान्
पश्यन्ननुकरोतीति तद्वत्स्वरतालादिगतिं शृंगारकरुणादिरसं च मनसा अनुवर्तयतीत्यर्थः ॥ अनुकार्यते इत्यनास्पष्ट
त्वेन बुद्धिगुणैर्बलादित्यर्थः ॥ अनेन दृष्टान्तेन दृश्यधर्मा द्रष्टरि विभ्रमवतीति दर्शितं ॥५२॥ उपाधिधर्मा अप्युपहिते संभा
व्यन्त इत्यत्र दृष्टान्तमाह ॥ यथांभसेति नीरस्थास्तरवो यथा तेन इव दृश्यन्ते जले प्रतिबिंबिता वायुचंचला इवेति विष

प्रकृतेरेवमात्मानं अविविच्याबुधः पुमान् ॥ तत्त्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ॥५०॥ सत्त्वसंगाद्
ऋषीन्देवान्रजसासुरमानुषान् ॥ तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः ॥५१॥ नृत्यतो गायतः पश्य
न्यथैवानुकरोति तान् ॥ एवं बुद्धिगुणान्पश्यन्नीहोऽप्यनुकार्यते ॥५२॥ यथांभसा प्रचलता तरवोऽपि च
ला इव ॥ चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः ॥५३॥ यथा मनोरथधियो विषयानुभवो मृषा
स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ॥५४॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ध्यायतो विषया
नस्य स्वप्नेऽनर्थागमो यथा ॥५५॥ ॥

यग्राहकेन मनसा परिकल्पिता एवं ते प्रलापादयो गुणाः न वस्तुतः सन्ति अतो मनो निर्बंधेनैव संसार इ
त्यभिप्रायमुग्राहकमुग्राह्यावभासं तद्दृष्टान्तमाह यथेति ॥५३॥ भोगस्यापि मिथ्यात्वे दृष्टान्तद्व
यमाह यथेति यथा एताः असिद्धा मनोरथधियः स्वप्नदृष्टाश्च धियो यथा मृषा एवमात्मनो विषयानुभवः
संसारो मृषा ॥५४॥ ननु यदि मृषा तर्हि किं तन्निवृत्त्यर्थं साधनेनेति तत्राह अर्थे हीति ॥ अस्य आत्मनः ॥ ५५ ८ ॥ ॥ ९ ॥ ॥ १०८

216

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अतो भोगो यस्मान्न कर्तव्य इत्याह तस्मादिति ॥ ५६ ॥ दुःखप्रतीकारो यस्य तमपि परित्यज्य परमेश्वरनिष्ठेनैव भाव्यमित्याह क्षि-
प्त इति द्वाभ्यां अवमानितः असूयित इति वा असूयितः ॥ ५७ ॥ निष्ठितः निष्ठीवनविषयीकृतः मूत्रितः मूत्रेणार्-
द्रीकृतः प्रकंपितः परमेश्वरनिष्ठातः प्रच्यावितो कृच्छ्रगतः कष्टं प्राप्तोपि न दातव्ये यम बलेन आत्मना बुद्ध्या आत्मानमुद्धरे-

तस्मादुद्धव मा भुंक्ष्व विषयानसदिंद्रियैः ॥ आत्माग्रहणनिर्भातं पश्य वैकल्पिकं भ्रमं ॥ ५५ ॥ क्षिप्तोवमा-
नितोसद्भिः प्रलब्धोसूयितोथवा ॥ ताडितः सन्निरुद्धो वा वृत्त्या वा परिहापितः ॥ ५६ ॥ निष्ठितो मूत्रितो वाज्ञै-
र्बहुधैवं प्रकंपितः ॥ श्रेयस्कामः कृच्छ्रगत आत्मनात्मानमुद्धरेत् ॥ ५८ ॥ उद्धव उवाच ॥ यथैवमनुबु-
ध्येयं वद नो वदतां वर ॥ सुदुःसहमिमं मन्य आत्मन्यसदतिक्रमं ॥ विदुषामपि विश्वात्मन् प्रकृतिर्हि बली-
यसी ॥ ऋते त्वद्धर्मनिरतान् शांतांस्ते चरणालयान् ॥ ६० ॥ इति श्रीभागवते एकादशस्कंधे भगवदु-
द्धवसंवादे द्वाविंशोध्यायः ॥ २२ ॥

तु ॥ श्रीनारायणं स्मरेत् इत्यर्थः ॥ ५८ ॥ एवं त्वदुक्तं यथावदनुबुध्येयं तथा नः सम्यगनुशाधि इत्यर्थः ॥ ५९ ॥ त्वद्धर्मनिर-
तान्ते विदुषामपि असद्भिः कृतमतिक्रमं अपराधं सोढुं दुःसहं मन्ये इत्यत्र हेतुः प्रकृतिः स्वभावः ॥ ६० ॥ निरस्तस-
र्वसंदेहमेकीकृतसदर्पणं ॥ प्रकाशितरहस्यं तं भजामि गुरुमीश्वरं ॥ इति श्रीभावार्थदीपिकायामेकाद-
शस्कंधे द्वाविंशोध्यायः ॥ २२ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्रयोविंशे तिरस्कारसहनोपायईर्यते ॥ भिक्षुगीतापकारेण मनसः संयमो धिया ॥१॥ दुर्जनोपद्रवो नूनं दुःसहो
पि महीयसां ॥ अतस्तन्निमित्तैरुपायैः सहनोपायवर्णने ॥२॥ तत्र तावदस्मिन्नध्याये भिक्षुगीतया मनोविजय उक्ते र
स्मिन्प्रकृति विवेकस्तु तदुत्तरस्मिन्नुग्राहृतिविजयः ततः परस्मिन्नैलगीतया विषयसंगमादोन सत्संगादुक्तिक्रमे
णोपाया भगवता वर्णिताः ॥ आशंसितः प्रार्थितः भृत्यस्य वचः सत्कृत्य वर्तनं संप्रति आबभाषे ॥१॥ तत्र तावद्दंगीकार

श्रीशुक उ० ॥ स एवमाशंसित उद्धवेन भागवतमुख्येन दाशार्हमुख्यः ॥ सभाजयन्भृत्यवचो मुकुंदस्त
माबभाषे श्रवणीयवीर्यः ॥१॥ श्रीभगवानुवाच ॥ बार्हस्पत्य स नास्त्यत्र साधुर्वै दुर्जनेरितैः ॥ दुरुक्तै
र्भिन्नमात्मानं यः समाधातुमीश्वरः ॥२॥ न तथा तप्यते विद्धः पुमान्बाणैर्हि मर्मगैः ॥ यथा तुदंति मर्म
स्था ह्यसतां पुरुषेषवः ॥३॥ कथयंति महत्पुण्यमितिहासमिहोद्धव ॥ तमहं वर्णयिष्यामि निबोध
सुसमाहितः ॥४॥ केनचिद्भिक्षुणा गीतं परिभूतेन दुर्जनैः ॥ स्मरता धृतियुक्तेन विपाकं निजकर्मणां ॥५

स्तद्वचः संभ्रजयति द्वाभ्यां बार्हस्पत्य बृहस्पतेः शिष्य प्रत्र लोके सत्साधुर्नास्ति यद्दुर्जनोक्तैर्भिन्नं स्वमितं मनो भ्रा
मयितुमीश्वरः स्यात् ॥२॥ ननु तद्यातनाहनेति यथा मर्मस्थास्तैर्बाणैर्विद्धास्तिष्ठन्ति नाः पुरुषेषु रूपा ख्व वस्तु
दे ति व्यथयंति तथा दूतरे बाणा न तुदन्ति अतस्तत्र व्यथा न तथा तत्र स्पर्धः ॥३॥ तथापि तैर्मर्यादत्वमात्रेण रूपायैः सा
र्वे सोढुं यावत्सम्यगभिप्रायेणोतिहासं प्रस्तौति महद्यथा भवति तथा पुण्यमितिहासं गायां कथयंति ॥४॥ १०८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सतत्मितः पूर्वधनायः कृच्छ्रार्जितमपानस्य नाशेन संतप्यमानो निर्विसस्तत्र बुद्धसमिता मदनत्तु जनोरु तुतः प्रसन्न
नो पयो गिनी वा धामसगाय तेनिवक्तं तस्य चरितमाहश्र वेतिक्षिप्रमादिना ॥ अवंतिषु मालदेषु वार्ताकृषिवाणिज्यादिहृ
पार्हत्तिर्यस्य कदर्यः स्त्वस्य तेनोवक्तं ॥ आत्मानं धर्मकर्मसं वपुत्रदारांश्च पीडयन् देवतातिथिभृत्यांश्च स कदर्य इतिस्मृतः
तस्यायेज्ञातयो बांधवाः अतिभवयोत्थनीनाश्रुतेन नार्चिताइत्यर्थः स्मृ यावमहोधर्मकर्महीनेनो हेदेहेवा ॥ ८ ॥

आवंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया ॥ वार्तावृत्तिः कदर्यस्तु कामी लुब्धोतिकोपनः ॥ ८ ॥ ज्ञातयो
तिथयस्तस्य वाङ्मात्रेणापि नार्चिताः ॥ शून्यावसथ आत्मापि काले कामैरनर्चितः ॥ ९ ॥ दुःशीलस्य कद
र्यस्य द्रुह्यंते पुत्रबांधवाः ॥ दारादुहितरो भृत्या विषण्णा नाचरन् प्रियं ॥ १० ॥ तस्यैवं यक्षवित्तस्य च्युतस्योभ
यलोकतः ॥ धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ॥ ११ ॥ तदवध्यानविस्रस्तपुण्यस्कंदस्य भूरिद
अर्थोप्यगच्छन्निधनं बह्वायासपरिश्रमः ॥ १२ ॥ ज्ञातयो जगृहुः किंचित् किंचिद्दस्यव उद्धव ॥ दैवतः का
लतः किंचिद्ब्रह्मबंधोर्नृपार्थिवान् ॥ १३ ॥ स एवं द्रविणे नष्टे धर्मकामविवर्जितः ॥ उपेक्षितश्च स्वजनैः
श्चिंतामाप दुरत्ययां ॥ १४ ॥ तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः ॥ खिद्यतो बाष्पकंठस्य निर्वेदः

यक्षाणां वित्तमेव केवलं रक्षणीयं वित्तं यस्य पंचभागिनः पंचयज्ञदेवताः ॥ १२ ॥ तेषामवध्यानमनादरः तेन वि
शीर्णः पुण्यस्य स्कंधः अर्थलाभमात्रहेतुर्वं धोयस्य तस्य बहुयासैः कृष्या वेभिः केवलं श्रमो यस्मिन्सः ॥ दैवतः
गृहदाहादिना कालतः निरवानतया न्यादिष्टानां पार्थिवानां चवहाको तस्मात् ॥ १३ ॥ नष्टरायः नष्टः रायोर्थोयि
स्य तस्य तेपस्विनः मतनमस्य ॥ १४ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री॰ भाग॰ टी॰ १०९

सेमया आत्मादेहः वृथैवाल्पानुतापेन प्रपंचं वृथाति न धर्मायेत्यादिना यस्येदृशो ऽर्थायासस्तेन मया ॥१४॥ नरकाय च स।
मप्यधिथ मनित्रुष्टानात ॥१५॥ श्वित्रः श्वेतकुष्ठ ॥१६॥ सिद्धेप्यर्थे तस्योत्कर्षे संवर्धने नाशोपभोगयोर्दुःखं नाशाउप
भोगे च दुःखमर्थ ॥ साधनोत्कर्षयोरायासः तत्र त्रासः चिंता च नाशाभ्रम इति ॥१७॥ किंच ॥ अर्थस्मात्मार्थाः स्तेयादयः
षड्नर्थाः प्राप्नोत्सम्यादेवो व्यसनैः सह नव व्यसनानि स्त्रीद्युतमद्यविषयाणि त्रीणि ॥१८॥ भेदवैरासर्थाः

स चाहेदं मह्लोकं वृथात्मा मेनुतापितः ॥ न धर्माय न कामाय यस्यार्थायास ईदृशः ॥१४॥ प्राये।
णार्थाः कदर्याणां न सुखाय कदाचन ॥ इह चात्मोपतापाय मृतस्य नरकाय च ॥१५॥ यशो यशस्वि
नां शुद्धं श्लाघ्या ये गुणिनां गुणाः ॥ लोभः स्वल्पोऽपि तान्हन्ति श्वित्रो रूपमिवेप्सितं ॥१६॥ अर्थस्य साधने।
सिद्धे उत्कर्षे रक्षणे व्यये ॥ नाशोपभोग आयासः त्रासः चिंता भ्रमो नृणां ॥१७॥ स्तेयं हिंसानृतं दंभः
कामः क्रोधः स्मयो मदः ॥ तस्मादनर्थमर्थाख्यं श्रेयोऽर्थी दूरतः त्यजेत् ॥१८॥ भेदो वैरमविश्वासः
संस्पर्धा व्यसनानि च ॥ एते पंचदशानर्था ह्यर्थमूला मता नृणां ॥१९॥ भिद्यंते भ्रातरो दाराः पितरः
सुहृदस्तथा ॥ एकास्निग्धाः काकिणिना सद्यः सर्वेऽरयः कृताः ॥२०॥

प्रपंचयति द्वाभ्यां भिद्यंते स्नेहं त्यजंति कथंभूताः एकप्राणाः स्नेहेन ते च अस्निग्धाः अतिप्रियाश्च सर्वे। अतः
काकिणिना अल्पस्य मार्धविंशतिवराटिकाः काकिणी तया ॥२०॥ ॥ॐ नंद गोपालाय
नमो नमः ॥ ॥ ॐ नमः श्रीरामचंद्रा
य नमः ॥ ॥ राम

१०९

220

संरब्धाः क्षुभिताः स्पृधः स्पर्धमानाः ॥२१॥ इह तावदर्थनिष्ठानामेतेनर्थः परलोकेप्यनर्थ एव तेषामित्याह ॥ लब्ध्वेति त्रि
भिः मानुष्यं जन्म तत्र ॥ तत्रापि द्विजाग्र्यतां स्वर्णायं स्वार्थं घ्नंति आत्मानं हि तेन कुर्वंति ये ते यांति ॥२२॥ अमरप्रार्थ्यतां
दर्शयन्नाह ॥ स्वर्गेति लोके देहं अनुषजते ॥२३॥ आसक्तं कुर्यात ॥२३॥ अथयोग्यतु पयस्तव स्वयत्नयोर्देवताः दे
वपितृभूतानीतरेषु ज्ञातयः सगोत्राः बंधवो विवाहादिना संबंधाः तान् अन्यांश्च भागिनः भागार्हान् ॥ आत्मानं च
असंविभज्य ॥ अन्नादिभिरसंतर्प्य ॥२४॥ एवं विसृष्टस्यानुतप्यमानस्याह व्यर्थयेति प्रमत्तस्य मदचिन्तादिग

अर्थेनाल्पीयसा ह्येते संरब्धाः दीप्तमन्यवः ॥ त्यजंत्याशु स्पृधो घ्नंति सुहृदोऽपि च सौहृदं ॥२१॥ लब्ध्वा जन्माम
रप्रार्थ्यं मानुष्यं तद्द्विजाग्र्यतां ॥ तदनादृत्य ये स्वार्थं घ्नंति यांत्यशुभां गतिं ॥२२॥ स्वर्गापवर्गयोर्द्वारं प्राप्य
लोकमिमं पुमान् ॥ द्रविणे कोऽनुषज्जेत मर्त्योऽनर्थस्य धामनि ॥२३॥ देवर्षिपितृभूतानि ज्ञातीन्बंधूंश्च
भागिनः ॥ असंविभज्य चात्मानं यक्षवित्तः पतत्यधः ॥२४॥ व्यर्थयार्थेहया वित्तं प्रमत्तस्य वयो बलं ॥ कु
शला येन सिध्यंति जरठः किं नु साधये ॥२५॥ कस्मात्संक्लिश्यते विद्वान्व्यर्थयार्थेहयासकृत् ॥ क
स्यचिन्मायया नूनं लोकोऽयं सुविमोहितः ॥२६॥ किं धनैर्धनदैर्वा किं कामैर्वा कामदैरुत ॥ मृत्युना ग्र
स्यमानस्य कर्मभिर्वोत जन्मदैः ॥२७॥ नूनं मे भगवांस्तुष्टः सर्वदेवमयो हरिः ॥ येन नीतो दशामेतां निर्वे
दश्चात्मनः प्लवः ॥२८॥ ॥

तानि इति शेषः येन वित्तादिना कुशलाः विवेकिनः सिध्यंति मुक्तं जरठो वृद्धः ॥२५॥ असकृदपि स्वसदृष्टांशोच
ति कस्मादेवमर्थं विद्वानपि संक्लिश्यति कारणं संभावयति कस्यचिदिति ॥२६॥ ननु नायं मोहितः क्लिश्यति किं
तु यत्नादिभिर्योगादिविधित्सया अत आह किं धनैरिति ॥ उत पुनरपि ॥२७॥ इदानीं संपन्नविवेकः संतुष्यन्नाह
नूनमिति त्रिभिः येन प्रापितो मया मनः ॥ सर्वद्रूपेति निर्वेदश्च भवति स हरिर्मे न तं प्रीत इति ॥२८॥ ॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अंगं शोषयिष्येतत्परसायद्वाविषयालयं नेष्यामि यदि सांकलावशेषः न यास्येवमिदं तस्मः सन् अखिले स्वार्थय
मादि साधयेन अप्रमत्तः सन् ॥ १५ ॥ अनमोदेवन्नू अनगृह्णांतन त्वं देवैर्बंधुमोदितो पि जरठः स्वल्पेन काले किं साध
यिष्यति न चाहं ब्रह्मेणेति ॥ १७ ॥ अभिप्रेतनिश्चिमस्त्वावेमः अवतिदेषामवा ॥ हृदयग्रंथीनहंकार ममप्रकारा

मोहं कालावशेषेण शोषयिष्येंगमात्मनः ॥ अप्रमत्तोखिलस्वार्थे यदि स्यात्सिद्धआत्मनि ॥ १९ ॥ तत्रमा
मत्त्रमोदेरन्देवास्त्रिभुवनेश्वराः ॥ मुहूर्तेन ब्रह्मलोकं खट्वांगः समसाधयत् ॥ २० ॥ श्री भगवानुवाच
इत्यभिप्रेत्य मनसा ह्यावंत्यो द्विजसत्तमः उन्मुच्य हृदयग्रंथीन् शांतो भिक्षुरभून्मुनिः ॥ २१ ॥ स चचार
महीमेतां संयतात्मेंद्रियानिलः ॥ भिक्षार्थं नगरग्रामान् संगोलक्षितो विशत् ॥ २२ ॥ तं वै प्रवयसं भिक्षु
मवधूतमसज्जनाः ॥ दृष्ट्वा पर्यभवन्भद्र बह्वीभिः परिभूतिभिः ॥ २३ ॥ केचित्त्रिवेणुं जगृहुरेके पा
त्रं कमंडलुं ॥ पीठं चैकेक्षसूत्रं च कंथां चीराणि केचन ॥ २४ ॥ प्रदाय च पुनस्तानि दर्शितान्याददुर्मुनेः
अन्नं च भैक्षसंपन्नं भुंजिनोस्य सरित्तटे ॥ २५ ॥ ॥

न् ॥ ३१ ॥ असंगाद्यासक्तिभूयः अलक्षितः शेषमयोतयन ॥ ३२ ॥ प्रवयसं हृष्ट्वा अवधूतं सलिलं पर्यभव
न ॥ अवमेनिदेहे भद्रपरिभूतिभिः तिरस्कारैः परिभवानेव दर्शयति समति ॥ ३३ ॥ भोगो भवन गृह्णाणाति
दर्शितानि संति प्रदाय पुनस्त्वाददुः ॥ ३४ ॥ ॥
॥ राम ॥ राम ॥ ॥ ॥ ॥

222

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ग्रसेयुश्चयंति स्पर्धंति चक्षीवयंति प्रमत्कारेण श्लेष्माणां ग्रहयंति ॥ ४८॥ त्रियंति निंदंति निंदामेवाहुरेषधर्मध्वजः त्रिदं
डलिंगोएनजीवी शाठोलोकवंचकः तदेवाहुः लीलाविनडंति ॥ ४८॥ महासाधवः ऋतिवलीः ॥ ४९॥ द्रुवंति यंति नद्रुप
र्ये योवाग्रं सं चति ॥ बवयुः पृष्टे लैः निरुरुयुः कारागृहादिश्ववित्रिजंप्रकशाविकादिकं यथा ॥ ५०॥ मोतिकदु

शि

मूत्रयंति च पापिष्ठाः ष्ठीवयंति च मूर्धनि ॥ यतवा यं बाधयंति ताडयंति नवक्ति चेत् ॥ ३९॥ तर्जयं
ति परे वाग्भिः स्तेनोयमिति वादिनः ॥ बध्नंति रज्ज्वा तंके चिद्रुध्यतां वध्यतामिति ॥ ४०॥ तिर्यंमेकेवज्ञा
नं नेपएषधर्मध्वजः शठः ॥ लीलाविनडमोहत्ति संगृहे लब्धजनोज्झितः ॥ ४१॥ अहो एष महा सारो धृ
२ ति मांसि गिरा इव ॥ मौनेन साधयत्यर्थं बकवद्दृढनिश्चयः ॥ ४२॥ इत्येके विहसंत्येनमेके दुर्वातय
ति च ॥ तं बध्नंति निरुरुधुर्यथा क्रीडनकं द्विजं ॥ ४३॥ एवं सत्त्वौ तिकं दुःखं दैविकं दैहिकं च यत्
भोक्तव्यमात्मनो दिष्टं प्राप्तं प्राप्तमबुध्यत ॥ ४४॥ परिभूत इमां गाथामगायत नराधमैः ॥ पातयद्भिः स्वध
र्मस्थो धृतिमास्थाय सात्त्विकीं ॥ ४५॥ ॥

ती भा॰११

र्जनादिकृतं दैहिकं ज्वरादिनिमित्तं दैविकं घूर्णितोन्मादिप्रभवं दिष्टं दैवप्राप्तं ॥ ४४॥ धर्मात्पातयद्भिः परिभूतो
पि सात्त्विकीं धृतिमास्थाय ॥ स्वधर्मस्थः स्थितः इमां वक्ष्यमाणां गाथामगायत ॥ सात्त्विकी धृतिश्च ॥ धृत्या
यया धारयते मनः प्राणेंद्रियक्रियाः ॥ योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकीति स्मृतेः ॥ ४५॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भाग. टी. ११

तामेवाष्टादशश्लोकीं गाथामाह नायमिति जनः पृथिव्यादिभूतानि देवता इंद्रियादिदेवता आत्मा देहः ग्रहा आदित्यादयः कर्म पुण्यपा-
कालास्त्रैते मे सुखदुःखहेतवो न भवंति॥ नाप्यात्मा नापि ग्रहादयः मनः परं केवलं सुखदुःखयोः कारणं वदंति मना-
सो स्वरूपं पश्यति मनसा शृणोति इत्यादि श्रुतयः॥४३॥ परिवर्तनप्रकारमेवाह मन इत्यादि॥ गुणान् गुणवृत्तीः सृजति।
ततश्च तेभ्यो गुणेभ्यः शुक्लानि सात्त्विकानि कृष्णानि तामसानि लोहितानि राजसानि विसवर्णाः सत्त्वकर्मानुरूपाः सृ-
तयो देवतिर्यङ्नरादिगतयः॥४४॥ तर्हि मन एव संसारः स्यात् आत्मनः किं स्यादत आह॥ अनीहमिति निश्चेष्टः

भिक्षुरुवाच॥ नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः॥ मनः परं कारणमामनंति संसारच-
क्रं परिवर्तयेद्यत्॥४३॥ मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्षणानि॥ शुक्लानि कृ-
ष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवंति॥४४॥ अनीह आत्मा मनसा समीहता हिरण्मयो
मत्सख उद्विचष्टे॥ मनः स्वलिंगं परिगृह्य कामान्जुषन्निबद्धो गुणसंगतोसौ॥४५॥ ॥ राम ॥

अविद्यया मनोध्यासेन द्रष्टुरात्मनः संसृतिर्न तु स्वतः यतस्तद्द्रष्टृतस्य स्वरूपस्य सा नास्ति॥ किंतु द्रष्टृतो जीवस्ये-
वेति तदेवाह मनसा समीहमानेन सह हि निर्येत तेन वर्तमानोपि परमात्मा अनीहः तत्क्रियासंगरहितः यतो
हिरण्मयः विद्याशक्तिप्रधानः उक्तः यतो मत्सखः मम जीवस्य सखा नियंता अतः ततः॥ उच्चैर्विचष्टे प्रतिबोधितं
ज्ञानेन केवलं पश्यतीत्यर्थः॥ असौ पुनरहं जीवः स्वलिंगं सलिंगमात्मनिर्लिंगाय तिष्ठो नयति संसारमिति तया
तन्मनः परिगृह्य आत्मत्वेन कृत्वा तस्य मनसो गुणोः कर्मभिः संतानैः संबद्धः गुणसंगात् कामान्जुषन्निबद्धः।

हरि
८
२२२

224

अतो मनोनिग्रहे कृते सर्वं कृतं स्यात् तं विना तु सर्वं व्यर्थमित्याह दानमिति द्वाभ्यां स्वधर्मो नित्यनैमित्तिकः सद्व्रतान्येका
दश्युपवासादीनि ॥ अस्मान्नियमा वेति कर्माणि एते सर्वेऽपि येषां मनोनिग्रहलक्षणान्ताः ॥ अतो निष्ठाफलं येषां ते तथा ननु
ज्ञानं गतं तेषामसिद्धिं नेत्याह ॥ मनसः समाधिर्निग्रह एव संयत इति विदितमेवैतद्यदा विनश्यत् ॥ चलत्स्यादिना लीयमा
नं च भवेत्तर्हि ॥ एभिर्दानादिभिः किमपरं प्रयोजनं स्यात् ॥ नेत्याह ॥ मनोवशा इति देवा इन्द्रियाणि तदधिष्ठातारो वा
ऽन्ये एव परो योगो मतस्ताने ॥४५॥ अतो यस्य मनः समाहितं भवति तस्य किं कृत्यमस्ति नैवेति यदि स्यात्पदि प्राप्तं तु स्वधर्ममेवास्तु:

दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि ॥ सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मन
सः समाधिः ॥४५॥ समाहितं यस्य मनः प्रशान्तं दानादिभिः किं वद तस्य कृत्यं ॥ असंयतं यस्य मनो विन
श्यद्दानादिभिश्चेदपरं किमेभिः ॥४६॥ मनोवशेऽन्ये ह्यभवन्स्म देवा मनश्च नान्यस्य वशं समेति ॥ भीष्मो
हि देवः सहसः सहीयान्युञ्ज्याद्वशे तं स हि देवदेवः ॥४७॥ तं दुर्जयं शत्रुमसह्यवेगमरुन्तुदं तन्न वि
जित्य केचित् ॥ कुर्वन्त्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ॥४८॥

भीष्मः योगिनामपि भयंकरो मनोलक्षणो देवः । अतः सहसः बलादपि बलिनोऽपि वा सहीयान् बलीयान् ॥ अ
तस्तं यो वशीकरोति नेऊ यात्स एव देवदेवः सर्वेन्द्रियजेता भवति नान्यः तथा च श्रुतिः ॥ मनसो वशे सर्वमिदं बभू
व नान्यस्य मनो वशमन्वियाय भीष्मो हि देवः सहसः सहीयानिति ॥४८॥ अतस्त्वसह्यवेगादयो वेगा यस्य तं ॥ अरु
न्तुदं मर्ममर्मतुदं अतिव्यथयतीत्यरुन्तुदः तं तन्न ॥ नेति छेदः तं न विजित्य अजित्वा ततः ये केचिन्म
र्त्यैः ॥ केचिदसद्विग्रहं ॥ कुर्वन्ति न वात्र कुलादीन् ॥ अन्यान्मित्रादीन् ॥ कुर्वन्ती मूढा इत्यर्थः ॥ ४९ ॥ ॥

225

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग-
टी.
११२

ततश्च तेन प्रकारेण संसारीभ्रमं तीर्त्वाहं देहमिति मनोमात्रपरिकल्पितमिमं स्वदेहमिति पुत्रादिदेहं च स्वसेति स्वी
कृत्य तमसि संसारे ॥५०॥ तदेवं मनस एव सुखदुःखकारणत्वमुपपाद्येदानीं जनादीनां तस्याकारणत्वं प्रपंचय
ति ॥ जनस्त्विति षड्भिः अत्रास्मात्मनो किं न किंचित्सुखदुःखकर्मकर्तृत्वेनैवमर्पितः ॥ अत इमाह निश्चितमौनमयो भूवि।
कारयोर्देहयोः सतः ॥ न त्वात्मन आत्मस्वरूपस्याक्रियस्य च देहनादि प्रकर्मत्वकर्तृत्वानुपपत्तेः ॥ तथापि दुःखमपर्य

226

देहं मनोमात्रमिमं गृहीत्वा ममाहमित्यंधधियो मनुष्याः ॥ एषोहमन
न्योयमिति भ्रमेण दुरंतपारे तमसि भ्रमंति ॥५१॥ जनस्तु हेतुः सुख
दुःखयोश्चेत्किमात्मनश्चात्र ह भौमयोस्तत् ॥ जिह्वां क्वचित्संदश
ति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत् ॥५२॥ दुःखस्य हेतुर्यदि दे
वतास्तु किमात्मनस्तत्र ॥ यदंगमंगेन निहन्यते क्व क्रुध्येत कस्मै पु
विकारयोस्तत् रुषः स्वदेहे ॥ ५३ ॥

वस्यात्मत्वे इति चेत्तत्र वरमपि परमात्मन उभयत्रापेक्षकत्वात् ॥ न कोपविषयोस्तीति स्वदृष्टांतेन दर्शयति जिह्वामिति ५१
यदि देवता अस्मदात्मतत्त्वापि पदे आत्मनः किं यतो विकारयोर्दैक्रिययोः साक्षात्संयोस्तत् ॥ हस्तेन मुखे भिहिते
तेनैव स्वदेहे तदभिमानेनोर्ध्वहस्तयोरेव ननु तन्निर्विक्रियस्यात्मनः कात्वस्य चात्मनः देवतानां सर्वदेहेष्वभे
दात्क्कोपविषयोस्तीति स्वदेहदृष्टांतेन समाह ॥ यदंगमिति ॥ देवताधिष्ठानेहस्तमुखादिः ॥ अत एव सर्वत्र देवतान १२
धिष्ठानस्य पुंसो विकारदतो दारुणः ॥ ५३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आत्मनः सुखदुःखाद्याकारपरिणामः आत्मस्य एव हेतुर्यदि स्यात्तत्र तस्मिन्नेते अमृतः किं न किंचिदन्यतो भवतीय
स्मै कुप्येदित्यर्थः यतो निज एव स्वभावः सः न त्वात्मनस्तथापरिणामोऽन्यनिमित्तनो भवति अतोऽस्ति कोपविषय इ
ति चेत्तत्राह ॥ नहीति ॥ आत्मवित्ति विकंनास्येव यदि स्यात् ॥ आत्मनीति प्रतीयेत न तर्हि तत्कस्यैव अतः कस्माद्धेतोः
कुप्येत यतो नास्ति निमित्तं न कस्य सुखदुःखं वेत्यर्थः ॥५३॥ अहयत्तेपज स्यात्मनः किं यतो जनो देहस्तस्यैव जन्म

आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजः स्वभावः ॥ न ह्यात्मनोऽन्य
द्यदि तन्मृषा स्यात्क्रुध्येत कस्मान्न सुखं न दुःखं ॥५४॥ ग्रहा निमित्तं सुखदुः
खयोश्चेत्किमात्मनोऽजस्य जनस्य ते वै ॥ ग्रहैर्ग्रहस्यैव वदंति पीडां क्रुध्येत क
स्मै पुरुषस्ततोऽन्यः ॥५५॥ ॥

लग्नापेक्षया द्वादशाष्टमादिराशिस्थानेषु ते सुखदुःखनिमित्तं भवंति किं अतो भवतस्यैः ग्रहैः तत्र स्थस्य ग्रह
स्यैव ॥ पादार्थी वि ॥ रूपादिभेदे ॥ पीडां वदंति ॥ देवज्ञाः न तु ग्रहकोणादिस्थितस्य न तु ष्टाशोवरस्य ग्रहग
तो वपीडाऽलग्नौ स्यात् देहे होनस्याभिमानाद्भवति ॥ अतः पुरुषस्ततो ग्रहात् देहाच्च ॥ अन्यः कस्मै कुप्येत ॥ ५४
ग्रामायलभ्यंतमः ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भा.ए.
टी.
११३

कर्महेतुश्चेत ॥ अस्त्विति अस्तूयोपगमः कर्मैव नास्तिकृतस्तस्य ॥ हेतुत्वमिति तदाह ॥ हि यस्मात् तत्कर्म एकस्य जडा।
जडत्वे सति स्यात ॥ जडत्वाद्विकोरापपत्तेः अजडत्वाच्च द्वितात्र संध्यानतः प्रवृत्तिसंभवात् अचित् जडो देहः अत
स्तस्य प्रवृत्तिर्न संभवति ॥ पुरुषस्तु सुपर्णः शुद्धज्ञानस्वरूपः ॥ अतः कस्मै क्रुध्येत यतः सुखदुःखयोर्मूलभू
तं कर्मैव नास्तीति ॥५५॥ नन्वकालएवदेपि आत्मनः किं यतोसौ कालात्म एव ब्रह्मांशत्वात ॥ स्वांशस्य स्वतः

कर्मास्तु हेतुः सुखदुःखयोर्वै किमात्मनस्तद्धि जडाजडत्वे ॥ देहस्त्वचित्पुरुषोयं
सुपर्णः क्रुध्येत कस्मै न हि कर्ममूलं ॥५५॥ कालस्तु हेतुः सुखदुःखयोश्चे।
त्किमात्मनस्तत्र तदात्मकोसौ ॥ नाग्ने हि तापो न हिमस्य तत्स्यात्क्रुध्येत कस्मै
न परस्य द्वंद्वम ॥५६॥ ॥

पीडा नास्तीत्यत्र दृष्टांतः ॥ नाग्नेर्हि तोस्तदंशस्य ज्वालादेस्तापो दाहतो सौ कोनाशोस्ति ॥ तथोपाधिभूतका।
ष्टांशदाहान्नाशः स्यादिति दृष्टांतारमाह हिमस्यात ॥ शैत्यं तदंशस्य तत्पारकणस्य नाशकं न स्यादित्यर्थः ॥
किं च आत्मा स्वांशत्वे वस्तुतः ॥ पर एवायं न च परस्य द्वंद्वं सुखदुःखादिकमस्तीत्याह ॥५६॥ ॥ ॥ रामजी ११२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तदेवंषडेतेहेतवःप्रसिद्धानिरस्ताः यदिकश्चिद्ब्रूयात्त्वंनवकुरावयेन्नदपिवस्तुमहिमायेतावनसंभवतीत्याह नकेनचिदि
तिनत्वपरोत्नः कथमपह्नूयमेतत्साहंयथोतिसंसृतिमविद्यमानामेवरूपयतिप्रकाशयतीतितथातस्याहमः॥
अहंकारस्ययथास्यातनतथापरतः प्रकृतेः परस्यात्मनोद्वंद्वसंबंधः अहंकारानिमित्तोसौनवास्तवइत्यर्थः एवं
प्रबुद्धोयःसंभूतैःकृतानबिभेति॥५७॥ अतोहमप्येतयैवपरमात्मनिष्ठयातरिष्यामीत्याह एतामिति मोहमित्य
न्वयः नन्वियंनिष्ठेवचकथमेवंतदाहमुकुंदेति॥५८॥ प्रकारांतरेणसहनगाथायाअर्थंसंक्षेपतोदर्शयतिद्वाभ्यामिति

नकेनचित्क्वापिकथंचनास्यद्वंद्वोपरामःपरतःपरस्य॥ यथाहमःसंसृतिरूपिणःस्यादेवंप्रबुद्धोनबि
भेतिभूतैः॥५७॥ एतांसआस्थायपरात्मनिष्ठामध्यासितांपूर्वतमैर्महर्षिभिः॥ अहंतरिष्यामिदुरंतपारं
तमोमुकुंदांघ्रिनिषेवयैव॥५८॥ श्रीभगवानुवाच॥ निर्विद्यनष्टद्रविणोगतक्लमःप्रव्रज्यगांपर्यटमान
इत्थं॥ निराकृतोसद्भिरपिस्वधर्मादकंपितोमूंमुनिराहगाथां॥५९॥ सुखदुःखप्रदोनान्यःपुरुषस्या
त्मविभ्रमः॥ मित्रोदासीनरिपवःसंसारस्तमसःकृतः॥६०॥ तस्मात्सर्वात्मनातातनिगृहाणमनोधिया
मय्यावेशितयायुक्तएतावान्योगसंग्रहः॥६१॥ यएतांभिक्षुणागीतांब्रह्मनिष्ठांसमाहितः॥ धारयेत
श्रावंद्वंद्वैःशृण्वन्नैवाभिभूयते॥६२॥ इतिश्रीभागवतेएकादशस्कंधेत्रविंशोध्यायः॥२३॥
यन्

नष्टद्रविणोनिर्विद्यगतक्लमः॥ प्रव्रज्यगांपर्यटन्नसद्भिर्निराकृतोपिस्वधर्मादकंपितःसन्मुनिरमूंगाथामगा
यतेत्यन्वयः॥५९॥ मित्रोदासीनरिपवः सर्वोपिसंसारः तमसः अज्ञानात॥ आत्मनोमनसोविभ्रममात्रः ततात्रि
कृतइत्यर्थः॥६०॥ उक्तंद्वंद्वसहनोपायमुपसंहरति॥ तस्मादिति॥६१॥ मनोनिगृहाणशक्त्योपायेनाहवर्णादि
निष्ठःतत्फलंप्राप्नोतीत्याह यएतामितिद्वंद्वैःसुखदुःखादिभिःभिक्षुगीतेतिभिक्षुकृत्वाभक्तंचित्तयानेहरिःसोहंनिष्ठ

॥५४॥

229

श्री भाग टी ५५

चतुर्विंशे तु सांख्येन मनोमोहो निवार्यते ॥ आत्मनः सर्वभावानां आत्मतामापाद्य चिंतया ॥ स्वपदं हृद्भक्तानामद्वंद्वत्वा
यु संशयः ॥ विनष्टचाक्षुवतः कृत्स्नः संख्यामत आह तत्कृते ॥ १ ॥ अद्वितीयात्मस्वरूपात्मनो मायाप्रकृतिपुरुषद्वारा स-
र्वं हेतृत्पादितं पुनस्तत्रैव लीयत इत्यनुसंदधानस्य द्वैतभ्रमो निवर्तते इति वक्तुं सांख्यं प्रस्तौति अथेति पूर्वैः कपि-
लादिभिर्विनिश्चितं वैकल्पिकं भेदनिमित्तं भ्रमं सुखदुःखादिरूपं ॥ १ ॥ अथो प्रलये ज्ञाने द्रष्टरि तेन दृश्यः कृ-
त्स्नोप्यर्थः अविकल्पितो निर्विकल्पस्तं एकमेव ब्रह्माप्येव लीनमासीदित्यर्थः ॥ कदेत्यपेक्षायामाह ॥ अप्रयुगे युगे

श्रीभगवानुवाच ॥ अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितं ॥ यद्विज्ञाय पुमान्सद्यो जह्याद्वैकल्पिकं भ्रमं ॥ १
आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितं ॥ यदा विवेकनिपुणा आदौ कृतयुगे युगे ॥ २ ॥ तन्मायाफलरू-
पेण केवलं निर्विकल्पितं ॥ वाङ्मनोगोचरं सत्यं द्विधा समभवद्बृहत् ॥ ३ ॥ तयोरेकतरो ह्यर्थः प्रकृतिः
सोभयात्मिका ॥ ज्ञानं त्वन्यतमो भावः पुरुषः सोभिधीयते ॥ ४ ॥ तमो रजः सत्त्वमिति प्रकृतेरभवन्-
गुणाः ॥ मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च ॥ ५ ॥

भवः सर्वं प्रलयस्य स्वरूपः ॥ तथा आदौ यत्कृतयुगं तस्मिंश्च अन्यदापि यदा विवेकनिपुणा जना भवंति तदापि ने-
यं भेदास्फूर्तिः ॥ २ ॥ तद्बृहद्ब्रह्म वाङ्मनोगोचरं यथा भवति तथा नायाहृश्ये फलं तस्य कार्यास्तद्रूपेण मा-
या विलासरूपेण च द्विधाभूत ॥ ३ ॥ तयोर्द्विधाभूतयोर्मध्ये उभयात्मिका कार्यकारणरूपिणी अभवत् ॥ अ-
भिव्यक्ताव भूव ॥ ४ ॥ मया परमेश्वरेण जीवादृष्टप्रयुक्तत्वात् ॥ स्वहेतुः पुरुषानुमतत्वे ॥ यद्वा स्वस्यैव प्रकृ-
तिः ईक्षणाद्रूपायाः पुरुषानुमतेन तटस्थेनेत्यर्थः ॥ ५ ॥ ॥ राम

११५

सूत्रं क्रियाशक्तिमानस्य क्षोभो विकारः ततो महान् ज्ञानशक्तिः॥ तन्त्र्यं महानेव अस्य क्षोभो विकारः प्रसिद्धः॥ तत्राह॥ सच
ज्ञानक्रियात्माभिन्नात्मत्वेन संवृतः न तु पृथगेकमेव तत्त्वं क्रियाज्ञानशक्तिभ्यां द्वेधोच्यते इत्यर्थः विमोहनः जीवस्य
भ्रमहेतुः संजातः॥२४॥ यतस्तन्मात्रादीनां कारणं मनः श्राहे न देवानामधुलतानां विद चिन्मयः॥ चिदाभासव्या
प्तत्वात् भयं प्रविशत्येव इति जीवोपाधित्वं दर्शितं तेषु प्रतिप्रितस्मात्त्वात् एतस्मात्तामसः आकाशः संभूत इत्यादिश्रुतेः
सूत्रमयं सोम्य मन इत्यादिश्रुतेस्तस्य प्रथमं भूतानि जायन्ते तेभ्यः वायवीज्ञेः तेभ्यः प्राणादिक्रमेण समस्तानि क 231

जाते

तेभ्यः समभवन्तत्त्वं महात्मत्वेन संवृतः॥ ततो विकुर्वतो यस्मिन्नहंकारो विमो
हनः॥२५॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत्॥ तस्मादैन्द्रियम
नसां कारणं चिद चिन्मयः॥२६॥ ॥ॐ रामाय नमः॥ ॥ ॐ ॥ ॥

लिंगशरीरं पंचीकृतेभ्यस्तु ब्रह्माण्डं तस्मिन्वैराजस्तदंतर्यामी लीलाविग्रहः॥ लीलाविशायी श्रीनारा
यणः तन्नाभिपद्मे च वैराजस्य भोगार्थविग्रहः॥ स्वतनुरानतः ततोऽयथावसरमन्येषां जीवानामाविर्भा
व इति प्रक्रिया तथापि चिन्नाभिव्यक्ति पूर्वकोऽहंकारस्ततो भूतेन्द्रियादिव्यवहारः इत्येतावता महदादिक्रमेण
सृष्टिरुच्यते तथा चोक्तं सलोहविस्फुलिंगायैः॥ सृष्टिर्या चोदितैर्यो तितान्यथा उपायः सोवतारायतास्ति
भेदः॥ कथं चेतति॥ २॥ राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तस्मात्त्रिविधात्त्रिविधो मत्त्रिं दर्शयति अर्थ इति तन्मात्रिकात् शब्दादितन्मात्रकारणात् नामसात्त्विकाद्राजसात्तामसात्महाभूतत
वाजतेवभूवभूतानामावरणस्वभावत्वात् इंद्रियाणि दश तेजसाद्राजसात्तेषां प्रवृत्तिस्वभावत्वात् वैकृतात्सा
त्त्विकाद्देवतादिरवानांकप्रवेनोत्थितस्त्री द्रोपेंद्रान्हस्मन्तकाः चंद्रश्चैमेकादश च धातृस्तस्य न स्व तेषां प्रकाश स्व
भावत्वात् ॥ ८ ॥ ममेव राज्ञो नयंति गुणाः ॥ ९ ॥ सलिले संस्थिते निर्यस्य तन्मलिले स्थितिः तस्मिन्सलिले संस्थिता

अर्थस्तन्मात्रिकाज्जज्ञे तामसादिंद्रियाणि च ॥ तैजसाद्देवता आसन्नेकादश च वैकृतात् ॥ ८ ॥ मया संचोदिता
भावाः सर्वे संहत्यकारिणः ॥ अंडमुत्पादयामासुर्ममायतनमुत्तमं ॥ ९ ॥ तस्मिन्नहं समभवमंडे स
लिलसंस्थितौ ॥ मम नाभ्यामभूत्पद्मं विश्वाख्यं तत्र चात्मभूः ॥ १० ॥ सोसृजत्तपसा युक्तो रज
सा मदनुग्रहात् ॥ लोकान्सपालान्विश्वात्मा भूर्भुवः स्वरिति त्रिधा ॥ ११
देवानामोक आसीत्स्वर्भूतानां च भुवः पदं ॥ मर्त्यादीनां च भूर्लोकः सिद्धानां त्रितय
यात्परं ॥ १२ ॥ अधोसुराणां नागानां भूमेरोकोसृजत्प्रभुः ॥ १२ ॥ नार

नार

वंदे श्रीनारायणरूपं लीलाविग्रहेण सम्यक् स्थित इत्यर्थः ॥ विश्वाख्यं लोककारणभूतं तत्र चात्मभूर्ब्रह्मा।
तनरूप योगविग्रहेण पुनर्जज्ञे राजएवतस्मिन्नाविर्भूत इत्यर्थः ॥ १० ॥ रजसा युक्तो मदनुग्रहात्तपसा सृजत्सभूः
अतलादिसहितो भुवः अंतरिक्षलोकः स्वः स्वर्गः महर्लोकादेरप्युपलक्षणं ॥ ११ ॥ लोकसृष्टिप्रयोजनमाह दे
वानामिति साद्धेनओको निवासः पदं स्थानं त्रितयात्परं महर्लोकादिसृमेरधस्तलादि ॥ १२ ॥ ॥ ॥ ११५

सूत्रं क्रियाशक्तिमात्रः प्रथमो विकारः ततो महान् ज्ञानशक्तिः न तु यं महानेव प्रथमो विकारः प्रसिद्धः ॥ तत्राह ॥ सर्ववेत्ता न क्रियागर्भत्वात् सूत्रेण संग्रहः न पृथगुक्तः सूत्रं तन्मे क्रियाज्ञानशक्तिभ्यां द्वेधाभ्युपेत्यैव ॥ विमोहनः जीवस्य भ्रमनक्रिया
एवं विवस्य अयं कारणमात्रः ॥ स्वार्थेन त्रिलोक्याः पातालादि सहितायाः योगादिनां तत्स्थेन तपसा तत्र महर्लोकादयः
मद्गतिर्वैकुण्ठलोकः ॥१४॥ तत्र तत्र मद्भक्तिव्यतिरेकेण गतागतं नत्वस्वबलाद् इत्याह द्वे वारयार्थं मया कालशक्तिना
यात्रापरमेश्वरेण कर्मफलं प्रदेन हेतुभूतेन गुणप्रवाहे संसारे उन्मज्जति आसत्यलोकं सुन्मायागतीः प्राप्नोति।

त्रिलोक्यां गतयः सर्वाः कर्मणां त्रिगुणात्मनां ॥ योगस्य तपसश्चैव न्यासस्य गतयोऽमलाः ॥ महर्जन
स्तपः सत्यं भक्तियोगस्य मद्गतिः ॥१४॥ मया कालात्मना धात्रा कर्मयुक्तमिदं जगत् ॥ गुणप्रवाह ए
तस्मिन्नुन्मज्जति निमज्जति ॥१५॥ अणुर्बृहत्कृशः स्थूलो यो यो भावः प्रसिध्यति ॥ सर्वोऽप्युभयसंयु
क्तः प्रकृत्या पुरुषेण च ॥१६॥ यस्तु यस्यादिरन्तश्च स वै मध्यं च तस्य सन् ॥ विकारो व्यवहारार्थो यथा
तैजसपार्थिवाः ॥१७॥ ॥

पुनर्निमज्जति आस्थावरं नीचा गतीः प्राप्नोति ॥१५॥ सृष्टिनिरूपणस्याद्वितीयात्मप्रतिपत्त्यर्थत्वात् तत्प्रतिपा
दनाय कारणं कार्यस्याव्याप्तिमाह ॥ अणुरिति उभयेन संयुक्तो भावः तदेवाह ॥ प्रकृतेति ॥१६॥ इदानीं कार्य
स्य कारणात्मत्वं दर्शयति यस्य कार्यस्य आदिः कारणं अन्तः लयस्थानं च तस्य मध्यं मध्यावस्थायि स एव प्रसि
द्धं स्तम्भवर्णादिषु अत एवापेक्षिकत्वात् स एव सत्येतरः अलं न हि मिथ्याभूतकार्यस्य दृष्टान्तमाह विकार इ
ति तैजसाः कटककुण्डलादयः पार्थिवाः घटशरावादयश्च यथेति ॥१७॥ ॥ ॐ श्रीगणेशाय नमः ॥

233

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री०
भाग०
टी०
११९

नन्वेवं तर्हि स्वकार्यं प्रति महदादीनामप्याद्यंतद्रूपत्वात् ॥ सत्यत्वं स्यान्नेत्याह यदिति यद्रूपमुपादाय उपादानकारण।
तया स्वीकृत्य पूर्वः कारणरूपो महदादिर्भावः परं ग्रहंकारादिकं भावं विकुरुते सृजति यथा पिंडो मृद्रूपमुपादाय
स्वयं निमित्तभूतो घटं सृजति तद्वस्त्वेव सत्यमिति पूर्वेणान्वयः कथं तर्हि सत्रिकेष्वेव सत्यमित्यादिष्कृति तत्राह
आदिरिति यद्यदाद्यस्यादिरंतश्च विवर्तते तत्सत्यमभिधीयते अन्यत्परमकारणस्यात्मनः सत्यविवक्षितत्वमपर्यः १२
नतु घटादिरूपविकारस्य प्रकृतिमहापुरुषकालानामकार्यभूतानामभिन्नत्वात् कथमद्वितीयतेत्यत आह प्र
कृतिरिति अस्य मनःकार्यस्योपादानं या प्रकृतिः प्रसिद्धा यस्य तस्याः आधारः पुरुषः यस्य गुणक्षोभेण सि-

यदुपादाय पूर्वस्तु भावो विकुरुते परं ॥ आदिरंतो यदा यस्य तत्सत्यमभिधीयते ॥१७॥ प्रकृतिर्ह्यस्यो
पादानमाधारः पुरुषः परः ॥ सतोभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहं ॥१८॥ सर्गः प्रवर्तते तावत्पौ-
र्वापर्येण नित्यशः ॥ महान्गुणविसर्गार्थः स्थित्यंतो यावदीक्षणं ॥१९॥ ॥ ॐ नारायणनमः ॥

व्यंजकः कालः तत्त्रितयं ब्रह्माहमहमेवं न त्वष्टधा कृत्यस्य प्रकृतेः शक्तित्वात् पुरुषकालयोरेव स्वरूपत्वात् १८
एवं तावत्कालत्रयेऽप्यभिन्नत्वात् ब्रह्मैव सत्यमिति वक्तुं तस्य सृष्टिकारणत्वेनादौ सत्यमुक्तं समध्येपित
सैव सत्यत्वमुपपाद्यते वर्षयितेन सत्यत्वं दर्शयित्वानु सर्गप्रवाह ॥ तु पायाः स्थितेरवधिमाह सर्ग इति
महाप्रबलः पौर्वापर्येण पितृपुत्रादिरूपेण नित्यशः अविच्छेदेन किमर्थं प्रवर्तते तदाह गुणप्रदेदेत्रुवि
वियत्नया सृज्यते ॥ इति गुणविसर्गो जीवः तदर्थं ॥ तद्भोगप्रयोजनः किंपर्यंतं प्रवर्तते यावत्स्थितेरंतः सो
पि किमवधि तदाह ॥ यावदीक्षणं परमेश्वरस्य तावन्नप्रलयं निरूपयति ॥१९ ११९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रलयं चेति रूपयति विराट्ब्रह्माण्डमयाकाशात्मनात्मा साधु सनः ख्यात्मानः लोकानां महदहं कल्पसृष्टिप्रलयावि
विधाः कल्प्यते यस्मिन् तान् स्वस्मिन् विकल्पयतीति तथाभूतोपि पंचतत्त्वरूपाय विशेषाय विभागाय कल्पते योग्यो
भवति पंचानां भूतानां स्वेकारूपः तेषां पृथक्भावाय पंचत्वाय न ग्रप्तीत्यर्थः ॥२०॥ तत्र तस्माद्वा एतस्मादात्मन आ
काशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ॥ ओषधीभ्योन्नं अन्नात्पुरुष 235
इति श्रुत्युक्तसृष्टिक्रमः प्रातिलोम्येन प्रलयमाह अन्नं इतिनर्थ शरीरे योनौ पचितं तस्मिन्नेव शांत वर्षा यामन्ना

विराण्मयासाद्यमानो लोककल्पविकल्पकः ॥ पंचत्वाय विशेषाय कल्पते भुवनैः सह ॥२१॥ अन्नं प्र
लीयते मर्त्यमन्नं धानासु लीयते ॥ धाना भूमौ प्रलीयंते भूमिर्गंधे प्रलीयते ॥२२॥ अप्सु प्रलीयते गंधः आ
पश्च स्वगुणे रसे ॥ लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते ॥२३॥ रूपं वायौ स च स्पर्शे लीयते सोपि चां
बरे ॥२४॥

दृष्टौ लीनो सति नैव लीयत इत्यर्थः ॥ अन्नं धानासु बीजमात्रावशेषं भवतीत्यर्थः धाना भूमावुप्तमाना प्ररोहंती ॥
त्यर्थः ॥ भूमिर्गंधे संवर्तकादित्यशोषितां संकर्षणमुखाग्निना दग्धा च सती भूतसूक्ष्मरूपगंधमात्रावशेषा भ
वति ॥ ततो ॥२३॥ अप्सु गंधः शांतवर्षया वृष्ट्या प्लाव्यमानो भूलीयत एवमेवापश्च ज्योतिषा शोष्यमाणा रस
मात्रावशेषा भवंति ॥ ततो रसोपि तस्मिंल्लीयते ॥२४॥ ज्योतिश्च वायुनाभिभूयमानं सत् तस्मिंल्लीयते वायुश्च
कालप्रेरितेनांबरेण ग्रस्तः स्पर्शमात्रः संस्तस्मिन्नंबरं भूतादिनाहंकारेण ग्रस्यमानं शब्दतन्मात्रेण देव ॥२४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग.
टी.
११

तामससाहंकारकार्यस्य शब्दपर्यंतं लयमुक्त्वा राजससाहंकारकार्यस्याप्याह ॥ इंद्रियाणां स्वयोनिष्विति सप्रवर्तकदे-
वतास्तेषां प्रवृत्तिस्वभावत्वात् प्रवृत्तेश्च देवताधीनत्वान्नासलय इति वाचोयुक्तिः वस्तुतस्तु स्वकारणे राजसाहं-
कारे लयोभिप्रेतः ॥ २३ ॥ योनिरित्युद्देश्यवाचकत्वादेकत्वमविवक्षितं योनयो देवतास्ता मनसि ऊत ईश्वरे नियंतरि म-
नो वशो यस्य भवतस्मिन्देवा इन्द्रियलयोक्त एवात्राप्यभिप्रायः ॥ मनस्तु देवताभिः सह वैकारिके अहंका-
रे इत्यर्थः तामससाहंकारकार्यविशेषस्य शब्दस्य शब्दभूतादिनामसाहंकारेऽप्येतीति तस्मिंल्लीयत इत्यर्थः

अंबरं शब्दतन्मात्रं इंद्रियाणि स्वयोनिषु ॥ २३ ॥ योनिर्वैकारिके सौम्य लीयते मनसीश्वरे ॥ शब्दो भूतादि-
मप्येति भूतादिर्महति प्रभुः ॥ स लीयते महान्स्वेषु गुणेषु गुणवत्तमः ॥ तेऽव्यक्ते संप्रलीयंते तत्काले
लीयतेऽव्यये ॥ २४ ॥

भूतादिरित्युपलक्षणं त्रिविधोप्यहंकारो महति जडांशं विहाय ज्ञानक्रियाशक्तिमात्ररूपो भवति कथंभूतः
प्रभुः समर्थः सर्वजगन्मोहकत्वात् ॥ २४ ॥ स च महान्स्वकारणेषु गुणेषु ज्ञानक्रियाशक्तिमत्त्वात् गुणवत्त-
मः स्वाकारं विहाय गुणमात्ररूपो भवतीति तेऽव्यक्ते प्रकृतौ साम्यावस्थां गच्छंतीत्यर्थः ॥ तदव्यक्तं काले कालाधी-
नतां नैकीभूयावतिष्ठते स्वव्यये उपरतगुणे ॥ २५ ॥ राम ॥ १८२

236

मायामये मायाप्रवर्तके ज्ञाने मयि वा अन एव जीव इत्यतो जीवस्त्विमं महान्तं पुरुषं सूत्र्य भावः विश्व सृष्ट्या महान्तं पुरुषं सोप करणं नृपः कालो ह्यमीशो न स्त्रजयत्र्य अतो स्त्रदात्मनावतिष्ठते इति ।। तदुक्तं सदसत्सेकालं चवंते स्रज्जतीभ्या श्रयं प्रधान पुंभ्यां नरदेव सत्यकृदिति दशमे च ।। योयं कालस्तस्य तेव्यक्त बंधोः चेष्टामाहुः चेष्टते येन विश्वमिति मेषादि वर्तमानं तो महीशास्त्र वेशानं देसमथा मधयपेष इति ।। जीव आत्मनि प्रकृते लीन इति योग्यभावात् ।। परिशिष्टे न स्वरूपेण ।।

कालो मायामये जीवे जीव आत्मनि मय्यहं ।। आत्मा केवल आत्मस्थो विकल्पापायलक्षणः ।। २७ ।। एवमन्वीक्षमाणस्य कथं वैकल्पिको भ्रमः ।। मनसो हृदि तिष्ठेत व्योम्नीवार्कोदये तमः ।। २८ ।। एष सांख्यविधिः प्रोक्तः संशयग्रंथिभेदनः ।। प्रतिलोमानुलोमाभ्यां परावरदृशा मया ।। २९ ।। इति श्री भागवते एकादशस्कंधे भगवदुद्धवसंवादे चतुर्विंशोऽध्यायः ।। २४ ।।

वतिष्ठते ।। आत्मा तु आत्मस्य एव नास्य च लीयते यतः केवलो निरुपाधिः अत्र हेतुः विकल्पापायलक्षणः विश्वोत्पत्तिलयाभ्यां लक्ष्यते ।। अधिष्ठानत्वेनावस्थितेः न च तितिक्षा स्त ।। २७ ।। अस्य कथनस्य प्रस्तुतोपयोगमाह एव मिति मनसः कथं भेदत्विमिन्त्रो भ्रमः स्यात् सांख्यं श्रुत ।। ज्ञातो वा कथं हृदि तिष्ठेदिति ।। २८ ।। उपसंहरति एष इति ।। प्रमत्तमेव येनेदं दर्शितं तत्त्वमात्मनः सांख्यं प्रख्यानतस्तस्मै हरये गुरवे नमः ।। २९ ।। इति श्रीभा वार्थदीपिकायां एकादशस्कंधे चतुर्विंशोऽध्यायः ।। २४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भा॰ स्कं॰ ११८

पंचविंशे स्वनैर्गुण्यप्रतीत्यै निरूप्यते ॥ वित्तप्रभवसत्त्वादिगुणवृत्तिरनेकधा ॥ प्रकृतिपुरुषविवेकज्ञानवतो
पि यावत्स्वयं तत्र विशेषेण गुणत्रयवृत्तिजयो न स्यात् तावत्तद्यथा परमः अतस्तज्जयोपायमुक्त्वाथ नायगुणवृत्तीर्नि
रूपयति अध्यायाह गुणानामिति असंमिश्राणामिति सूर्यवर्तमानाः संमिश्राः न संमिश्राः असंमिश्राः तेषां विभक्तानां गुणानां मध्ये
ये येन गुणेन यथा यादृशो भवेत् ॥ तदिदं कथयतो मे निबोधेत्यर्थः ॥१॥ तत्र सत्त्ववृत्तीराह शम इति ईक्षा विवे
कः तपः स्वधर्मवर्तित्वं स्मृतिः पूर्वापरानुसंधानं ॥ तुष्टिर्यथालाभसंतोषः त्यागः व्ययशीलत्वं अस्पृहा वैरा

श्रीभगवानुवाच ॥ गुणानामसंमिश्राणां पुमान्येन यथा भवेत् ॥ तन्मे पुरुषवर्येदमुपधारय शं
सतः ॥१॥ शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः ॥ तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनि
र्वृतिः ॥२॥ काम ईहा मदस्तृष्णा स्तंभ आशीर्भिदा सुखं ॥ मदोत्साहो यशःप्रीतिर्हास्यं वीर्यं ब
लोद्यमः ॥३॥

ग्यं श्रद्धा आस्तिक्यं ह्रीः अनुचिते कर्मणि लज्जा दयादानादिरतिरक्षणोक्षितिस्मरणात् आदिशब्देनार्जवविन
यादिः स्वनिर्वृतिः आत्मरतिः ॥२॥ रजसो वृत्तीराह कामो भिलाषः ईहा व्यापारः मदो दर्पः तृष्णा लाभेसत्यप
संतोषः स्तंभो गर्वः आशीर्धनाद्यभिलाषेण देवतादिप्रार्थनं भिदा अहमन्य इति भेदबुद्धिः सुखं विषयभो
गः मदोत्साहः मदेनोत्साहः मदेन युद्धाद्यभिनिवेशः यशःप्रीतिः स्तुतिप्रियता हास्यमुपहासः वीर्यं प्रभावाद्वि।

११८

238

तमोहंकारोहंकोधरतिः क्रोधोयोसहिष्णुता लोभोयथयथवमातुष्टता ॥ अनृतंतथावस्तुयथाप्राणिहिंसाद्रोहः याच्ञाप्रार्थ
नादंभोधर्मध्वजित्वं क्लमः कलिः कलहः शोकमोहौ इष्टवियोगशोचनं विषादः भीतः खेदः संचनिद्रालीढी आशाश्वंममविष्य
तीत्यन्वीन्दा भीर्भयमनुद्यमोऽश्रमः ॥ ४ ॥ अनुपूर्वशः क्रमेणैताः श्लोकत्रयोक्ताः वर्णितप्राया ॥ अन्यासामप्युक्तप्राया
अप्युक्ताइतिभावः ॥ ५ ॥ विभक्तानां गुणानां वृत्तयो वर्णिताः मिश्राणामाह सन्निपात इति त्रिभिः ॥ अहं ममेति च
मतात्वेक सर्वविकसामानाधिकरण्ये दृष्टिर्नाम सन्निपातजत्वं अहंकारः कामी क्रोधी मानी तथा ममशान्तिरस्तिका

क्रोधो लोभोऽनृतं हिंसा याच्ञा दंभः क्लमः कलिः ॥ शोकमोहौ विषादार्ती निद्राशा भीरनुद्यमः ॥ ४ ॥
सत्त्वस्य रजसश्चैतास्तमसश्चानुपूर्वशः ॥ वृत्तयो वर्णितप्रायाः सन्निपातमथो शृणु ॥ ५ ॥ सन्निपात
स्त्वहमिति ममेत्युद्धव या मतिः ॥ व्यवहारः सन्निपातो मनोमात्रेंद्रियासुभिः ॥ ६ ॥ धर्मे चार्थे च कामे
च यदासौ परिनिष्ठितः ॥ गुणानां सन्निकर्षोयं श्रद्धारतिधनावहः ॥ ७ ॥ ॥

मः क्रोधश्च इत्यादिदृष्ट्वा तत्पूर्वकः सर्वोव्यवहारश्च सन्निपातकार्यमित्याह व्यवहार इति ॥ अत्र हेतुः मनश्च मा
त्राणि च इंद्रियाणि च असवश्च तैः मन आदीनां सात्त्विकं तामसं राजसत्वात् तैर्व्यवहाराः सन्निपातज इति भावः
असौ पुरुषो यदा धर्मादिषु परिनिष्ठितो भवति तदायं त्रिषु निष्ठारूपः सन्निकर्षः सन्निपातकार्यं धर्मादीनां स ९
त्वतमोरजः कार्यत्वाद्विषयतः सन्निपातजत्वमुक्तं फलतश्चतथात्वमाह ॥ श्रद्धारतिधनानि सत्त्वरजस्तमोम
यान्यावहतीति तथा ७ ॥ राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धर्मनिष्ठायामेव संनिपातं दर्शयति प्रवृत्तिलक्षण इति काम्येषु धर्मेषु यदा पुंसो निष्ठा भवति अथवा निष्ठो निष्ठितः तयाउ
मानुष्यदा गृहाश्रम एव सक्तः तिष्ठेत् तदा तु पश्चात्स्वधर्मे च नियते नैमित्तिके तिष्ठेत गुणानां सापि संमितिः सन्निपातः
हि यस्मात्काम्यधर्मगृहासक्तिस्वधर्माः सत्त्वरजस्तमसां मयाद्यत्वर्थः ॥८॥ तदेवं मिश्रात्मिश्रगुणाद्वृत्तीः प्रदर्श्य पद
नीपुमान्येन यथा भवति लिंगयतुं केन तद्धर्मीयलिंगरूपमिति विभिः ॥९॥ हिंसाघनुमरणादिकमाशास्य याभ्
नेत्तं तामसं विद्यात् ॥ एते गुणा एवं भूता भवन्ति नित्याश्रयार्थः ॥ ॥११॥ न तु न तथापि गुणा एव पुनः कर्त्ता विशेषेण व

प्रवृत्तिलक्षणे निष्ठः पुमान्यर्हि गृहाश्रमे ॥ स्वधर्मे चानुतिष्ठेत गुणानां समितिर्हि सा ॥८॥ पुरुषं सत्त्व
संयुक्तमनुमीयाच्छमादिभिः ॥ कामादिभी रजोयुक्तं क्रोधाद्यैस्तमसा युतं ॥९॥ यदा भजति मां भक्त्या
निरपेक्षः स्वकर्मभिः ॥ तं सत्त्वप्रकृतिं विद्यात्पुरुषं स्त्रियमेव वा ॥१०॥ यदा आशिष आशास्य मां भजे
त स्वकर्मभिः ॥ तं रजःप्रकृतिं विद्याद्धिंसामाशास्य तामसं ॥११॥ सत्त्वं रजस्तम इति गुणा जीवस्य नैव
मे ॥ चित्तजा यैस्तु भूतानां सज्जमानो निबध्यते ॥१२॥

मेयोऽजीवस्य सेवक इति नियमः यतो मां भक्तिं जेदिति वारंवारमुक्त्वा तेनाह सत्त्वमिति जीवस्यैव न मे कृतः यतः ॥२॥
चित्तजा सी वो पाधौ चित्ते अभिमानं तेषु तन्नोपैः स च बध्यते कीदृशाः भूतानां देहरूपाणां मध्ये सज्जमानः
अहं तु न सज्जमानो गुणा नियन्तेन तत्स्पष्टादिकर्त्तापि निस्पृहः ॥ अतो महान्विशेष इति भावः यद्वा भूतानाम
पंचीकृतानां यत्कार्यभूतं चित्तं सत्त्वमयं हि सोमममन इति श्रुतेः तन्मूमवाः अतो भूतोपहितस्य जीवस्यैवेति अग्रमसा ॥२५

240

तदेवं मिश्रामिश्रगुणा कार्याणि प्रदर्श्येदानीं मे केनगुणेनाद्रिक्तं कार्याणि दर्शयति यदेति सप्तदशभिः यदेतरौ गुणौ।
जयेत ॥ अभिभवेत् भास्वरं प्रकाशकं विशदं स्वच्छं शिवं शांतं शिवं न विशदं तमः अस्वतंत्रं नायथाक्रमं सत्वधर्म
स्तानरहेतुत्वात्सदा तेषु जेत ॥ आदि शब्दाच्छमदमादि मिश्रं ॥११॥ तमः सत्वे च कर्मभूतं तत रजः कर्तृ संगो संग।
हेतुः भिदा भेदहेतुः बलं प्रवृत्तिस्वभावं अंतःसंगहेतुत्वात् ॥ यथा सा क्रिया च युज्येत तत्त्वतमः प्रमादभवतीम

यदेतरौ जयेत्सत्त्वं भास्वरं विशदं शिवं ॥ तदा सुखेन युज्येत धर्मज्ञानादिभिः प्रभो ॥१२॥ यदा ज
येत्तमः सत्त्वं रजः संगं भिदा बलं ॥ तदा दुःखेन युज्येत कर्मणा यशसा श्रिया ॥१४॥ यदा जयेद्रजः
सत्त्वं तमो मूढं लयं जडं ॥ युज्येत शोकमोहाभ्यां निद्रया हिंसयाशया ॥१५॥ यदा चित्तं प्रसीदेत इं
द्रियाणां च निर्वृतिः ॥ देहेऽभयं मनोऽसंगं तत्सत्त्वं विद्धि मत्पदं ॥१६॥

स्पर्ध ॥ भिदा हेतुत्वात् दुःखेन युज्येत द्वितीयाद्वै भयं भवतीति श्रुतेर्बलत्वात् कर्मणा च युज्यते ॥१४॥ यदा रजः
सत्त्वं च कर्मभूतं तमः कर्तृ जयेत् मूढं अविवेकं भ्रंशकं लयं आवरणात्मकं जडं अप्रवृत्त्यात्मकं अतो मूढत्वात् शो
कमोहहिंसाभिः लयत्वात् निद्रया जडत्वात् यथाभावेन केवलं आशया युज्येतेति दृष्टं यं जन इति पाठे लया
त्मकत्वमेव निद्राकारणं ॥१५॥ किं च यदा चित्तं प्रसीदेत् सत्त्वकं भवेत् इंद्रियनिर्वृत्तिरुपरतिः तत्तदा मत्पदं ॥ मद्रूपा
लब्धिस्थानं सत्त्वं विद्धि मत्पदं ॥१६॥

241

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भा॰ ए॰ टी॰ १२०

यदा पुनः क्रियया विकुर्वन्विकारं प्राप्नुवन्स्वयंधीर्भवति: आसमंताद्विन्नमाधीर्यस्य सः चेतसो बुद्धीन्द्रियाणाम्
निवृत्तिः। गात्राणि कर्मेन्द्रियाणि तेषामस्वास्थ्यं विकारादियुक्तं मनो भ्रांतं चंचलं रजउत्कटं निशामय जानीहि
यदा सीदत्तत्तरो भवेत् चेतसो ग्रहणे चिदाकारपरिणामे अक्षमं असमर्थं विलीयेत मनोपि सकलात्मकं नष्ट
लीनं तमो ग्लानं ग्लानिर्विषादश्च भवति। तं तदा तमउत्कटं उपधारय विद्धि: ॥१८॥ किंच एधमान इति ॥ इंद्रियाणे
व निवृत्तिप्रवृत्तिमोहस्वभावा निर्दिष्टास्ततो बलं तेषामियत्ता प्रसंगादाधिदैविकानां गुणानां स्वकर्षकार्याण्युक्ता।

विकुर्वन्क्रियया चाधीरनिवृत्तिश्च चेतसां ॥ गात्रास्वास्थ्यं मनो भ्रांतं रज एतैर्निशामय ॥१७॥ सीदच्चित्तं वि
लीयेत चेतसो ग्रहणेक्षमं ॥ मनो नष्टं तमो ग्लानिस्तमस्तदुपधारय ॥१८॥ एधमाने गुणे सत्वे देवानां
बलमेधते ॥ असुराणां च रजसि तमस्युद्धव रक्षसां ॥१९॥ सत्वाज्जागरणं विद्याद्रजसा स्वप्नमा
दिशेत् ॥ प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततं ॥२०॥ उपर्युपरि गच्छंति सत्वेन ब्राह्मणा जनाः त
मसाधोध आमुख्याद्रजसांतरचारिणः ॥२१॥

नीति ज्ञेय ॥१९॥ गुणोत्कर्षनिमित्तावस्थाभेदं दर्शयति सत्वादिति त्रिषु संततं त्रिगुणावस्थामात्रवृत्ति तुरीयं च तत्र यथा भव।
स्यांतरेणासमत्रिषु जागरणादिषु संततमेकरूपमात्मतत्त्वमेवेत्यर्थः ॥२०॥ गुणोत्कर्षद्वारेण तत्तत्कर्मफ
लनिष्टां दर्शयति उपर्युपरीति ब्राह्मणाः स्वधर्मानुष्ठानातियुक्ताः आब्रह्मणा इति पाठे ब्रह्मलोकमभिव्या
प्येत्यर्थः ॥ आमुख्यात्स्थावरानभियाप्य अंतरचारिणो मनुष्या एव भवंति ॥२१॥ ॥ ॥ १२०

242

देहाद्युत्क्रांतिकालीनगुणोत्कर्षफलमाह सत्वेवृद्धेसतिप्रलीनोमृतः रजोलयाः रजसिप्रवृद्धेसतिलयोयेषां
तेएवंतमोलयइत्यपिनिर्गुणात्मत्वेनलयप्राप्तायेपाटनाजीवेतेपिनिर्गुणात्मत्वात्मामेवयांतीत्यर्थः ॥२२॥ गुणा॥
गुणोत्कर्षकृतमेवतत्तत्फलसाधनकर्मत्रैविध्यमाह ॥ सदर्पणांममत्वीसुहृदोननकृतंविष्फलंकेवलदासभावेनैव
कृतंनिजंकर्मनिमादि ॥ तत्सात्विकंफलंसंकल्प्यते ॥ यस्मिन्नतत ॥ हिंसाप्रायंहिंसाहेतुत्वेनकृतंहिंसाबहुलंबहुप्रा
दिशह्रादुंभमात्मकंकर्मनिमादि ॥ तत्सात्विकंफलंसंकल्प्यते ॥ यस्मिन्नतत ॥ हिंर्यादिकृतंनतदिदानींसगुणानि

सर्वेप्रलीनाः स्वर्यांतिनरलोकेरजोलयाः ॥ तमोलयास्तुनिरयंयांतिमामेवनिर्गुणाः ॥२२॥ मदर्प
णंनिष्फलंवासात्विकंनिजकर्मतत ॥ राजसंफलसंकल्पंहिंसाप्रायादितामसं ॥२३॥ कैवल्यंसात्वि
कंज्ञानंरजोवैकल्पिकंचयत ॥ प्राकृतंतामसंज्ञानंमन्निष्ठंनिर्गुणंस्मृतं ॥२४॥ वनेतुसात्विकोवासो
ग्रामेराजसउच्यते ॥ तामसंद्यूतसदनंमन्निकेतंतुनिर्गुणं ॥२५॥ सात्विकः कारकोसंगीरागांधोरा
जसः स्मृतः ॥ तामसः स्मृतिविभ्रष्टोनिर्गुणोमदपाश्रयः ॥२६॥ सात्विक्याध्यात्मिकीश्रद्धाकर्मश्रद्धा
तुराजसी ॥ तामस्यधर्मेयाश्रद्धामत्सेवायांतुनिर्गुणा ॥२७॥
रागांधो ३

गुणाभेदेनज्ञानादीनांचातुर्विध्यमाहकेवलमिति ॥२३॥ केवलंदेहादिव्यतिरिक्तात्मविषयंवैकल्पिकंदे
हादिविषयंयत्तुराजसंप्राकृतंबालमूकादिज्ञानतुल्यंमन्निष्ठंपरमेश्वरविषयं ॥२४॥ वनेविविक्तत्वात्सा
त्विकोवासः ग्रामवत्निकेतंतुसाक्षात्तदाविर्भावान्निर्गुणांस्थानं ॥२५॥ कारकः कर्तासंगीप्रनासक्तः रागा
यः प्रमनिवेशावा .. इतिविग्रहः स्मृत्यास्मृतेः मदपाश्रयः मदेकशरणाः सन्निकिरकारत्वान्निर्गु
णः ॥२६॥ अधर्मेधर्मेइतियाश्रद्धा ॥२७॥ ॥राम॥

243

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री· भाग· ए· स्कं· ११ २५

पथ्यं हितं यत्विशामसुखकरं पूतं शुद्धं अनायस्तं नायासलब्धं आमं आहार्यं भक्ष्य भोज्यादि इंद्रियाणां प्रेष्ठं कटुं अम्ल
लवणादि आर्तिदा शुचि दुःखकरम् अशुद्धं च ॥ च शाद्धान्नि वेदितं निर्गुणां मयि समर्पितं ॥२८॥ आत्मोत्थं स्वसुखं विमद
मात्रयस्मिन्नयि तमदार्थविषयोत्थे नज्ञाननेवृत्तं ॥ उक्तं संसारहेतुभूतं त्रैगुण्यमुपसंहरति द्वाभ्यां ॥२९॥
द्रव्यं पथ्यमपूतादि देशो वनग्रामादि फलं सात्त्विकं सुखमित्यादि कालः यदा भजेत्तं भजन्यायदेवतोज येदित्या

तु

पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतं ॥ राजसं चेंद्रियप्रेष्ठं तामसं
चार्तिदाशुचि ॥२८॥ सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसं ॥ तामसं
मोहदैन्योत्थं निर्गुणं मदपाश्रयम् ॥२९॥ द्रव्यं देशः फलं कालो ज्ञानं कर्म
च कारकः ॥ श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ॥३०॥ सर्वे गुण
मया भावाः पुरुषाव्यक्तधिष्ठिताः ॥ दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्ष
भ ॥३१॥ ॥

दि कारकः सात्त्विकः कारको संगीत्यादि श्रद्धा सात्त्विकी अथवा त्मिकीत्यादि अवस्था सत्वा जागरणं मित्या
दि ॥ आकृतिः उपर्युपरि वक्तुं गीत्यादिनोक्ता देवतादिपूजा निष्ठा सत्वे प्रलीनाः स्वर्यान्तीत्यादिनोक्ते स्वर्गा
दिः एवं सर्वोपि अयं भावः त्रैगुण्यप्रक्रियात्मकः ॥३०॥ न केवलमेषं एव किं तर्हि यावंतः पुरुषाव्यक्ताधिष्ठि
ताः अधिष्ठिताः तेन ते सर्वभावा गुणमया एव तत्र ये च दृष्टमिति ॥३१॥ ॥ ॥ ॐ श्रीरामाय नमः ॥ ॥॥॥ २५।

244

इदानीं मुक्तस्यैव गुणेभ्यः संसारहेतुत्वमनुवदंस्ताभिर्जयोपायमाह एता इति सार्धेन येनेमे निर्जिताः स पश्चाद् दृढेन भक्तियोगेन मन्निष्ठः सम्यग्भावाय मोक्षाय प्रपद्यते योग्यो भवति॥३२॥ तस्माद्विवेकिना मिदमेव युक्तमित्याह तस्मादिति ज्ञानविज्ञानयोः संभवो यस्मिंस्तमिमं नरदेहं॥३३॥ भजनप्रकारमाह निःसंग इति सार्धेन सत्वसंसेवया सात्विकान्येव सेवेत पुमानित्यादिना विहरद्ये इति प्रागुक्तयानेयपेक्षया उपशमात्मकेन सत्वेनैव ३४ एव

न॰

एतासंसृतयः पुंसोगुणाकर्मनिबंधन॥ येनामी निर्जिताः सौम्यगुणाजीवेनचित्तजाः॥ भक्तियोगेनमन्निष्ठोमद्भावायप्रपद्यते॥३३॥ तस्माद्देहमिमंलब्ध्वाज्ञानविज्ञानसंभवं॥ गुणासंगंविनिर्धूय। मांभजंतिविचक्षणाः॥३४॥ निःसंगोमांभजेद्विद्वानप्रमत्तोजितेंद्रियः॥ रजस्तमश्चाभिजयेत्सत्वसंसेवयामुनिः॥३५॥ सत्वंचाभिजयेद्युक्तोनैरपेक्ष्येणशांतधीः संपद्यतेगुणैर्मुक्तोजीवोजीवंविहाय मां॥३६॥ जीवोजीवविनिर्मुक्तोगुणैश्चाशयसंभवैः॥ मयैवब्रह्मणापूर्णोनबहिर्नांतरश्चरेत् ३७

इतिश्रीभागवतेएकादशस्कंधेपंचविंशोध्यायः॥ २५॥॥

सति मां प्राप्नोतीत्याह संपद्यत इति जीवं जीवत्वकारणं लिंगशरीरं संप्राप्य न पुनः संसारस्तस्मादाह जीव इति ३ न बहिर्विषयभोगेन नांतरः॥ ततः स्मरणेन॥३६॥ गुणाकृतां गुणेभ्यः संसरणप्रथमजितगुणकथाकथनादिभिः यत्नतन्मत्कीर्तनैर्विवेकिनो न हि पुनः स्खलभंजनरी दृशाम्॥ ३७॥ इतिश्रीभावार्थदीपिकायां एकादशस्कंधेपंचविंशोध्यायः॥२५॥ ॥

245

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यद्दिंष्टो योगनिष्ठायां विद्यानोद्बुद्धसंगतः साधुसंगो नतत्रिष्ठायाः परा काष्ठेति वर्ण्यते॥ योगिनो योगविभ्रंशः संगतः संभवेदिति सर्वथा सन्निकृष्टमर्थमेव गीते विनव्यते॥ निःसंगो मां भजेद्विद्वान प्रमत्तो जितेन्द्रियः इत्युक्तेनत्र विपक्षेन र्थं कथयिष्यन् जीवन्मुक्तस्यापि तर्हि संगोद्भवविकारः इत्यर्थः स्यादित्याशंकोक्ताद् बादपूर्वकं परिहरति सत्वंद्वा भ्यां मलत्वांशासत्वरूपलक्ष्यते येन तमिमं नरदेहं लब्ध्वा मद्धते भक्तिलक्षणा ज्ञानास्थितः आत्मस्थमात्मनैव विद्येत् तेन निःस्थितेन परमानंदरूपं मां त्वात्मे मांसमुपैति सम्यक् प्राप्नोतीति न चैवं भूतस्य विषयसंगो नाम नास्तीत्याह गुण

श्रीभगवानुवाच॥ मलत्वांशमिमं कायं लब्ध्वा मद्धर्म आस्थितः॥ आनंदं परमात्मानं आत्मस्थं समुपेति मां॥ १॥ गुणमय्याजीवयोन्या विमुक्तो ज्ञाननिष्ठया॥ गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः॥ वर्तमानोपि न पुमान् युज्यतेवस्तुभिर्गुणैः॥ २॥ संगं न कुर्यादसतां शिश्नोदरतृप्तयां क्वचित्॥ तस्यानुगस्तमस्यंधे पतत्यंधानुगांधवत्॥ ३॥॥

शि॰ २

न खेति॥ २॥ गुणमय्या जीवयोनिः जीवोपाधिकस्तया विमुक्तः गुणेषु वर्तमानोपि तैर्न युज्यते संगं न प्राप्नोतिक्व चहेतुः॥ अवस्तुभिर्वस्तुते युज्यमानं दृश्यमानेन चाह॥ अवस्तुत्वं न तत्र मायामात्रेषु॥ २॥ तथापि संगं वर्जयेदित्याह असतामिति अप्रसन्नांल लत्वं साहचर्येण दूरे तर्पयतीति शिश्नोदरतृप्ता ते षांक्वचिदपि अप्राप्तानावदहत्वानां संगः किं तत्र संगे कष्टमपायमत आह अनुवर्तीसमन्धं पतंजमगच्छतीत्यंधस्तहत॥ ३॥ राम १२२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत्रेतिहासमाह ऐलः पुरूरवाः सम्राट् चक्रवर्ती बृहच्छ्रवाः कीर्तिर्यस्य सः उर्वशीविरहात्स्वयमेव मुह्यन्नपि पश्चात्तत्कृ
तेऽत्रैतान् समभागमय गन्धर्वदत्तेनाग्निना देवानिष्ट्वा उर्वशीलोकं प्राप्य शोकसंयमे शोकापगमे सति निर्वि
ण्णः सन् इमां गाथां गायन् अगायत तेनेति नवभिः स्कंधे प्रपंचितोऽपि इह स्फुटयति ॥४॥ प्राक्तनीं मोहावस्थामाह सप्तभिः त्यक्त्वेति आत्मानं म
त्कामप्रधानं त्यक्त्वा व्रजंतीं नग्न उन्मत्तवत् अन्वगात् हे जाये घोरे तिष्ठेति जायेममनसा तिष्ठ वदेव वाणी सि आह ॥

ऐलस्सम्राडिमां गाथामगायत बृहच्छ्रवाः ॥ उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयमे ॥४॥ त्यक्त्वा
त्मानं व्रजंतीं तां नग्न उन्मत्तवन्नृपः ॥ विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः ॥५॥ कामानतृप्तोऽनुजु
षन् क्षुल्लकान्वर्षयामिनीः ॥ न वेद यांतीर्नायांतीरुर्वश्याकृष्टचेतनः ॥६॥ ऐल उवाच ॥ अहो मे मो
हविस्तारः कामकश्मलचेतसः ॥ देव्या गृहीतकंठस्य नायुःखंडा इमे स्मृताः ॥७॥

मानहेतवनतेमेसंचाश्रतुदिनास एतेमयस्करयनतरवे वनाहनिमेवं मंत्रैर्विलपंस्त्व ॥५॥ वैक्लव्यकारणमाह ॥
कामानिति वर्षाणां यामिनीः रात्रीर्यान्तीः आयान्तीः आगामिनीः अहः प्राप्तान्तनायसमः ॥६॥ न सुरां च
र्वलोके प्राप्तस्य बहुकालमुर्वशीभोगानंतरं निर्विण्णस्य गाथाः ॥ माहात्म्या दशभिः तत्राष्टाभिः अनुतापः
प्रपंच्यते ॥ अहो इति यतो मया इमे अहोरात्ररूपा आयुःखंडा न स्मृताः ॥७॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तदेवाहमहमिति ॥ अभिनिर्वृत्तः सचिरसमागतोऽस्तंगतः अभ्युदितो वा सूर्य इति अनुयाऽर्वपूर्वा चितः वतखे
देडतया अपि वर्षिष्ठ यानामपि यातान्यहानि न वेदेति ॥ ७ ॥ येन संमोहेन आत्मदेहः क्रीडामृगवद्यौन ॥ ८ ॥ न
उपरणाय कृपितायाश्च तनयार्थमयी न ताश्च कैवसंयत्त्व तदा स्त्रीत्याह सपरिवर्दराज्यादिसहितऐश्वर्यं चक्र
वर्तिनं त्वणामिव यत्स्याया तीमपि अनुगमनमनुगतोऽस्मि ॥ ९ ॥ किं च ममप्रभावाद्यभिमानो हृष्टे वे साहकृतःत

नाहं वेदाभिनिर्मुक्तः सूर्यो वाभ्युदितो मया ॥ अपितो वर्षपूगानां बताहानि गतान्युत ॥ १० ॥ अहो मे आ
त्मसंमोहो येनात्मा योषितां कृतः ॥ क्रीडामृगश्चक्रवर्ती नरदेवशिखामणिः ॥ ११ ॥ सपरिच्छदमात्मा
नं हित्वा तृणमिवेश्वरं ॥ यान्तीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन् ॥ १२ ॥ कुतस्तस्यानुभावः स्यात्ते
ज ईशत्वमेव वा ॥ योऽन्वगच्छं स्त्रियं यान्तीं खरवत्पादताडितः ॥ १३ ॥ किं विद्यया किं तपसा किं त्या
गेन श्रुतेन वा ॥ किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतं ॥ १४ ॥ स्वार्थस्याकोविदं धिङ्मां मूर्खं
पंडितमानिनं ॥ योऽहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः ॥ १५ ॥ सेवतो वर्षपूगान्मे उर्वश्या अ
धरासवं ॥ न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा ॥ १६ ॥ ॥

स्य मे तेजो बलं खरो यथा पादताडितो पि खरीमन्वगाकृतिन्दत ॥ १७ ॥ एवंभूतस्य सर्वसाधनमिथ्या इत्युक्तं ।
किमिति स्यादिति न संन्यासेन विविक्तेन एकान्ते सवया मौनेन वाक्संयमेन ॥ १८ ॥ अत्र तमः सम्यगात्मानं निंदति ।
द्वाभ्यां स्वार्थस्येति अकोविदम ज्ञातारं गोखरवत् ॥ गोभिर्खरवाइवेति ॥ १९ ॥ अधरासवसेवमानस्याप्यात्म
भूर्मनसिजः पुनरुद्भवन् ॥ १६ ॥ ॥ श्री रामाय नमः ॥ ॥ श्री ॥ ॥

१२२

248

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवमहमिति निर्वेदो निरूपितः इदानीं तस्य विवेकमाह इद्यादिभिः पुंश्चल्येति अयं भावः कामिदेवानिष्ठाः इत्येवमप्रमत्तो
सि अतः परमेश्वरमेव भजेयमिति ॥१५॥ परमेश्वरप्रसादं विना देवरूपधिक्षेदपि देवा काचनो ह्येन निवर्तते तस्मा-
द्बोधितस्यापीति देव्या उर्वश्यास्सूक्तवाक्येन तु वचा धिक्कृतेन न प्रवृत्तो माया मायूतमो मानावृत्का सोऽप्रशिवासउ
तन्नन्वैरूपाणि सर्वाणि संतिष्ठा लाहूकाणा हृदयामितात्मनेन ॥१५॥ पूर्वं पुंश्चल्यापहृतं चित्तमित्यादिना त-
स्याप्रपकारोऽनुस्मृतः ॥१६॥ इदानीं ममैवायमपराध इत्याह ॥ किमेतयेति नः अस्माकं कामिनाऽपकृतं किमप

पुंश्चल्यापहृतं चित्तं को न्वन्यो मोचितुं प्रभुः ॥ आत्मारामेश्वरमृते भगवन्तमधोक्षजं ॥१४॥ बोधितस्या-
पि [highlighted] देव्या मे सूक्तवाक्येन दुर्मतेः ॥ मनोगतो महामोहो नापयात्यजितात्मनः ॥१५॥ किमेतया नो-
पकृतं रज्ज्वा वा सर्पचेतसः ॥ रज्जुस्वरूपाविदुषो योऽहं यदजितेन्द्रियः ॥१६॥ क्वायं मलीमसः कायो
दौर्गंध्याद्यात्मकोऽशुचिः ॥ क्व गुणाः सौमनस्याद्या ह्यध्यासोऽविद्यया कृतः ॥१७॥ ॥ ॥ ॥

कृतं न किंचिदपि यथा रज्जुस्वरूपाविदुषो रज्जुर्दुःखं सः सर्पकल्पनया खिद्यतोऽपि रज्ज्वा किमपि नाप-
कृतं तद्वत्तया यस्मात् योऽहमेवंभूतः सर्ववाजितेन्द्रियत्वात् परार्थी इत्यर्थः ॥१६॥ ननु तथापि सेवां प्रमादि-
गुणैः संमोहमूलमित्याशंक्यातेष्वपि कल्पिता एवेत्याह ॥ चतुर्भिः क्वायमिति मलीमसः ॥ अतिमलिनः
सुमनसां कुसुमानामिव गंधसौकुमार्यादि सौमनस्यं शोभनमनोभवो वा ॥१७॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री॰ भाग॰ टी॰ १२५

ममत्वमपितस्मिन्परिकल्पितमेवेत्याह ॥ पित्रोः किं स्वं कायः जनकत्वात्तदुवितर्के भार्याया वा भोगप्रदत्वात् स्वत्वात्
पत्युः क्रममक्रीतत्वाय तत्परत्वात् उक्रस्वामिनो वाधीनत्वात् अग्नेर्वा देहस्य तदाहुतित्वात् ॥ श्वगृध्रयोर्वा भक्ष्यत्वात् किं
वा आत्मनः स्वत्कृतमसुखभासुखभोगित्वात् सुहृदां वा उपकारित्वात् एवं यो न निश्चीयते ॥ १९ ॥ तुच्छाहंकृति विदुषस्
२० लक्षणा विष्ठांतो यस्य तस्मिन्कायेके त्वेवं प्रियत्वेन गृह्णाति मिथ्या बिभेवा हन्त्यहो इति सतनसंशोभनता सिके ॥ २०

न
पित्रोः किं स्वं भार्यायाः स्वामिनो ग्नेः श्वगृध्रयोः ॥ किमात्मनः किं सुहृदामिति यो नावसीयते ॥ १९ ॥ तस्मिन्कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते ॥ अहो सुभद्रं सुनसं सस्मितं च मुखं स्त्रियाः ॥ २० ॥ त्वङ्मांसरुधि
रस्नायुमेदोमज्जास्थिसंहतौ ॥ विण्मूत्रपूये रमतां कृमीणां कियदन्तरं ॥ २१ ॥
वस्ना [illegible] युमेदोमज्जास्थिसंहतौ ॥ विण्मूत्रपूये रमतां कृमीणां कियदंतरं ॥ २१ ॥ अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित् ॥ विषयेन्द्रियसंयोगान्मनः क्षुभ्यति नान्यथा ॥ २२ ॥ अदृष्टा
दश्रुताद्भावान्न भाव उपजायते ॥ असंप्रयुंजतः प्राणान् शाम्यति स्तिमितं मनः ॥ २३ ॥ ॥ ॥ ॥ ॥

लोर मिर

अतो गुणा वो पेणारमताणाः स्याकृत्याः कृमिसमानुयाह त्वगादिसंहतौ तत्त्वं च्यानेदेहे विण्मूत्रादिसंहतौ
अतो गुणाविपेण रमतां क्रमिसमानुप्याह त्वगादिसंहतौ तत्त्वं च्याने देहे विण्मूत्रादिसंहतौ रमतां कृमीणां वा ॥ २१ ॥ यद्यप्येवं बीभत्सितां एवं स्त्रियः अथापिनोपसज्जेत अवलोकनादिसंगं न कुर्यात् अ
र्थवित् विवेकी अत्र हेतुः विषयेति ॥ २२ ॥ ननु क्वचित् नेत्रमीलितनयनादेरपि मनः क्षोभो दृश्यते सत्यं सोपि पूर्व
दर्शनादिकं विना न भवतीत्याह अदृष्टादिति भावात् पदार्थात् भावो मनः क्षोभः अतः प्राणानिंद्रियाणि असंप्र
युंजतः नियच्छतः स्तिमितं निश्चलं सत् ॥ २३ ॥ राम

१२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इंद्रियैः ॥ कृत्वा अविस्रब्धः अविश्वसनीयः मादृशां आत्मविवेकिनां ॥२४॥ वाक्लितमाह हाम्भो एवमिति नृतेषु दे
वेषु च देवः अतीतित तथा ॥२५॥ उक्तिभिर्हितोपदेशैरिति तीर्थदेवादिसंगात् विसमसंगः ॥ अपेक्षेति निति दर्पापति २ ९
मत्तांलक्षणमाह ॥ संत इति विशेषणाष्टकस्यायमेहं देहे तमद्भावः ॥२७॥ न च तेषु उपदेशापेक्षापि तत्केव

तस्मात्संगो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः ॥ विदुषां चाप्यविस्रब्धः षड्वर्गः किमु मादृशां ॥२४॥ श्रीभग
वानुवाच ॥ एवं प्रगायन्नृपदेवदेवः स उर्वशीलोकमथो विहाय ॥ आत्मानमात्मन्यवगम्य मां वै
उपारमज्ज्ञानविधूतमोहः ॥२५॥ ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान् ॥ संत एवास्य छिंदंति म
नोव्यासंगमुक्तिभिः ॥२६॥ संतोनपेक्षा मच्चित्ताः प्रशांताः समदर्शिनः ॥ निर्ममा निरहंकारा निर्द्वंद्वा
निष्परिग्रहाः ॥२७॥ तेषु नित्यं महाभाग महाभागेषु मत्कथाः ॥ संभवंति हि ता नृणां जुषतां प्रपुनं
त्यघं २८ ॥ ता ये शृण्वंति गायंति ह्यनुमोदंति चादृताः ॥ मत्पराः श्रद्दधानाश्च भक्तिं विंदंति ते मयि
२९ ॥ भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते ॥ मय्यनंतगुणे ब्रह्मण्यानंदानुभवात्मनि ॥३०॥ यथ
पौश्रयमाणस्य भगवंतं विभावसुं ॥ शीतं भयं तमोप्येति साधून्संसेवतस्तथा ॥३१॥ निमज्ज्योन्मज्जतां
९२ घोरे भवाब्धौ परमायणं ॥ संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां ॥३२॥

ले तस्मिन्निधिरिव तारयंतीत्याह ते इति तिस्रभिः ॥ श्रवणादिभिरेवं मत्पराः श्रद्धया मा सम्यक् संतो भक्तिं विंदंति २५
विभावसुमग्निं सेवमानस्य अपैति नश्यति तथा कर्मादि जाड्यं आगामि संसारभयं दुःखमूलमज्ञानं च नश्य
तीत्यर्थः ॥३१॥ निमज्ज्योन्मज्जतां बुद्ध्यापवर्यानीभूतां परमाश्रयः ॥३२॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भाग टी १२५

किं च यथान्नमेव प्राणिनां जीवनमहमेव यथार्तानां शरणं धर्म एव यथा प्रेत्य परलोके वित्तं तथा सन्त एव अर्वाक्
संसारपाताद्बिभ्यतः पुंसः ॥ अरणं शरणं ॥ ३३ ॥ किं च सन्तस्तु चक्षूंषि बहुगुणानि गुणज्ञानानि अर्कः समुत्थितो
ऽपि बहिः स्वदर्पणैकमेव चक्षुरित्यर्थः ॥ ३४ ॥ प्रथमाध्यायार्थमुपसंहरति वैतसेन इति वैतसेनस्तत उर्वशीभावेन उपासनं प्रविष्टः स्वर्वी
तसनाप्तीभावं प्राप्तमाघस्य तस्य पुत्रो वैतसेनः पुरूरवा एवं क्रमप्रकारेणोर्वश्या लोकाख्यानादलोकना

अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहं ॥ धर्मो वित्तं नृणां प्रेत्य सन्तोऽर्वाग्बिभ्यतोऽरणं
॥ ३३ ॥ सन्तो दिशन्ति चक्षूंषि बहिरर्कः समुत्थितः ॥ देवता बान्धवाः सन्तः सन्त आत्माहमेव
च ॥ ३४ ॥ वैतसेनस्ततोऽप्येवमुर्वश्या लोकनिस्पृहः ॥ मुक्तसङ्गो महीमेतामात्मारामश्चचार
ह ॥ ३५ ॥ इति श्रीभागवते पुराणे एकादशस्कन्धे पुरूरवोगीतं नाम षड्विंशोऽध्यायः ॥ २६ ॥ श्रीउद्धव उ-
क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो ॥ यस्मात्त्वां ये यथार्चन्ति सात्वताः सात्वतर्षभ ॥ १
त

द्वानि स्पष्टं ततोऽपि सत्सङ्गात्प्राप्य दृढं तत्सर्वं त्यक्त्वा सङ्गः मुक्तात्मारामो भूत्वा यथेष्टं चचारेति ॥ ३५ ॥ इति एकादशे षड्विं-
शे ॥ सत्सङ्गविशेषक्रियायोगः सद्यः चित्तप्रसादकः सर्वकामाभिहेतुः सप्तविंशे प्रोक्तः सम्यक्ततः रागाद्याकुल-
चित्तानां ज्ञानतो संगादि संभवः ॥ इति कृष्णार्चनं भक्तमनुष्ठानाय पृच्छति । क्रियायोगमिति भवदाराधनं रूपे य-
स्मादिति कारणादि प्राप्तानां हि प्रश्नः सर्वकाराणां कामानामिति तत्तत्साधनं शिष्टानां यथेष्टं कस्माद्विधानाः

२५२

१२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्य पुनर्विशेषतः प्रश्ने कारणमाह एतदिति द्वाभ्यां निःश्रेयसकरं वदंति अंगिरसः सुतो बृहस्पतिः २
निःसृतं त्वयोपदिष्टमित्यर्थः ॥ देव्यै पार्वत्यै ॥३॥ सर्ववर्णानां त्रैवर्णिकानां ॥४॥ विश्वेश्वराणां ब्रह्मादीनामीश्वर ॥५॥
कर्मकांडस्य पूजाविधानस्य ॥ नास्त्यंतो ग्रंथः पारं चानुष्ठानं ततो यस्य तस्य ॥६॥ वैदिकादय मखस्त्रयो वैदिकाद्या

एतद्वदंति मुनयो मुहुर्निःश्रेयसं नृणां ॥ नारदो भगवान्व्यास आचार्योंगिरसः सुतः ॥२॥ निःसृतं ते
मुखांभोजात्यदाह भगवानजः ॥ पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान्भवः ॥३॥ एतद्वै सर्ववर्णानां
आश्रमाणां च संमतं ॥ श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ॥४॥ एतत्कमलपत्राक्ष कर्मबंधवि
मोचनं ॥ भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर ॥५॥ श्रीभगवानुवाच ॥ नह्यंतोनंतपारस्य कर्म
कांडस्य चोद्धव ॥ संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः ॥६॥ वैदिकस्तांत्रिको मिश्र इति मे त्रि
विधो मखः ॥ त्रयाणामीप्सितेनैव विधिना मां समर्चयेत ॥७॥ यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य
पूरुषः ॥ यथा यजेत मां भक्त्या श्रद्धया तन्निबोध मे ॥८॥ अर्चायां स्थंडिलेग्नौ वा सूर्ये वाप्सु हृदि द्वि
जे ॥ द्रव्येण भक्तियुक्तोर्चेत्स्वगुरुं माममायया ॥९॥ पूर्वं स्नानं प्रकुर्वीत धौतदंतांगशुद्धये ॥ उभ
यैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिना ॥१०॥

निर्वचयस्मिन्पुरुषसूक्तादौ स वैदिकः ॥ एवं तांत्रिकोपि मिश्रो ह्यात्मवादिर्मखः ॥ पूजा ॥७॥ यदा त्रैवर्णिको ज
तस्तदा विशेषमाह गर्भाष्टमैकादशद्वादशादिकाले स्वनिगमेन स्वाधिकारप्रवृत्तेन वेदेनोक्तं द्विजत्वमु
पनयनं ॥८॥ अर्चायां प्रतिमादौ ॥९॥ स्नानविशेषमाह ॥ उभयैर्वैदिकैस्तांत्रिकैश्च मंत्रैः ॥१०॥ ॥

255

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भा॰ए॰
टी॰
१२९

किंवा संध्योपासनादीनि कर्माणि अचोदितानि साकल्येन विहितानि यस्य यानि तैः सह मे पूजां कुर्यात् न तु तानि
परित्यज्येदित्यर्थः । सम्यक्कारमेव स्वविषय एव संकल्पो यस्य तथाभूतः सन् कर्मपावनीं कर्मनिर्हारिणीम् ॥ ११ ॥ अ
र्चाभेदानाह सार्द्धेन शैली शिलामयी लोही सुवर्णादिमयी लेप्या मृच्चन्दनादिमयी हृदि पूजा या मनोमयी
प्रकर्षेण तिष्ठत्यस्यामिति प्रतिष्ठा प्रतिजीवस्य भगवतो मंदिरं यद्वा प्रतिष्ठया कल्पनया सेन भगवन्मंदिरं भव
तीति प्रतिमाभेदेन विशेषमाह सार्द्धेन उद्वासो विसर्जनं ॥ १३ ॥ अस्थिरायां पूर्वार्चने विकल्पः स्थालग्रामे न कुर्या ॥ १२ ॥

संध्योपास्त्यादिकर्माणि वेदेन चोदितानि मे ॥ पूजां तैः कल्पयेत्सम्यक्संकल्पः क
र्मपावनीं ॥ ११ ॥ शैली दारुमयी लौही लेप्या लेख्या च सैकती ॥ मनोमयी मणिमयी प्र
तिमाष्टविधा स्मृता ॥ १२ ॥ चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं ॥ उद्वासावाहने न
स्तः स्थिरायामुद्धवार्चने ॥ १३ ॥ अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द्वयं ॥ स्न
पनं त्वविलेप्यायामन्यत्र परिमार्जनं ॥ १४ ॥ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायि
नः भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि ॥ १५ ॥ ॥

तस्मै कर्तायां कुर्यात् अस्थिरे अन्यत्र कुर्यान्न वेति अविलेप्यायां मृन्मयलेख्यव्यतिरिक्तायां अन्यत्र विलेप्यायां
च परिमार्जनमेव ॥ १४ ॥ इदानीं सकामनिष्कामभेदेन विशेषमाह द्रव्यैरिति प्रकर्षेण प्रसिद्धैः सुशोभनैः
अमायिनो निष्कामस्य भक्तस्य तु यथालब्धैः ॥ तत्र च हृदादिषु सर्वत्रानन्यत्वेन तत्र हृदि भावेन
भावनया पद्यादि हृदि चिन्मया यागस्त्वाभावेनमीमयैमद्रव्यैरित्यर्थः ॥ १५ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रतिष्ठानभेदेन प्रयाणोपचारमाह ॥ सार्धेन स्नात्वेत्यत्र विन्यासः यथाख्यातं अंग प्रधानदेवतानां तत्र मंत्रैः स्थापनं
प्रसर्हणामनुपस्थानाद्यादिभिस्तर्पणादिना यजनं ॥ १५ ॥ सर्वं च साधारणमाह स्थापयेति ॥ ७ ॥ एवमधिकारादिम
वस्थामुक्त्वा स्थानीमूजाप्रकारमाह ॥ शुचिरिति संभृतः संभारप्रजासाधनादि येन सः प्रागग्रे दर्भे ॥ यद्वा प्राग
वं संभृतसंभारः सन्नासीनः सम्यगासनं तस्य आसनबद्धो वा वंधो वा यत्र निविष्टः इत्यर्थः ॥ प्राग्भुखो उदङ्मुखो वासीनः प्र

स्नानालंकरणं प्रोक्तमर्चायामेव दृष्टवत् ॥ स्थण्डिले तत्र विन्यासो वह्नावावाहनं तु हविः ॥ १६ ॥
सूर्ये चाभ्यर्हणं प्रोक्तं सलिले सलिलादिभिः ॥ श्रद्धयोपहृतं प्रेष्ठं भक्तेन मम वार्यपि ॥ १७ ॥
भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥ गन्धो धूपः सुमनसो दीपोन्नाद्यं च किं पुनः ॥ १८ ॥
शुचिः संभृतसंभारः प्राग्दर्भैः कल्पितासनः ॥ आसीनः प्रागुदग्वार्चेदर्चायामथ संमुखः ॥
कृतन्यासः कृतन्यासां मदर्चां पाणिना मृजेत् ॥ कलशं प्रोक्षणीयं च यथावदुपसाधयेत् ॥ १९ ॥
तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च ॥ २० ॥

र्चायां तु स्थिरायां संमुखः । अर्चाभिमुखमुपविष्टः सन् ॥ १९ ॥ एवं तत्र गुर्वादिनमस्कारपूर्वकं यथोपदेशं सलि
नकृतन्यासः कृतो मूलमन्त्रन्यासो यस्यां तां मदर्चां प्राक्तनं निर्माल्यापकर्षणादिना शोधयेत् कलशं पूर्णं कुंभं प्रो
क्षणीयं प्रोक्षणार्थोदकपात्रं च उपसाधयेत् ॥ नैवेद्यं तत्पुष्पादिसंस्कुर्यात् ॥ २० ॥ तदद्भिः प्रोक्षणीयाद्भिर्देव
यजनं देवपूजास्थानं २१ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री भाग टी १२०

पाद्यार्घ्यं र्णं त्री णि पात्राणि कलशोपर्के ॥ मृदि तानि ते स्तोईबै ॥ साधयेत्तत्रपाद्यादि द्रव्याणि पाद्येषामा
कदूर्वाकुविष्णु क्रांतादि पाद्ये गंध पुष्पाक्षत यव कुशाग्र तिल सर्षपाः दूर्वा चेति कुमादयः द्रव्याष्टकं मुदीरि
ते जाती लवंग कक्कोलैर्मतमाचमनीयकमिति तानि चत्रीणि यथाक्रमेण इत्यादि मंत्रेणैव पात्रा च सर्वाणप्रि
मंत्रयेत् दैशिकः पूजकः ॥ २५ ॥ तदनंतरं पिंडे देहो वायुश्चिरसंपूर्ण इति कोष्ठगतेन वायुना शोषयित्वा धारणा तेन ना
भिनाद्धयेपुनर्ललाटस्था चंद्रमंडला मृतवेना मृतमये जाते तस्मिन् हृत्स्थ स्थापयेत् पंजीव कलाश्रीन

प्रोक्तं पात्राणि त्रीण्यपद्धि हैत्रैतेईश्रे स्थापयेत् ॥ २५ ॥ पाद्यार्घ्याचमनीयार्थं त्रीणि पात्रा
णि दैशिकः ॥ हृदा शीर्षाण्यभिवायाय अ वाभिमंत्रयेत् ॥ २७ ॥ पिंडे वायवग्निभूमं मृतं
समुस्थापरामकं ॥ प्राप्तजीवकलं ध्यायेत्तत्र सिद्धं भावितां ॥ २८ ॥ तया आत्मभूतया पिंडे व्या
प्तेसंपूजयेत्तन्मयः ॥ आवाहनादिविधिस्थापनं ध्यात्वा मां प्रपूजयेत् ॥ २९ ॥

तयात्मभूतं पाद्येन कंभूतेना नादौ तेत्सिद्धं भावितां प्रवरास्त्राकारेणादर्शकार्यवृंदतावाः पंचाशाः तच्चना
हे तेसिद्धैश्वर्यानां तथा च श्रुतिः येवेदेहो स्वयं प्रोक्ता येतां तेवप्रतिष्ठितः ॥ तस्य प्रकृतिस्त्रीनस्वयः परः स्तमहेष
हः इति ॥ २८ ॥ तयात्मभूतया सेवेनैव भावेनविंति तया प्रभूतमये पिंडे दीपे तप्रभया पूर्णंहृत्सि व्याप्तेसति तस्मि
न्नेवात्मानं सेकरूपचारै ॥ तत्पूज्यन्तन्मयः ॥ तत्र सोदिष्ठ आवाहनस्थापनादयः स्थापयित्वा ॥ ३ आमंत्रमां पूजयेत ॥ १२०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कथं पूजयेत्तदाह पाद्यं तिलहेम्नां यवाद्भिर्मासकैः ॥ २४ ॥ तत्र यवांश्च कांस्यस्थितांस्तामाद्यां वेष्टितं ताम्रपात्रं अयसि
द्वये मत्स्ये पाद्यादीन् उपचारान्प्रकल्पयेदिमान् यः ॥ उपस्पर्शः आचमनं अर्हणाम अर्चां तां प्रक्षेपु अयसि द्वये वेष्टितं
ताम्रमुक्तिं मौलि प्रामपेन्द्र उपस्पर्शः धर्मेतान्वैश्यामपि स्वर्यातयां तत्र वर्षैकस्यायुर्यादिक्षु ब्रह्मा तौ वृपादः प्रथमी
दीनि पूर्वादि दिक्षु गायत्री तास्थैव कांति काथादि योगुणाः ॥ पद्दिकामन्तत्र पूर्वादि कर्मेणाम ध्येच विमलोकर्ष ।
तीतानाकियायो गाप्रह्ली समेशानानुग्रहेति नवशक्तयः ॥ एवं पद्मपदेशायर्मादि दिक्षु शक्तिनिःस्वासने क

पाद्यो पस्पर्शार्हणादीनुपचारान्प्रकल्पयेत ॥ धर्मादिदिक्षु नवभिः कांस्यपिलासनमम २५ पद्म
महादले तत्र कर्णिकाकेसरोज्वले ॥ उमाम्बा वेष्टितं ताम्रपात्रमयं स्पर्शं अयसि द्वये ॥ २६ ॥ सुदर्शनं पाञ्चजन्यं
गदासीपु धनुर्हलान ॥ मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत ॥ २७ ॥ नेदं सुनन्दं नन्दं प्रचण्डं
उमेवच महाबलं बलं चैव कुमुदं कुमुदेक्षणं ॥ २० ॥ दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून्सुरान स्वे ।
स्वे स्थाने त्वभिमुखान्पूजयेत्प्रोक्षणादिभिः २८

स्पर्शिनेति कर्णिकायाः केसरैः तत्र स्थित्वा सूर्यादिमण्डले सोमज्वलनिमस्पर्शः ॥ २५ ॥ आयुधादिपूजामाह सुदर्श
नमिति त्रिभिः तत्र स्वहस्तं गामितं स्वायत्र पात्रे पूजाम्बूलिमान प्राप्त स्वेनैव शान्त्यावरणाभिमुखान्ततः सुदर्शनादि
मुसलान्तान्यायुधान्यष्टासु दिक्षु कौस्तुभमालाश्रीवत्सानुरसि ॥ २६ ॥ नन्दादीन्पार्षदान्नष्टदिक्षु गरुडं पुरतः
दुर्गादीनि कोणेषु गुरून्वामतः सुरानिन्द्रादिलोकपालान्पूर्वादिदिक्षु एवमेतान्देवस्याभिमुखान्प्रोक्षणा
दिभिः ॥ अर्चादिभिः पूजयेदित्यर्थः ॥ २८ ॥ 257

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पाद्यादीनुपचारान्प्रकल्पयेदित्युक्तं तानेव गुणानि विधिभिः प्रपंचयति पंचभिः चंदनेति ॥ ३० ॥ मंत्रातादृक्स्वर्णा
चर्मानुवाकः स्ववर्णाच्चर्मपरिवेदनेवमित्यादि महापुरुषविद्या ॥ जितं तेन पुंडरीकाक्षेन मत्ते विस्त्रभाव
न स्ववस्त्रापनमस्तेनतु महापुरुषपूर्वं तेति पौरुषसूक्तं सहस्रशीर्षेत्यादि नारायणादीनि सामानि वेदेन
रोनेमथितहवनस्यामृचि गीतानि इत्यादिरमान्तेनगोवद्धि एपाठीति ॥ ३१ ॥ वस्त्राक्षपचारे पुलकारलतां गुणं
विदेनैव स्वतिपत्राणि कपोलवनस्थाना द्वितीय तिलकं ता: पत्रभंगः मद्रक्तः चेत्तम् प्रेमपद्या भवति तथा यथा

चंदनोशीरकर्पूरकुंकुमागुरुकवासितैः ॥ सलिलैः स्नापयेन्मंत्रैर्नित्यदा विभवे सति ॥ ३० ॥ स्वर्णघ
१।२ र्मानुवाकेन महापुरुषविद्यया पौरुषेणापि सूक्तेन सामभी राजनादिभिः ॥ ३१ ॥ वस्त्रोपवीताभरणपत्र
स्रग्गंधलेपनैः ॥ अलंकुर्वीत सप्रेम मद्भक्तो मां यथोचितं ॥ ३२ ॥ पाद्यमाचमनीयं च गंधं सुमनसो
ऽक्षतान् ॥ धूपदीपोपहार्याणि दद्यान्मे श्रद्धयार्चकः ॥ ३३ ॥ गुडपायससर्पींषि शष्कुल्यापूपमोदका
न् ॥ संयावदधिसूपांश्च नैवेद्यं सति कल्पयेत् ॥ ३४ ॥ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं अन्नाद्य
गीतनृत्यानि पर्वणि स्युरुतान्वहं ॥ ३५ ॥

खितमलंकुर्वीत सप्रेम मर्त्यसर्वेषामाचामतो ॥ ३२ ॥ अन्नद्यालसंतां गुणांविधयेत्पाद्यमिति ॥ ३३ ॥ नैवेद्ये वैलक्षण्यां गु
णांविधत्ते गुडपायसेति शष्कुल्यस्तैलपक्वचित्रोधाः आपूपाः अपूपानां मंडकादीनां समूहाः सूपाः दधि अन्न
नानि सति विभवरत्ति विशेषः ॥ ३४ ॥ कालमेदेन गुणां विधत्ते अभ्यंगेति अभिषेचनपंचामृतादिस्नानं अन्नाद्य
गीति ॥ अन्नं भोज्यं आद्यं भक्ष्यं पर्वणि एकादश्यादौ अन्वहं प्रत्यहं वा विभवे सतीति ॥ ३५ ॥

258

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

फलभूयस्त्वार्थिनो ग्रावपिष्टजाप्रकारमाह ॥ विप्रमारवस्र होक्रा प्रकारेणामेखलादिभिरुपलक्षिते तेवि हिते नि। मिते तत्कुंडे विस्तरेणोक्षायत स्मिन्होमेखलाश्च तस्र ऋजुलाः हस्तमात्रो भवेहताः ॥ सयोनिर्वेदिकानयोप्यदिने प्रज्व लितमग्निं परितः समूहेदेकुंडमेलयेत् ॥१९॥ दर्भैः परिस्तीर्य परितः प्रोक्षयेत्प्रत्वायायप्रत्वयानसंज्ञकेप्या स्थितिभिः समिध्रदेतयादिनूपकर्मकृत्वाथ्रग्नेरुत्तरे दद्यात्पाणि होमापयोगी न्यासाद्यानि धायप्रातप्रणाप्रोक्षणी

विधिना विहिते कुंडे मेखलागर्तवेदिभिः ॥ अग्निमादाय परितः समूह्य त्वा पाणिनोदितं ॥२५॥ परिस्तीर्य थ्र्य पर्युक्षेत्वा धाय यथाविधि ॥ प्रोक्षणणपासाद्य द्व्याणि प्रोक्ष्याग्नौ भावयेत्तमा ॥२६॥ तप्तजांबू नदप्रख्यं शंखचक्रगदांबुजैः ॥ लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससं ॥२७॥ स्फुरत्किरीटकटक कटिसूत्रवरांगदं ॥ श्रीवत्सवक्षसंभ्राजत्कौस्तुभं वनमालिनं ॥२८॥ ध्यायन्नभ्यर्च्य दारूणि हविषा भिर्घृतानि च ॥ प्रास्याज्यभागावाघारौ दत्त्वा चाज्यप्लुतं हविः ॥२९॥ ॥

२४

पाद्योदकेन प्रोक्ष्याग्नौ मां ध्यायेत् ॥३०॥ पूर्वोक्ता दिभिरुल्लसंतः शोभमानाःप्लुत्वा रोमुज्जायुस्यातं ॥३१॥ स्फुरंति कि रीटादीनि यस्यतं ॥३२॥ हविषा घृतेनाभिप्लुतानि संसिक्तानि दारूणि अष्टसमिधः संसिक्तानि दारूणि अष्ट समिधः प्रास्य प्रक्षिप्य आघारौ ॥ तत्संज्ञकौ ययोर्गोएवमाज्यभागौ च दत्त्वा तदर्थावाघारौ होमः चेत्पर्युक्षेः तत्रा द्यौ प्रजापतये स्वाहायमिंद्राय स्वाहेति चोत्तरदक्षिणापविप्रसंधिमाव प्याग्निमध्यादा परिस्थितेन स्रुवेणाज्यभागौ चाग्नये स्वाहा सोमाय स्वाहेत्येवं होमस्तयो ॥३३॥ ॥

259

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री॰ भा॰ ए॰ टी॰ १२५ मूलमंत्रेणाष्टाक्षरेणाथवाषोडशर्चेनवायस्मिंस्तेनपुरुषसूक्तेनवचअवदानतः घृतप्लुतमाहुतिग्रहणेनेत्यर्थः पुरुषसू
क्तेनाथवायनपेतत्सएवमूलमंत्रस्तेनैवपृथक्चसमवदानतोहोमइतिमंत्रैस्वाहांतैर्नामभिश्चैर्यथान्यायंपूजाक्रमेण
वक्ष्यमाणेस्विष्टकृतेस्वाहेत्येवंस्विष्टकृतंचकृत्वा॥५०॥ ततोवह्निस्थंभगवंतंनमभ्यर्च्याथनमस्कृत्यपार्षदेभ्यो।
वेतादिभ्योष्टसुदिक्षुबलिंहरेत्ततः पूजास्थानमागत्यदेवस्याग्रेसमुपविश्ययथाशक्तिः मूलमंत्रंजपेत्
ततउभयत्रमाचमनंतोभोजनसौमांसंध्यात्वाआचमनंकृत्वाउच्छेषंविष्वक्सेनायकल्पयित्वानंतरंतयापश्चा

260

जुहुयान्मूलमंत्रेणषोडशर्चावदानतः॥ धर्मादिभ्योयथान्यायंमंत्रैःस्विष्टकृतंबुधः॥५०॥ अभ्यर्च्याथ
नमस्कृत्यपार्षदेभ्योबलिंहरेत्॥ मूलमंत्रंजपेद्ब्रह्मस्मरन्नारायणात्मकं॥५१॥ दत्वाचमनमुच्छेषंवि
ष्वक्सेनायकल्पयेत्॥ मुखवासंसुरभिमत्तांबूलाद्यमथार्हयेत्॥५२॥ उपगायन्गृणन्नृत्यन्कर्माण्य
भिनयन्मम॥ मत्कथाःश्रावयन्शृण्वन्मुहूर्तंक्षणिकोभवेत्॥५३॥ स्तवैरुच्चावचैःस्तोत्रैःपौराणैः
प्राकृतैरपि॥ स्तुत्वाप्रसीदभगवन्नितिवंदेतदंडवत्॥५४॥ शिरोमत्पादयोःकृत्वाबाहुभ्यांचपरस्प
रं॥ प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्णवात्॥५५॥

त्स्वयंभुंजीततः सुरभिमत्सुगंधवत्तांबूलादिमुखवासंदत्वाथपुनरपितमर्हयेत्पुष्पांजलिनापूजये
त्॥५३॥ अभिनयन्हस्ताभिनयाविकुर्वन्क्षणिकः क्षणमुपविश्यउत्सवावसरोभवेत्॥५४॥ (अभिनयन्नस्मिन्)
कंठप्रणाममेदिनीसंपेत्यायमाहशिरइतिबाहुभ्यांदक्षिणोत्तराभ्यांपरस्परंममदक्षिणोत्तरौपादौगृहीत्वायद्वाः
पृष्ठतः परस्परंनिबद्धाभ्यांकृत्वापरायइवभयत्रस्यमृत्यादिविलक्षणाद्ग्रहणाक्रमेण॥५५॥ ॥ ॥ ॥ १२५

ततः शेषाग्रहणात् पूर्वकं वैकालिकोद्यामनप्रकारमाह समन्यैव प्राप्तेनया शेषां निर्माल्यमपादत्तान्यापात्
शिरसाधायधृतां वृद्धसम्पेतन तद्दिशतिमायां यत्र संसोति स्तम्भन ॥ हमसहसंतनोति ष्यो वोद्यामनीय ॥ ५५ ए
तेष्वधिष्ठाने किं सुरवैर्मिमपेत्ता या माह ॥ अर्चा दिष्टिति ॥ यद्यपत्र अर्हन्त आधिष्ठाने इमुत्पा मुत्यमेनं जनः यतः
सर्वभूतेष्विति ॥ ५७ ॥ उभयतः इहामुत्र च ॥ ५४ ॥ समर्थं प्रत्याह ॥ सदेवीमिति त्रिभिः पुष्पोद्यानानि च कारयेत्

शि

इति शीर्षमपादत्तां शिरसाधायधारयेत् ॥ अर्हन्नमथेश्रद्धदात्मसंसोति ज्योतितिनस्मुनः ॥ ५९ ॥ अर्चा दिष्विप
दा यत्र अर्हन्मातत्रवाचेयेत ॥ सर्वभूतेषु मामनिच्च सर्वात्मादमवस्थितः ॥ ५७ ॥ पूर्वं क्रियायोगपथैः
प्रमार्वै दिक्कृतां त्रिकैः ॥ सर्वत्र मयतः सिद्धिमतो विदस्म श्रीप्सितां ॥ ५८ ॥ सदेवीसप्रतिष्ठाप्य मंदि
रं कारयेद्दृढं ॥ पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितां ॥ ५९ ॥ पूजादीनां प्रवाहार्थं महापर्व
स्वस्था नहं ॥ देवत्राणप्रग्रामानंदत्वा मत्स्वाहितामियात ॥ ६० ॥

तत्पूजायात्रोत्सवाश्रितान् पूजाप्रसहं यात्राविशिष्टे पर्वणि वहुजनसमायोगः उत्सवो नाटिमहोत्सवः ॥ तदा
श्रितान्देवत्रादीर्गत्वा पूजा यात्रोत्सवाश्रितानि त्समस्थावित्वर्णा पूजादीनां प्रवाहार्थं मतनतानुकृत्य
मत्स्वाहितां मत्समानैश्वर्यं प्रतिष्ठादीनां ॥ ६० ॥ ॥

श्रीहरिः

२६१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्री
भाग
टी
११

प्रतिष्ठादीनां व्यस्तसमस्तानां फलमाह प्रतिष्ठयेति सत्साम्यतां मया साम्यमिति सार्ष्टिः ॥५२॥ सकामस्य प्रत्युक्तं अहेतुक
भक्तस्य प्रत्याह मामेवेति अहेतुकभक्तियोगस्य पश्चात्कथं भवति भक्तियोगमिति ॥५३॥ दातृफलमुक्तं अपहर्तारं निंदति
यस्त्विति विड्भुक् विष्ठायां जीवन्क्रिमिः ॥५४॥ यत्पूर्वं फलेन देवानेव सामभ्याह ॥ कर्तुश्चेति ॥ सारथेः सहकारिणः
हेतोः प्रयोजकस्य अनुमोदितुः अप्रवृत्तस्य लक्ष्मित्यनय ॥ कर्तुः यत्नः कर्मणो मते भागिनः भागार्हाः तत्रापि
विशेषमाह भूय इति कर्मणि अधिसारथ्यादेः वा भूयसः ॥ अधिकफलमिति विपर्ययः पश्चादि मात्रेण पूजितासः प्रागेव दिशति

तामि॰

प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं ॥ पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥५२॥ मामेव नैरपेक्ष्ये
णा भक्तियोगेन विंदति ॥ भक्तियोगं स लभते एवं यः पूजयेत मां ॥५३॥ यः स्वदत्तां परैर्दत्तां हरेत सुरवि
प्रयोः वृत्तिं स जायते विड्भुक् वर्षाणामयुतायुतं ॥५४॥ कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च ॥ क
र्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं ॥५५॥ इति श्रीभागवते एकादशस्कंधे ॥ क ॥ रा ॥ न ॥ यिः सप्त
विंशोध्यायः ॥२७॥ श्रीभगवानुवाच ॥ परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् ॥ विश्वमेकात्मकं पश्य
न्प्रकृत्या पुरुषेण च ॥ परस्वभावकर्माणि यः प्रशंसति निंदति ॥ स आशु भ्रश्यते स्वार्थादसत्यभिनि
वेशतः ॥२॥

प्रीतः स्वकृतस्य प्रेरणां मम ॥५५॥ इति सप्तविंशः ॥ अष्टाविंशे तु यः पूर्वं विस्तरेणोपवर्णितः ॥ ज्ञानयोगः पुनः सो
ऽसौ समाहृत्य निरूप्यते ॥ तत्र दर्शयति विस्तरेणोक्तं ज्ञानयोगं संक्षेपेणानुवदन्नाह परस्वभावानुशांत्यर्थं तद्योगादीन
कर्माणि च तत्र हेतुः विश्वमिति ॥१॥ विक्षेपदोषमाह तावद्विनिंदा लक्ष्यमाणा ॥ असतिमिथ्याभूते कृते भिनिवि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुंशोमेव दृष्टांततो दर्शयति तैन स्वप्न जनार्दनकार्यकार्यैरिंद्रियगणैर्निद्रया अभिभूते सति पिंडस्थो जीवः ॥ केवलं मा
त्रेण मायां प्राप्नोति ततो मनस्य लीनं सति ॥ नष्टचेतसः सन्मूर्च्छं च मूर्च्छस्य तस्य सुषुप्तिं च प्राप्नोति यथा तद्वदेवना
नार्थं दृष्ट्वा द्वैताभिनिवेशी विक्षेपं फलं च प्राप्नोतीति ॥ ३ ॥ द्वैतासत्यतायां स्तुतिनिंदयोस्त्रिविधं प्रपंचयति सार्ध
घडिः किमद्य किमिति प्रवदन्तो द्वैतस्य मध्ये किं मद्दं किं वा अमद्दं किं युक्तं किं यद्द द्वे किं यद्दा अमद्दमित्यर्थः ॥

तैजसो निद्रया पदेन पिंडस्थो नष्टचेतनः ॥ मायां प्राप्नोति मूर्च्छं वा तद्वत्रानर्थं दृष्ट्वा मान ॥ ३ ॥ किं मद्दं किमम
द्वैतं स्याद्वस्तुनः किं युक्तं ॥ वाचोदितं तत्र दृष्टं मनसा ध्यानेन च ॥ ४ ॥ छायायाः पुरुषस्य तथा भासा
संततोपार्थकारिणः ॥ एवं देहादयो भावा यच्च तस्मात्मनस्तो मयं ॥ ५ ॥ आत्मैव तदिदं विश्वं सृजते सृजति
प्रभुः ॥ त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ॥ ६ ॥ तस्मात्मनो नास्माद्न्यो भावो निरूपितः
निरूपितं त्रिविधा निर्मूला भाति यान्नति ॥ ७ ॥

वस्तुत्वमेवाह ॥ वाचेति वाचा उपलक्षणं वा पुरुदितं उक्तं वस्तु यादृशि स्पष्टं तदनृतमिति ॥ ४ ॥ ननु एवं सति देहा
दिभावानामपि सत्यत्वात्कथं मयेत्युक्तं तत्र दृष्टांतमाह ॥ छायायाः प्रतिबिंबस्य त्वयाहु प्रतीयते आभासः पुरुषस्य
तादिः एतेषाम् संततोपार्थकारिणामवेहि ॥ एवं मूर्त्तत्वतः मूर्त्तरूपिवा यथा मूर्त्तमयः यावन्नेव लीयते तावत्पर्यन्त
मित्यर्थः ॥ ५ ॥ ननु सृष्ट्यादिकर्तृत्वमिति विदेहे तत्निरूपितं कथं सत्यमस्मात् तत्राह आत्मैवेति ह्यं भा त्रायते पालयतेऽस्ते त्रा
ति पालयति ॥ ६ ॥ अन्यस्मात्सृष्ट्यादिमतिरिक्तात् ॥ त्रिविधाध्यात्मादिरूपा भाति ॥ प्रतीतिः ॥ ननु कथं निर्मूला प्रती
यते तत्राह एतदिति ॥ ७ ॥

श्री
भाग
टी
११

ज्ञानविज्ञानयोर्नैपुण्यं निष्ठा सूर्यवत्समो भूत्वा ॥७॥ एतन्निष्ठाप्राप्त्युपायमाह प्रत्यक्षेणेति ॥ यदा मनत्वहं तेनदसदिति
ज्ञात्वा निःसंगो विचरेत ॥ आद्यंतवत्त्वमात्मानि रूपेण प्रत्यक्षेणानुमानेन सावयवत्वेनहं घटवदिति गमे
नभूतप्रत्ययस्याकाशादि आत्मसंविदा स्वानुभावेन सर्वेदृश्यमाद्यंतवत् अतएवासदिति ज्ञात्वेति ॥९॥ ननुयद्यात्मसंविदा
सर्वं दृश्यमसदित्युच्यते ॥ तर्ह्यात्मा स्वप्रकाशो देहादिदृष्टेतेचजडत्वमित्युक्तंस्यात् ॥ तथा च संसृतिस्सारस्प्रतिभासोनद्र
ष्टेतेति चोदयति अन्यतादिपंचविशेषैर्देवेतिअनात्मस्वदृशोर्नराजदृश्योः अन्नदेहतः ॥ द्रष्टृदृश्ययोमाभूतस्सदा

इदं गुणमयं विद्धि त्रिविधं मयया कृतं ॥ ८ ॥ एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणं ॥ न निंदति न च स्तौ
ति लोके चरति सूर्यवत ॥ ८ ॥ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा ॥ आद्यंतवदसज्ज्ञात्वा निःसंगो वि
चरेदिह ॥९॥ श्री उद्धवउवाच ॥ नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः ॥ अनात्मस्वदृशोरीश कस्य
स्यादुपलभ्यते ॥१०॥ आत्माव्ययोऽगुणः शुद्धः स्वयंज्योतिरनावृतः ॥ अग्निवद्दारुवदचिद्देहः ॥ कस्येह
संसृतिः ॥११॥

रपि तत्राहउपलभ्यतेइति ॥ ॥ एतदेवंप्रपंचयति आत्मेति अव्ययत्वादिपंचविशेषणैर्नाशादिरागादिपुण्यपुण्य
परिच्छेदनात्मसंबंधदर्शयतिदिहतद्देहस्तयदहतयद्येहं अचित्जडः अयंभावः ॥ यथैवाग्निर्दारुणोभेदेनाप्युप
लंभोपिदारुप्रकाश्यमेव अग्निस्तुप्रकाशकः ॥ तथा देहात्मनोरपिइति न संसृति स्तयोरन्यतरस्यापिघटतेइ
ति ॥११॥ ॥

१३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मसंतथापुमयोरेवमविवेकाएवंसंसारस्तेमननितिमाहूपंचभिः यावदितिसंनिकर्षणं संबंधः॥ नन्वसंगस्याकृतःसं-
बंधस्तत्राह अविवेकिनः॥ अज्ञानकृतत्वादपार्थः नन्वस्वप्रकाशस्यकथमज्ञानं॥ संसारस्तत्राह अपार्थोपिकेवलं
फलवान्स्फूर्तिःनतन्मनसोभिलाषार्थं॥ ननुसतोदेहादेः॥ ज्ञानतःसंसारस्फूर्तिदर्शनात्समपितत्राह अर्थेहीति
प्रभ्यात्मनः॥ ननुकथंचित्तानेनाविषयस्फूर्तिर्जीवन्मुक्तस्यापिद्वैविरमांतिमोहतप्रसंगः॥ स्यान्तत्राह यथाहीति
तिप्रस्वमः॥ बहुनर्थानविभर्तिपुष्णातीतितथा॥४॥ अहंकारस्यलक्षणोदेहादिसंकर्षणसंसारलक्षणमिम्

श्रीभगवानुवाच॥ यावद्देहेंद्रियप्राणैरात्मनःसंनिकर्षणं॥ संसारःफलवांस्तावदपार्थोप्यविवे-
किनः॥२॥ अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्तते॥ ध्यायतोविषयानस्यस्वप्नेनर्थागमोयथा॥३॥ यथा-
ह्यप्रतिबुद्धस्यप्रस्वापोबहुनर्थभृत्॥ सएवप्रतिबुद्धस्यनवैमोहायकल्पते॥४॥ शोकहर्षभयक्रो-
धलोभमोहस्पृहादयः॥ अहंकारस्यदृश्यंतेजन्ममृत्युश्चनात्मनः॥५॥ देहेंद्रियप्राणमनोभिमानो
जीवोंतरात्मागुणकर्ममूर्तिः॥ सूत्रंमहानित्युरुधेवगीतःसंसारआधावतिकालतंत्रः॥६॥

त्वयः॥ ननुप्रतिबोधमात्रेणात्मधर्माणांशोकादीनांकथंनिवृत्तिस्तत्रव्यतिरेकमप्याहर्षापतिशोकेतिसप्रमा-
हितेषांमहदर्शनात॥ अहंस्मबोतिवश्चैतन्मस्त्रबोतिप्रतीतेस्वभावात्तद्रूपतास्यस्वबोदीनामकुशलादित्वतदूर्थ-
र्मत्वानुपपत्तेरितिभावः॥ ननुयद्यहंकारस्यसंसारस्तस्यसंसारस्तर्हिमुक्तिरपितस्यैवेतिमुक्तावहंकारावं-
शेषः प्राप्तस्तत्राह देहेति देहादिषुभिमानोयस्यसः प्रत्येवतेषांमतर्हितोजीवः॥ अतएवगुणकर्ममयीमू-
र्तिर्यस्यसः॥ एवंचसूत्रात्मायाधिभिर्बहुदेवसूत्रादिशब्दैर्गीतः संसारोपरमेश्वराधीनः॥ सर्वतोधावतिप्रतोनाय

टीकासिरवः ५५॥

265

श्री
भाग
टी
१८२

तदेवमहंकारकृतं वैषम्यमुक्त्वा यदंभीत्तानेन तन्निवृत्तो मुक्तिरित्याह अमूलमिति वक्तोमूलशून्यमज्ञानेन क्लृप्तं मीत्रूपेरूपितं प्रकाशितं मैः ज्ञात्वा कत्तल्पमिति वाकिं तदाह मनइति मन आदिनाहंकृतः यद्वा मन आदि क्रियते इति कर्म अहंकारस्तेयुरूपासनया निशितेन तेनलब्धेन ना ॥१॥ तदेव ज्ञानेस्वरूपसाधनं फलैः निरूपयति ज्ञानमिति विवेको ज्ञानं तत्रसाधनमाह निगमो वेदः तपः स्वधर्मः प्रत्यक्षादीन्यनुभवः पेतिह्यमुपदेशः अनुमानं तर्कः फलंज्ञानस्वरूपमाह आद्यंतयोर्यदस्यजगतः मध्येपि तदेवकेवलं न तज्जगदिति किं तत्कालः कलयति प्रकाशयतीति यः तथा हेतुः कारणं चयत् ॥ तदेवषडङ्गं भवति यदस्य विश्वस्य कारणप्रकाशकं ॥ स्वरूपं तदात्मकमेवेतत्तनततः पृथगिति

मा।

अमूलमेतद्बहुरूपरूपितं मनोवचःप्राणशरीरकर्म ॥ ज्ञानासिनोपासनया शितेन च्छि
त्त्वा मुनिर्गां विचरेदतृष्णः ॥१७॥ ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमा
नं ॥ आद्यंतयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये ॥ १८ ॥ यथा हिरण्यं
स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य ॥ तदेव मध्ये व्यवहार्यमाणं नाना
पदेशैरहमस्य तद्वत् ॥ १९ ॥

वं निरूप्य फलोनिगमादिसाधनैर्ज्ञायते यो विवेकः तज्ज्ञानमिति ॥१८॥ तदुक्तं ज्ञानं चेदं ब्रह्मव्यवहारातीतं वनस्यापि विश्वस्य कारणमात्रात्मकत्वं सदृष्टांतमाह ॥ यथेति स्वकृतं स्वसंभूतं कुंडलादिरूपेणाविर्भावितं यद्धिरण्यं पूर्वकीटशो हिरण्मयस्य कुंडलादेरुपपत्तेः पुरस्तात्ततः पश्चाच्च पर्यंतिके कटककुंडलमिमादिनानाव्यपदेशैर्व्यवहारं प्राप्यमाणामपि ॥ तदेव यथा तद्वदस्य विश्वस्य कारणभूताहमेव नानाव्यवहारालंवने ॥ तद्वन्मतः ॥१९॥ पृथगिवस्थमिति ॥१९॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तदेवं कार्यस्य कारणात्मना मृत्स्नाप्रकाशस्य प्रकाशात्मनामाह विज्ञानमिति त्रियवस्थस्य कारणस्य
कृपाद्यः के देहेन्द्रियेण ज्ञानं ग्राह्यादिरूपावस्था यद्विज्ञानं मतः ॥ तदवस्थाकारणभूतं च यद्गुणात्रयं यच्च कारणका
र्यकर्तृ कारणमध्यात्मं कार्यमधिभूतं कर्तृ अधिदैवं गुणात्रयकार्यभूतं त्रिविधं यत् तद्येन तुर्येण कारणा
दज्ञानमात्रेण समन्वयेन भवति येनानुगतं प्रकाशात् तदुक्तमर्थः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमि
दं विभातीति तथा चव्यतिरेकेण नस्यात् तदेव यमनो विदुरित्यादिश्रुतेः ॥ ननु विशेषज्ञानव्यतिरेकेण न तुर्यं

ग
विज्ञानमेतत्त्रियवस्थमंग गुणात्रयं कारणकार्यकर्तृ ॥ सम
न्वयेनव्यतिरेकतश्च येनैव तुर्येण तदेव सत्यं ॥ न यत्पुर
